संस्कृत-पुस्तकम्

# मणिका

## द्वितीयो भागः

दशमश्रेण्यै



केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्

आत्मीयच्छात्रा: !

यदि कश्चित्/काचिद् भवन्तं भवतीं वा अनुचितरूपेण स्पृशति, सः च स्पर्शः भवत्कृते असहजः अस्वाभाविकः वा स्यात् तर्हि मौनं मा तिष्ठतु।

1. भवान् /भवती अहमेव 'दोषी/दोषिणी' इति मा चिन्तयतु।
2. यस्मिन्/यस्यां भवान् /भवती विश्वसिति, तं/तां सर्वं वृत्तं सूचयतु।
3. भवान्/भवती **पॉक्सो ई बॉक्स** माध्यमेन राष्ट्रिय-बालाधिकार-संरक्षणायोगमपि सूचयितुमर्हति।

**यदा भवन्तं भवतीं वा कश्चित्/काचित् अनुचितरूपेण स्पृशति तदा भवान्/भवती असहजम् अनुभवितुं शक्नोति। दुविधाग्रस्तः/दुविधाग्रस्ता भवान्/भवती असहायः/असहाया अहमिति अनुभवितुं शक्नोति परं तथा चिन्तयितुम् आवश्यकता नास्ति। यतः भवतः/भवत्याः कश्चित् दोषः नास्ति।**




**एतं पिञ्जं नुदतु।**

**पॉक्सो ई.बॉक्स NCPCR@gov.in इत्यत्र उपलभ्यते।**

नवसमाजं प्रति
Towards a new dawn

**यदि भवतः/भवत्याः आयुः अष्टादशवर्षेभ्यः न्यूनम् अस्ति, भवान्/भवती कस्याञ्चिद् विपदि अस्ति अथवा दुविधाग्रस्तः/दुविधाग्रस्ता अस्ति। भवता भवत्या वा साकं कश्चन दुर्व्यवहारः घटितः, भवान्/भवती कस्मिंश्चित् सङ्कटे अस्ति अथवा कञ्चिद् एतादृशं बालकं काञ्चिद् एतादृशीं बालिकां वा जानाति तदा....**

**1098 इत्यस्यां सङ्ख्यायां दूरवाणीं करोतु यतः केचन उत्तमाङ्काः जीवनं परिवर्तयन्ति।**




**बाल-सहायिका सङ्ख्या 1098 विपद्ग्रस्तेभ्यः बालेभ्यः अहर्निशं निःशुल्का राष्ट्रिया आपत्कालीना दूरवाणी-सेवा, महिला एवं बाल-विकास-मन्त्रालयस्य सहयोगेन चाइल्ड इंडिया फाउण्डेशन इति संस्थायाः प्रयासः अस्ति।**

नवसमाजं प्रति
Towards a new dawn

स्वच्छम् भारतम्
एकं पदं स्वच्छतां प्रति

G20
भारत 2023 INDIA

75 आज़ादी का अमृत महोत्सव

संस्कृत-पुस्तकम्

# मणिका

## द्वितीयो भागः

### दशमश्रेण्यै

केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्

प्रथमं संस्करणम् : एप्रिलमासः 1999

द्वितीयं संशोधितं संस्करणम् : मार्चमासः 2023

© CBSE : Unpriced e-publication

प्रकाशकः : निदेशकः, केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्

शिक्षा-सदनम्, 17, राउज एवेन्यु, नई दिल्ली-110002

This book or part there of may not be reproduced by any person or agency in any manner.

मुद्रकः आवरण-सज्जा च : **लक्ष्मी प्रिंट इंडिया**

556, जी.टी. रोड, शाहदरा, दिल्ली-110032

# पुरोवाक्
## ( द्वितीयं संशोधितं नूतनसंस्करणम् 2023 )

प्राचीनकालादेव भारतदेशः विश्वगुरुः इति प्रथितं विश्वस्मिन्। निखिलविश्वस्य कृते मानवतायाः, नैष्ठिकतायाः, सहिष्णुतायाः आर्थिकशुचितादीनां सन्देशं दत्त्वा देशोऽयं समग्रं संसारम् उपकरोति। तत्र मूलभूतं कारणं संस्कृतमेव। संस्कृतं विहाय नास्ति काचिद् भाषा या समस्तां मानवसभ्यतां परिवारवत् निवस्तुं प्रेरयेत्। भाषैषा पुराकालतः एव नैजं सुगन्धं विकिरन्ती कण्ठे-कण्ठे, मुखे-मुखे भूत्वा वेदवेदाङ्गपुराणसाहित्यरूपेण प्रसृता अस्ति। भाषाज्ञानार्थं खलु चत्वारि सोपानानि भवन्ति-श्रवणम्, भाषणम्, पठनम्, लेखनञ्च। विद्यालयेषु अनुवादविधिना एव संस्कृतस्य पठनपाठनेन सम्भाषणकौशलस्य सम्यक्तया विकासः न भवति। सम्भाषणपरम्परां विना छात्राः संस्कृतं केवलं विषयम् इति मत्वा पठन्ति। तथैव प्रश्नपत्रेऽपि ते अनुवादमाध्यमेन एव उत्तरं दातुं प्रभवन्ति।

एतत्सर्वमपि दृष्ट्वा विद्यालयेषु संस्कृत-शिक्षणार्थम् उपयुक्तसरलपाठ्यपुस्तकम्, भाषाविकासाय अभ्यासपुस्तकम्, भाषादृढीकरणाय श्रव्यदृश्योपकरणादीनां निर्माणं कथं भवेद् तदर्थं केन्द्रीयमाध्यमिकशिक्षासङ्घटनस्य शैक्षणिकविभागः सततं कार्यरतः, प्रयत्नशीलः कृतसङ्कल्पश्चास्ति। एतदुद्दिश्य एव संस्कृतशिक्षणे सम्प्रेषणोपागममधिकृत्य सङ्घटनानेन माध्यमिक-उच्चमाध्यमिककक्षाभ्यः चतुर्वर्षीयनवीनसंस्कृतपाठोपक्रमस्य तदनुकूल-पाठ्यपुस्तकानां विकासाय एका नूतना प्रायोजना उपस्थापिता। अस्यां प्रायोजनायाम् अभ्यासपुस्तकसहितं दशमश्रेण्यै इदं 'मणिका' (संशोधितं नूतनसंस्करणम्, 2023) इति नामकं पाठ्यपुस्तकं विकसितम्। पुस्तकस्यास्य माध्यमेन विद्यार्थिनः संस्कृतभाषालेखने सम्भाषणे च कुशलाः स्युः इत्येव पावनम् उद्देश्यम्। पाठ्यपुस्तकस्य अभ्यासेषु नवीनतमचिन्तनप्रेरक-प्रश्नानां सङ्कलनम् अस्ति। तथा च छात्राः शब्दकोषं दृष्ट्वा शब्दार्थं ज्ञात्वा विषयमवगच्छेयुः तदुद्दिश्य पाठान्ते शब्दार्थाः अपि संलग्नीकृताः। छात्राणां मनसि संस्कृतसाहित्यं प्रति अनुरागः जिज्ञासा वा जागृयात् इति दृष्ट्या पाठस्य अभ्यासान्ते 'योग्यताविस्तारः' इति कृत्वा विशिष्टा सामग्री, सुभाषितानि, प्रहेलिकाः, हास्यकणिकाश्च सङ्कलिताः सन्ति।

राष्ट्रिय-शिक्षा-नीतिः 2020 अनुच्छेदः 4.38 इत्यस्य अनुशंसानुगुणं प्रत्येकम् अपि विषयमधिकृत्य स्तरद्वयात्मकः पाठ्यक्रमः भवेत् यतः विद्यार्थिनां कृते विषयचयने सुगमतया विकल्पः उपलब्धः स्यात्। एतदभिलक्ष्यैव केन्द्रीयमाध्यमिकशिक्षासङ्घटनेन दशमश्रेण्यै '**सम्प्रेषणात्मकं संस्कृतम् ( कूटसङ्ख्या-119 )**' इति पाठ्यक्रमः निर्धारितः। तदनुगुणमेव पुनः अस्य 'मणिका' पुस्तकस्य सम्पादनं संवर्धनं च क्रियमाणं वर्तते। तदर्थं एम. एल. खन्ना डी.ए.वी. पब्लिकविद्यालयः, द्वारका, नवदेहली इत्यस्य संस्कृतशिक्षकः श्रीअशोककुमारः, हंसराज मॉडल स्कूल, पञ्जाबीबाग, नवदेहली इत्यस्य संस्कृतशिक्षकः डॉ. श्रीओमभारद्वाजः, अमृता विद्यालयम्, पुष्पविहारम्, नवदेहली इत्यस्य संस्कृतशिक्षकः श्री उपेन्द्रकुमारमिश्रः इत्येतैः पाठ्यपुस्तक-संशोधनसमितिसदस्यैः अनवरतं परिश्रमः कृतः। कालानुगुणम् आवश्यकतानुसारं पुस्तकस्य निर्माणादारभ्य अधुनायावत् नैके विद्वांसः अस्य पुस्तकस्य संवर्धनं सम्पादनं च कृतवन्तः। अस्यां प्रायोजनायां यैः पाठ्यनिर्माणसमितिसदस्यैः पुस्तकसंशोधनसमिति- सदस्यैश्च अनवरतं परिश्रमः कृतः ते सर्वेऽपि नूनं साधुवादार्हाः।

पुस्तकस्य पुनः प्रकाशनार्थं केन्द्रीयमाध्यमिकशिक्षाबोर्ड इति सङ्घटनस्य शैक्षणिक-निदेशकः - डॉ. जोसफ इमानुवल-महोदयस्य विशिष्टं योगदानं निश्चयेन उद्देश्यं पूरयति, अतः महोदयस्य कृतेऽपि भूयांसः धन्यवादाः।

अन्यैरपि च यैः अस्य पुस्तकस्य समीक्षणाय मुद्रणाय च सहयोगः प्रदत्तः तान् सर्वान् प्रति केन्द्रीयमाध्यमिकशिक्षासङ्घटनं नूनं स्वकृतज्ञतां ज्ञापयति।

शिक्षाजगति किमपि मौलिकं कर्म अथवा अन्यविधं कार्यं वा अन्तिममिति कथयितुं न शक्यते। यतः सर्वत्र काले काले परिष्कारस्य संस्कारस्य वा अवकाशः भवत्येव। अतः अस्य पुस्तकस्य संशोधनाय परामर्शाः अपेक्षिताः स्वागतार्हाः च।

डॉ. निधि छिब्बर
**अध्यक्षा**
केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्

# सम्प्रेषण-आधारितः पाठ्यक्रमः

भारतीयसंविधानस्य मौलिककर्तव्यान्तर्गते [अनुच्छेद 41 (ङ) (च)] संस्कृतिसन्दर्भे विद्यालयस्तरस्य शिक्षापाठ्यचर्यायां संस्कृतस्य स्थानस्य महत्त्वं स्वयमेव सुविदितम्। सामान्यतः विद्यालयेषु संस्कृतस्य अध्ययनं द्विविधं भवति-

- वाङ्मयशिक्षणम्
- भाषाशिक्षणम्

प्रायः आधुनिकविद्यालयेषु संस्कृतस्य अध्ययन-अध्यापनम् अनुवादसाहाय्येन एव भवति। इदं दृश्यते यत् अनेन मार्गेण छात्राणां संस्कृतवाचन-लेखन-भाषणनैपुण्यं न सन्तोषप्रदम्। एतेषु नैपुण्यं प्राप्तुं भूयो भूयः अभ्यासस्य आवश्यकता वर्तते। यतोहि 'अभ्याससारिणी विद्या' इति निरपवादः सिद्धान्तः।

एतदुद्दिश्य भाषा-शिक्षणे सम्प्रेषणोपागमाधिकृत्य केन्द्रीय-माध्यमिक-शिक्षा-सङ्घटनेन माध्यमिक-उच्चमाध्यमिककक्षाभ्यः संस्कृतस्य चतुर्वर्षीयनवीन-पाठ्यक्रमनिमित्तत्वेन तदनुकूल-पाठ्यपुस्तकविकासाय एका प्रायोजना उपस्थापिता। अस्याः योजनायाः प्रमुखोद्देश्याः सन्ति-

- राष्ट्रस्य सांस्कृतिकसमन्वये संस्कृतस्य भूमिकायाः उद्घाटनम्।
- छात्राणां मातृभाषायाः (अथवा क्षेत्रभाषायाः) संस्कृतस्य च मध्ये साम्यदर्शनम्।
- संस्कृतसाहित्ये निहितजीवनमूल्यानां प्रस्फुटनम्।
- संस्कृतवाचन-लेखन-भाषणनैपुण्यस्य विकासः।
- रुचिकरसामग्रीनिर्माणम्।
- अन्तःसेवाप्रशिक्षणमाध्यमेन अध्यापकानां शिक्षणविधिपरिशोधनम्।
- संस्कृते वस्तुनिष्ठ-उपयुक्त-मूल्याङ्कन-विधीनाम् आयोजनम्।

**अस्याः प्रायोजनायाः प्रमुखसोपानानि एतानि सन्ति-**

- प्रथमचरणे पाठ्यपुस्तकस्य निर्माणम्।
- द्वितीयचरणे भाषिकतत्त्वाश्रितम् अभ्यासपुस्तकनिर्माणम्।
- तृतीयचरणे संस्कृतध्वनिवैशिष्ट्यं विरामचिह्नवैशिष्ट्यञ्च अधिकृत्य पाठ्यपुस्तक-सामग्रीम् अधिकृत्य ध्वन्यङ्कनम्। (लिङ्ग्वाफोनध्वनि-मुद्रिकापाठ्यपुस्तकम्)
- अध्यापकनिर्देशिका इति चतुर्थचरणे।

अस्य पाठ्यपुस्तकस्य वैशिष्ट्यम्-

- सचित्रपाठसङ्ख्या - ११
- गतिविधि-आधारित-विस्तृत-अभ्यासाः
- व्यावहारिक-मूल्याधारित-पाठाः
- सरलभाषा

❖ योग्यताविस्तार:

❖ प्रहेलिका:

❖ विनोदकणिका:

अत्र इदं स्मरणीयं यत् विद्यालयात् बहि: गृहेषु अन्यत्र कुत्रापि वा छात्राणां कृते संस्कृतव्यवहाराभ्यासस्य संस्कृत-श्रवणस्य वा अवसरो न उपलभ्यते। अत: पाठ्यपुस्तकस्य अभ्यासान्तर्गते 'विस्तारकार्यम्' आवश्यकतत्त्वम् अस्ति यस्मिन् विद्यालयेषु पाठ्यसहगामिक्रियाणाम् आयोजनाय निर्देशा: सन्ति। पुस्तकस्य एक: विशेषपाठ: '**समानमस्तु वो मन:**' एवञ्च अभ्यासान्तर्गते **योग्यताविस्तारस्तु** अत्र ज्ञानवर्धनाय एव न तु परीक्षायां परीक्षणाय।

संस्कृतशिक्षणस्य आवश्यकानि सोपानानि एवं सन्ति–

- भावानुकूल-आदर्शवाचनम्
- छात्रै: अनुकरण-वाचनम्
- उच्चारण-स्पष्टीकरणम्
- शब्दार्थ-स्पष्टीकरणम्
- श्लोकानाम् अन्वय:
- पद्यांशानां गद्यांशानां वा सरलसंस्कृते सारस्य भावस्य वा कथनम्
- प्रश्नोत्तरै: अवबोधनकार्यम्
- संस्कृते गतिविधय:
- अनुप्रयोगरूपे कक्षाकार्यम्

संस्कृतशिक्षणे संस्कृतमयवातावरणनिर्माणं केन्द्रतत्त्वरूपेण।

**–चांदकिरणसलूजा**

संयोजक: पाठ्यसामग्री-निर्माणसमिति:

# मणिका-दशमी

## कृतज्ञताज्ञापनम्

### ( संशोधितं नूतनसंस्करणम् 2023 )


### केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड-परामर्श-समितिः

- श्रीमती निधि छिब्बर, अध्यक्षा, केन्द्रीय-माध्यमिक-शिक्षाबोर्ड, भारतम्
- डॉ. जोसफ इमानुवल, निदेशकः (शैक्षणिक-विभागः), केन्द्रीय-माध्यमिक-शिक्षाबोर्ड, नवदेहली

### पाठ्यसामग्री-निर्माणसमितिः

- श्री चांदकिरणसलूजा, प्राध्यापकः, शिक्षाविभागः, दिल्ली-विश्वविद्यालयः (संयोजकः)
- डॉ. माणिकगोविन्दचतुर्वेदी, केन्द्रीय-हिन्दी-संस्थानम् (सेवानिवृत्तः)
- श्रीमती शशिप्रभागोयल, एस.सी.ई.आर.टी. (सेवानिवृत्ता)
- श्री ओमप्रकाशठाकुरः, पूर्व-उपप्रधानाचार्यः, सर्वोदय-विद्यालयः, एफ यू ब्लॉक, पीतमपुरा, नवदेहली
- श्रीमती सन्तोष कोहली, सर्वोदय-सहशिक्षा विद्यालयः, कैलाश एन्कलेव, नवदेहली - 110034
- डॉ. भास्करानन्दपाण्डेयः, प्रवक्ता राजकीय-वरिष्ठ-बालविद्यालयः, एस. पी. रोड, नांगलोई, नवदेहली
- श्रीमती राजबत्रा, मुख्याध्यापिका, माध्यमिक-शाखा, मॉडर्न स्कूल, बाराखम्बा रोड, नवदेहली
- डॉ. के. के. मिश्र, प्राचार्य, एन.सी.ई.आर.टी, नवदेहली
- डॉ. वाई. डी. शर्मा, हिन्दू कॉलेज, दिल्ली विश्वविद्यालय (सेवानिवृत्त)
- डॉ. विजय हाण्डा, पूर्व अध्यक्षा, संस्कृत-हिन्दी-विभाग, सेण्टकोलम्बस विद्यालय, नवदेहली
- श्रीमती अनीता शर्मा, संस्कृत अध्यापिका, विवेकानन्द विद्यालय, आनन्द विहार, नवदेहली
- श्रीमती आदर्श आहूजा, संस्कृत अध्यापिका, दिल्ली पब्लिक स्कूल, मथुरा रोड, नवदेहली
- श्रीमती आशा लता, संस्कृत अध्यापिका, मातृ-अन्तर्राष्ट्रीय विद्यालय, श्री अरविन्दो मार्ग, नवदेहली
- श्री छवि कृष्ण शास्त्री, संस्कृत अध्यापक, केन्द्रीय विद्यालय, टैगोर गार्डन, नवदेहली

### सी.बी.एस.ई. समन्वयिका

- डॉ. प्रज्ञा वर्मा (उपसचिव)

### सम्पादन-समितिः ( संशोधित-नूतनसंस्करणस्य )

- श्री अशोककुमारः, एम एल खन्ना डी. ए. वी. पब्लिकविद्यालयः, द्वारका, नवदेहली (संयोजकः समन्वयकश्च)
- डॉ. श्रीओमभारद्वाजः, हंसराज मॉडल स्कूल पञ्जाबीबाग, नवदेहली
- श्री उपेन्द्रकुमारमिश्रः, अमृता विद्यालयम् पुष्पविहारम्, नवदेहली

# राष्ट्रियशिक्षानीतिः 2020

देशस्य प्रत्येकं विद्यार्थी अध्ययनकाले भारतीयभाषाः इति विषये यथा षष्ठीतः अष्टमीस्तरपर्यन्तम् ''एकं भारतम्
श्रेष्ठं भारतम्'' इत्युपक्रमान्तर्गतम् आनन्ददायकपरियोजनायां गतिविधौ वा भागग्रहणं कुर्यात्। अनया परियोजनया
गतिविधिना वा छात्राः अधिकांशरूपेण प्रमुखभारतीयभाषाणाम् उल्लेखनीयायाः परस्परसमानतायाः विषयं जानीयुः।
तदन्तर्गतं तासां सामान्यध्वन्यात्मकरूपेण वैज्ञानिकरूपेण च व्यवस्थितवर्णमालां लिपिं सामान्यव्याकरणसंरचनाः
च अवगच्छेयुः। संस्कृतभाषातः अन्यशास्त्रीयभाषातः वा तासां शब्दावलीस्रोतसः उद्भवस्य च अन्वेषणेन सह
तद्भाषाणां समृद्धेः परस्परप्रभावस्य अन्तर्भेदस्य चापि ज्ञानं भवति। ते इदमपि जानीयुः यत् कस्मिन् क्षेत्रे का भाषा
भाष्यते तथा च आदिवासिभाषाणां प्रकृतिः संरचना च कीदृशी भवति। एवं भारतस्य प्रमुखभाषासु सामान्यरूपेण
उच्यमानानां केषाञ्चन वाक्यानां तत्रत्यसमृद्धसाहित्यस्य च किञ्चित् परिचयं वक्तुं शक्नुयुः (आवश्यकतानुसारम्
अनुवादमाध्यमेन)। एतादृग्गतिविधिना ते भारतस्य एकतायाः सुन्दरसांस्कृतिकपरम्परायाः विविधतायाः च
परिचयं प्राप्नुयुः। आजीवनं ते भारतस्य अन्यभागानां जनैः सह मेलनावसरे सहजताम् अनुभवेयुः। इयं परियोजना
गतिविधिः वा रुचिकरः आनन्ददायी गतिविधिः भवेत् अपि च तत्र केनापि रूपेण मूल्याङ्कनस्य अन्तर्भावो न
स्यात्। 4.16

भारतस्य शास्त्रीयभाषाणां साहित्यस्य महत्त्वं प्रासङ्गिकतां सौन्दर्यञ्च कदापि हेयदृष्ट्या वीक्षितुं न शक्यते।
संस्कृतं संविधानस्य अष्टमानुसूच्यां वर्णिता महत्त्वपूर्णा आधुनिकभाषा विद्यते। अस्याः साहित्यम् एतादृशं विशालं
विद्यते यत् लैटिन–ग्रीक–साहित्यं मेलयित्वा तुलना क्रियते चेदपि समानता न भवति। संस्कृतसाहित्ये गणितम्,
दर्शनम्, व्याकरणम्, सङ्गीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कविता, कथाः,
(यस्य संस्कृतज्ञानप्रणाल्यां परिगणना भवति) इत्यादिविषयाणां विशालभाण्डागारो विद्यते। एतेषां साहित्यानां
लेखनं भिन्नधार्मिकजनैः सह धार्मिकेतरजनैः सामाजिकार्थिकपृष्ठभूमिवर्गीयजनैः अपि सहस्रवर्षेभ्यः लिखितं
विद्यते। अनया रीत्या संस्कृतं त्रिभाषासूत्रस्य मुख्याधारविकल्पेन सह विद्यालयेषु उच्चतरशिक्षायाः सर्वेषु
स्तरेषु छात्राणां कृते महत्त्वपूर्णेन समृद्धेन विकल्पेन सह प्रदीयते। संस्कृतं रोचकतया अनुभवात्मकविधिना
सह समकालिकप्रासङ्गिकतानुगुणं यत्र संस्कृतज्ञानप्रणाल्याः अन्तर्भावः स्यात् विशेषरूपेण ध्वनिमाध्यमेन
उच्चारणमाध्यमेन च पाठ्यते। प्राथमिकस्तरस्य माध्यमिकस्तरस्य च संस्कृतपाठ्यपुस्तकानि 'संस्कृतेन
संस्कृतपाठनम्' (एसटीएस) इति रीत्या पाठनीयानि। तदध्ययनम् आनन्ददायकं कर्तुं सरलमानकसंस्कृतस्य
(एसएसएस) प्रयोगं कर्तुं शक्यते। 4.17



# भारत का संविधान

## उद्देशिका

हम, भारत के लोग, भारत को एक सम्पूर्ण [1]प्रभुत्व-संपन्न समाजवादी पंथनिरपेक्ष लोकतंत्रात्मक गणराज्य बनाने के लिए, तथा उसके समस्त नागरिकों को:

सामाजिक, आर्थिक और राजनैतिक न्याय,
विचार, अभिव्यक्ति, विश्वास, धर्म
और उपासना की स्वतंत्रता,
प्रतिष्ठा और अवसर की समता
प्राप्त कराने के लिए
तथा उन सब में व्यक्ति की गरिमा
[2]और राष्ट्र की एकता और अखंडता
सुनिश्चित करने वाली बंधुता बढ़ाने के लिए

दृढ़संकल्प होकर अपनी इस संविधान सभा में आज तारीख 26 नवम्बर, 1949 ई॰ को एतद्द्वारा इस संविधान को अंगीकृत, अधिनियमित और आत्मार्पित करते हैं।

1. संविधान ( बयालीसवां संशोधन ) अधिनियम, 1976 की धारा 2 द्वारा ( 3.1.1977 ) से "प्रभुत्व-संपन्न लोकतंत्रात्मक गणराज्य" के स्थान पर प्रतिस्थापित।
2. संविधान ( बयालीसवां संशोधन ) अधिनियम, 1976 की धारा 2 द्वारा ( 3.1.1977 ) से "राष्ट्र की एकता" के स्थान पर प्रतिस्थापित।

---

### भाग 4 क

## मूल कर्त्तव्य

**51 क. मूल कर्त्तव्य** – भारत के प्रत्येक नागरिक का यह कर्त्तव्य होगा कि वह –

(क) संविधान का पालन करे और उसके आदर्शों, संस्थाओं, राष्ट्रध्वज और राष्ट्रगान का आदर करे;

(ख) स्वतंत्रता के लिए हमारे राष्ट्रीय आंदोलन को प्रेरित करने वाले उच्च आदर्शों को हृदय में संजोए रखे और उनका पालन करे;

(ग) भारत की प्रभुता, एकता और अखंडता की रक्षा करे और उसे अक्षुण्ण रखे;

(घ) देश की रक्षा करे और आह्वान किए जाने पर राष्ट्र की सेवा करे;

(ङ) भारत के सभी लोगों में समरसता और समान भ्रातृत्व की भावना का निर्माण करे जो धर्म, भाषा और प्रदेश या वर्ग पर आधारित सभी भेदभाव से परे हों, ऐसी प्रथाओं का त्याग करे जो स्त्रियों के सम्मान के विरुद्ध हैं;

(च) हमारी सामासिक संस्कृति की गौरवशाली परंपरा का महत्त्व समझे और उसका परिरक्षण करे;

(छ) प्राकृतिक पर्यावरण की जिसके अंतर्गत वन, झील, नदी, और वन्य जीव हैं, रक्षा करे और उसका संवर्धन करे तथा प्राणिमात्र के प्रति दयाभाव रखे;

(ज) वैज्ञानिक दृष्टिकोण, मानववाद और ज्ञानार्जन तथा सुधार की भावना का विकास करे;

(झ) सार्वजनिक संपत्ति को सुरक्षित रखे और हिंसा से दूर रहे;

(ञ) व्यक्तिगत और सामूहिक गतिविधियों के सभी क्षेत्रों में उत्कर्ष की ओर बढ़ने का सतत प्रयास करे जिससे राष्ट्र निरंतर बढ़ते हुए प्रयत्न और उपलब्धि की नई उंचाइयों को छू ले;

[1](ट) यदि माता-पिता या संरक्षक है, छह वर्ष से चौदह वर्ष तक की आयु वाले अपने, यथास्थिति, बालक या प्रतिपाल्य के लिये शिक्षा के अवसर प्रदान करे।

1. संविधान ( छयासीवां संशोधन ) अधिनियम, 2002 द्वारा प्रतिस्थापित।

# THE CONSTITUTION OF INDIA

## PREAMBLE

**WE, THE PEOPLE OF INDIA,** having solemnly resolved to constitute India into a [1]**SOVEREIGN SOCIALIST SECULAR DEMOCRATIC REPUBLIC** and to secure to all its citizens :

**JUSTICE,** social, economic and political;

**LIBERTY** of thought, expression, belief, faith and worship;

**EQUALITY** of status and of opportunity; and to promote among them all

**FRATERNITY** assuring the dignity of the individual and the[2] unity and integrity of the Nation;

**IN OUR CONSTITUENT ASSEMBLY** this twenty-sixth day of November, 1949, do **HEREBY ADOPT, ENACT AND GIVE TO OURSELVES THIS CONSTITUTION.**

1. Subs, by the Constitution (Forty-Second Amendment) Act. 1976, sec. 2, for "Sovereign Democratic Republic" (w.e.f. 3.1.1977)
2. Subs, by the Constitution (Forty-Second Amendment) Act. 1976, sec. 2, for "unity of the Nation" (w.e.f. 3.1.1977)

---

# THE CONSTITUTION OF INDIA

## Chapter IV A

## FUNDAMENTAL DUTIES

**ARTICLE 51A**

**Fundamental Duties -** It shall be the duty of every citizen of India-

(a) to abide by the Constitution and respect its ideals and institutions, the National Flag and the National Anthem;

(b) to cherish and follow the noble ideals which inspired our national struggle for freedom;

(c) to uphold and protect the sovereignty, unity and integrity of India;

(d) to defend the country and render national service when called upon to do so;

(e) to promote harmony and the spirit of common brotherhood amongst all the people of India transcending religious, linguistic and regional or sectional diversities; to renounce practices derogatory to the dignity of women;

(f) to value and preserve the rich heritage of our composite culture;

(g) to protect and improve the natural environment including forests, lakes, rivers, wild life and to have compassion for living creatures;

(h) to develop the scientific temper, humanism and the spirit of inquiry and reform;

(i) to safeguard public property and to abjure violence;

(j) to strive towards excellence in all spheres of individual and collective activity so that the nation constantly rises to higher levels of endeavour and achievement;

[1](k) to provide opportunities for education to his/her child or, as the case may be, ward between age of 6 and 14 years.

1. Subs, by the Constitution (Eighty-Sixth Amendment) Act. 2002.

# पाठानुक्रमणिका


| | | पृष्ठाङ्काः |
|---|---|---|
| | अथ स्वागतम् | 1 |
| | समानमस्तु वो मनः | 2 |
| प्रथमः पाठः | - वाङ्मयं तपः | 3-15 |
| द्वितीयः पाठः | - नास्ति त्यागसमं सुखम् | 16-26 |
| तृतीयः पाठः | - रमणीया हि सृष्टिः एषा | 27-39 |
| चतुर्थः पाठः | - आज्ञा गुरूणां हि अविचारणीया | 40-54 |
| पञ्चमः पाठः | - अभ्यासवशगं मनः | 55-68 |
| षष्ठः पाठः | - राष्ट्रं संरक्ष्यमेव हि | 69-80 |
| सप्तमः पाठः | - साधुवृत्तिं समाचरेत् | 81-92 |
| अष्टमः पाठः | - तिरुक्कुरल्-सूक्ति-सौरभम् | 93-103 |
| नवमः पाठः | - सुस्वागतं भो! अरुणाचलेऽस्मिन् | 104-117 |
| दशमः पाठः | - कालोऽहम् | 118-129 |
| एकादशः पाठः | - किं किम् उपादेयम् | 130-139 |

# अथ स्वागतम्

**आचार्यः** – प्रियच्छात्राः। स्वागतं सर्वेषां भवतां दशमकक्षायाम्।

**छात्राः** – आचार्य! किं दशमकक्षायाम् अपि 'मणिका' पुस्तकमेव पठामः किल?

**आचार्यः** – आम्! मणिकामेव पठामः परन्तु अस्याः द्वितीयं भागम्।

**छात्राः** – एवम् द्वितीयं भागम्! अत्र किं वैशिष्ट्यम्?

**आचार्यः** – पठित्वा ज्ञायताम्। पाठान्ते दत्ताः प्रस्तावितक्रियाकलापाः अपि करणीयाः। प्रहेलिकाः, विनोद-कणिकाः च पठित्वा ज्ञानवर्धनेन सहितं मनोरञ्जनमपि क्रियताम्।

**छात्राः** – उत्सुकाः वयम् एतत् पुस्तकं पठितुम्।

**आचार्यः** – सफलं भवतु युष्माकं ज्ञानमयं तपः। वयं मिलित्वा एव गायामः ऋग्वेदस्य एतां प्रार्थनां 'समानमस्तु वो मनः'-

## समानमस्तु वो मनः

सङ्गच्छध्वं संवदध्वं
सं वो मनांसि जानताम्।
देवा भागं यथा पूर्वे
सञ्जानाना उपासते॥ १ ॥

समानो मन्त्रः समितिः समानी,
समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः,
समानेन वो हविषा जुहोमि॥ २ ॥

समानी व आकूतिः,
समाना हृदयानि वः।
समानमस्तु वो मनो,
यथा वः सुसहासति ॥ ३ ॥

प्रथमः पाठः

# वाङ्मयं तपः



**आचार्यः** – प्रियच्छात्राः! पठिताः अस्माभिः ऋग्वेदस्य मन्त्राः। ज्ञायते किम् ऋग्वेदस्तु विश्वसाहित्ये आदिमः आलेखः। सार्वकालिकाः सार्वभौमिकाः च अस्य उपदेशाः।

**छात्राः** – आम्! तथैव कथितं **सङ्गच्छध्वं संवदध्वम्।**

**आचार्यः** – साधु! जानन्ति किं भवन्तः वाचः महत्त्वम्?

**सुमेधा** – अहं वदानि। **वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते।**

**आचार्यः** – शोभनम्। विद्यावतां वाचि सरस्वती विराजते। इदमेव शिक्षयति अयं पाठः **वाङ्मयं तपः**।

प्रथमः पाठः

# वाङ्मयं तपः

शारदा शारदाम्भोजवदना वदनाम्बुजे।
सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्॥ 1॥

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥ 2॥

नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्॥ 3॥

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया।
प्रह्लादयति च पुरुषं यथा मधुरभाषिणी वाणी॥ 4॥

शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
ऊहापोहार्थविज्ञानं तत्त्वज्ञानं च धीगुणाः॥ 5॥

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥ 6॥

आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया।
कालेन पादमादत्ते पादं सब्रह्मचारिभिः॥ 7॥

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ 8॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अक्षरव्यक्तिः** (सं) (स्त्री०प्र०ए०व०) [अक्षराणां व्यक्तिः, ष०त०] | वर्णानां स्पष्टता | वर्णों का स्पष्ट उच्चारण | distinct pronunciation of syllables. |
| **अनुद्वेगकरम्** (वि०) (नपुं०प्र०ए०व०) [न उद्वेगकरम्, नञ् त०पु०, उद्वेगं करोति इति उद्वेगकरः, उप०त०पु०] | (यत् वाक्यं) व्याकुलतां न उत्पादयति | व्याकुलता न उत्पन्न करने वाला | not causing anxiety. |

| | | | |
|---|---|---|---|
| **अपूर्वः** (वि०) [न पूर्वः, नञ् त०पु०] | असाधारणः | अनोखा, विशिष्ट | Unprecedented. |
| **अपोहः** (सं०) (पु०प्र०ए०व०) (अप+ऊह्+घञ्) | ऊहस्य (तर्कस्य) विलोमः | तर्क लगाना, तर्क शक्ति द्वारा शंका निवारण, निषेधात्मक चिन्तन | opposite of arguments against the subject, antithesis, negative thought. |
| **अर्थविज्ञानम्** (सं०) (नपुं०प्र०ए०व०) [अर्थस्य विज्ञानम्, ष०त०] | अर्थस्य विवेचनम् | शब्दों के अर्थ का ज्ञान | knowledge of the (word) meanings. |
| **ऊहः** (सं०) (पु०प्र०ए०व०) [ऊह्+घञ्] | सूक्ष्मविचारणा, चिन्तनम्, अनुमानम् | तर्क लगाना, चिन्तन करना, अनुमान लगाना | reasoning in favour of positive arguments, deliberations. |
| **कोशः** (सं०) (पु०प्र०ए०व०) | निधिः | खजाना | treasure accumulated wealth, treasure-house. |
| **क्रियात्** (सन्निधिम्) (क्रि०) [कृ+आशीर्लिङ् प्र०पु०ए०व०] | उपस्थिता भवेत् | (उपस्थित) होवें | may please abide. |
| **धीगुणाः** (सं०) (पु०प्र०ब०व०) [धियो गुणाः, ष०त०] | बुद्धेः लक्षणानि | बुद्धि के गुण (लक्षण) | characteristics of intelligence. |
| **पदच्छेदः** (सं०) (पु०प्र०ए०व०) [पदानां छेदः, ष०त०] | पदानां विश्लेषणम् | पदों को अलग करना | separating the Padas, words. |
| **पादम्** (सं०) (पु०द्वि०ए०व०) | चतुर्थांशम् | चतुर्थ भाग को, चौथाई को | one fourth. |
| **प्रियहितम्** (वि०) (नपुं०प्र०ए०व०) प्रियं च तत् हितं च, द्वन्द्वः | प्रियं हितकरं च | प्रिय लगने वाला और हितकारी | beneficial and pleasant. |
| **भारति** (सं०) (स्त्री०सम्बो०ए०व०) | हे सरस्वति | हे देवी सरस्वती | O goddess Saraswati. |
| **माधुर्यम्** (सं०) (नपुं०प्र०ए०व०) [मधुर+ष्यञ्] | मधुरता | मिठास | sweetness. |
| **लयसमर्थम्** (सं०) (नपुं०ए०व०) [काल-क्रिया-साम्यं लयः, स्वरस्य अपरपर्यायः] | अनुरणनविशेषः | वर्णों के समुचित स्थान, प्रयत्न और बलाघात के साथ उच्चारण की सामर्थ्य; स्पष्ट उच्चारण | capability to pronounce sounds with proper place and manner of. |

| | | | |
|---|---|---|---|
| **वदनाम्बुजे** (सं०)(नपुं०स०ए०व०) [वदनम् एव अम्बुजम्, तस्मिन्, कर्मधा०] | कमलमुखे | कमल के समान मुख में | in the lotus like mouth. |
| **वाङ्मयम्** (वि०) (नपुं०प्र०ए०व०) (तप:) [वाक्+मयम्; वाच्+मयट्] | वाचिकम् (तप:) | वाणी का, वाणी से सम्बन्धित | striving hard towards the perfection of speech. |
| **व्ययत:** (अव्य०) [व्यय+तसिल्] | उपयोगात् | खर्च करने से; व्यय (उपयोग प्रयोग) करने से | by spending, by using. |
| **शारदा** (सं०) (स्त्री०प्र०ए०व०) [शरदि भव इति] | सरस्वती पर्याया:- ब्राह्मी, भारती, भाषा, गी:, वाक्, वाणी। | विद्या की देवी | Goddess of learning. |
| **शारदाम्भोजवदना** (वि०) (स्त्री०प्र०ए०व०) [शारद+ अम्भोज+वदना, शारदम् अम्भोजम्-शारदाम्भोजम्, कर्मधा०, तत् इव वदनम् यस्या: सा, ब्र०व्री०] | शरत्कालीनं कमलम् इव मुखं यस्या: सा (सरस्वती) | शरत्कालीन कमल के समान मुखवाली | having a face like a lotus of autumn. |
| **शीतलसलिलम्** (सं०) (नपुं०प्र० ए०व०) [शीतलं च तत् सलिलम्, कर्मधा०] | शीतलं जलम् पर्याया:-सलिलम्, जलम्, वारि, नीरम्, तोयम्, अम्बु, पयस्, अप् | ठण्डा पानी | cold water. |
| **शुश्रूषा** (सं०) (स्त्री०प्र०ए०व०) [श्रु+सन्+टाप्] | श्रोतुम् इच्छा | सुनने की इच्छा | desire to listen. |
| **श्रवणम्** (सं०) (नपुं०प्र०ए०व०) [श्रु+ल्युट्] | ध्यानेन श्रवणम् | सुनना | listening. |
| **सन्निधिम्** (सं०) (पु०द्वि०ए०व०) | सामीप्यम्, उपवेशनम् | समीपता | Proximity, nearness, |
| | उपस्थिति: (सन्निधिं क्रियात्) | उपस्थित होना (समीप निवास करे) | Presence, Take one's seat, place or abode in, |
| | सत् निधिं क्रियात् | (हमारे मुख में) श्रेष्ठ निधि के रूप में निवास करे | may reside in our mouths like an excellent treasure. |

| | | | |
|---|---|---|---|
| **सर्वदा** (वि०) (स्त्री०प्र०ए०व०) [सर्वं ददाति इति सर्वद:, उपपद त०पु०+टाप्] | सर्वदात्री | सब कुछ देने वाली | bestower of everything. |
| **सर्वदा** (अव्य०) [सर्व+दाच्] | नित्यम् | सदा, हमेशा | always. |
| **स्वमेधया** (सं०) (स्त्री०तृ०ए०व०) [स्वा च सा मेधा तया कर्मधा०] | स्वबुद्ध्या | अपनी बुद्धि के द्वारा | with one's own intellect. |
| **स्वाध्यायाभ्यसनम्** (सं०) (नपुं०प्र०ए०व०) [स्वाध्याय: च अभ्यसनं च, द्वन्द्व:] | स्वाध्याय: - वेदाभ्यास:, जप: अभ्यसनम् - अभ्यास: | स्वाध्याय और अभ्यास | Perusal or study of Vedas, one's self reading and Practice. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| शारदाम्भोजवदना | = | शारद+अम्भोजवदना | वदनाम्बुजे | = | वदन+अम्बुजे |
| सन्निधिम् | = | सत्+निधिम् | कोऽपि | = | क:+अपि |
| कोशोऽयम् | = | कोश:+अयम् | व्ययतो वृद्धिमायाति | = | व्ययत:+वृद्धिमायाति |
| सञ्चयात् | = | सम्+चयात् | नास्ति | = | न+अस्ति |
| सत्यसमं तप: | = | सत्यसमम्+तप: | चन्दनरसो न | = | चन्दनरस:+न |
| ऊहापोहार्थविज्ञानम् | = | ऊह+अपोह+अर्थविज्ञानम् | चैव | = | च+एव |
| पदच्छेदस्तु | = | पद+छेद:+तु | षडेते | = | षट्+एते |
| वाङ्मयम् | = | वाक्+मयम् | तप उच्यते | = | तप:+उच्यते |
| पाठका गुणा: | = | पाठका:+गुणा: | | | |

### सन्धिकार्यम्

शिष्य:+स्वमेधया = शिष्यस्स्वमेधया

### संयोग:

| | | | | | |
|---|---|---|---|---|---|
| वृद्धिमायाति | = | वृद्धिम्+आयाति | क्षयमायाति | = | क्षयम्+आयाति |
| आचार्यात्पादमादत्ते | = | आचार्यात्+पादम्+आदत्ते | पादमादत्ते | = | पादम्+आदत्ते |

# अभ्यासः

**1. निम्नलिखितप्रश्नानाम् उत्तराणि एकपदेन उत्तरत –**

(क) का अस्माकं सन्निधिं कुर्यात्? ....................................

(ख) कोशः कथम् अस्ति? ....................................

(ग) सत्यसमं किम् अस्ति? ....................................

(घ) कीदृशी वाणी पुरुषं प्रह्लादयति? ....................................

(ङ) पाठकानां कति गुणाः श्लोके वर्णिताः? ....................................

(च) स्वस्य मेधया कः पादम् आदत्ते? ....................................

**2. अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत –**

(क) भारत्याः कोशः कीदृशः विद्यते?

....................................................................................................

(ख) के पाठकाः गुणाः सन्ति?

....................................................................................................

(ग) धियः गुणाः के के सन्ति?

....................................................................................................

(घ) शिष्यः विद्यायाः अर्जनं कथं करोति?

....................................................................................................

(ङ) कीदृशी शारदा सन्निधिं क्रियात्?

....................................................................................................

(च) वाङ्मयं तपः किम् उच्यते?

....................................................................................................

**3. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) **शारदा** सर्वदा अस्माकं समीपे वसेत्। ....................................

(ख) **भारत्याः** कोशः अपूर्वः। ....................................

(ग) मधुरभाषिणी वाणी **पुरुषं** प्रह्लादयति। ..............................

(घ) पाठकस्य **षट्** गुणाः सन्ति। ..............................

(ङ) **सत्येन** समं सुखं नास्ति। ..............................

(च) **अनुद्वेगकरं** वाक्यं वाङ्मयं तपः उच्यते। ..............................

(छ) **रागस्य** विलोमः त्यागः। ..............................

**4. अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'अपूर्वः कोशोऽयं विद्यते तव भारति।' अत्र क्रियापदं किम् ? ..............................

(ख) प्रथमे श्लाके कर्तृपदं किम्? ..............................

(ग) 'शीतला छाया' अनयोः पदयोः विशेष्यपदं किम्? ..............................

(घ) 'उद्वेगकरम्' इति पदस्य विलोमपदं पाठात् चित्वा लिखत। ..............................

(ङ) 'शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।' अस्मिन् वाक्ये 'श्रोतुम् इच्छा' इत्यर्थे किं पदं प्रयुक्तम्? ..............................

(च) 'व्ययतः' इति पदस्य विलोमपदं पाठात् चित्वा लिखत। ..............................

**5. स्तम्भद्वये लिखितानां समानार्थकशब्दानां समुचितं मेलनं कृत्वा लिखत –**

| | | | |
|---|---|---|---|
| (क) शुश्रूषा | चतुर्थांशम् | (क) शुश्रूषा | श्रोतुम् इच्छा |
| (ख) ऊहः | निवासम् | .................... | .................... |
| (ग) अपोहः | मुखम् | .................... | .................... |
| (घ) पादम् | वाणी | .................... | .................... |
| (ङ) सन्निधिम् | श्रोतुमिच्छा | .................... | .................... |
| (च) वदनम् | सरस्वती | .................... | .................... |
| (छ) वाक् | पक्षे तर्कः | .................... | .................... |
| (ज) भारती | शङ्कानिवारणम् | .................... | .................... |

**6. अत्र पठितेभ्यः श्लोकेभ्यः कानिचित् पदानि सन्ति। तेषां विशेषणानि अधः मञ्जूषायां दत्तानि। ततः उपयुक्तं विशेषणं चित्वा विशेष्येण सह योजयित्वा लिखत –**

.............................. वाणी .............................. सलिलम्

| | | | |
|---|---|---|---|
| ………………………… | छाया | ………………………… | तपः |
| ………………………… | शारदा | ………………………… | कोशः |
| ………………………… | चक्षुः | ………………………… | वाक्यम् |

**मञ्जूषा** – शीतला, वाङ्मयम्, शीतलम्, विद्यासमम्, अपूर्वः, प्रियहितम्, सर्वदा, मधुरभाषिणी

**7. समानभावमयीः पङ्क्तीः योजयत –**

| | | |
|---|---|---|
| **यथा** (i) नास्ति विद्यासमं चक्षुः। | (क) मुखकमले निवासं कुर्यात्। | (i) ग |
| (ii) व्ययतः वृद्धिमायाति। | (ख) वाङ्माधुर्यात् नान्यदस्ति प्रियत्वम्। | (ii) ……………… |
| (iii) वदनाम्बुजे सन्निधिं क्रियात्। | (ग) सर्वस्य लोचनं शास्त्रम्। | (iii) ……………… |
| (iv) मधुरभाषिणी वाणी पुरुषं प्रह्लादयति। | (घ) शिक्ष्यते सहपाठिभिः। | (iv) ……………… |
| (v) पादं सब्रह्मचारिभिः | (ङ) दत्ता भवति विस्तृता। | (v) ……………… |

**8. रेखाचित्रं पूरयत –**

(क)

**यथा**




(ख)

**यथा**



(ग)




**9. वाक्यांशं पूरयत–**

(क) व्ययतः वृद्धिमायाति

..........................................................................................

(ख) नास्ति रागसमं दुःखम्

..........................................................................................

(ग) नास्ति नास्ति विद्यासमं चक्षुः

..........................................................................................

(घ) आचार्यात्पादमादत्ते

..........................................................................................

**10. श्लोकमाश्रित्य समुचितक्रमेण अन्वयं पूरयत –**

(क) हे भारति! तव अयम् कोशः कः अपि .................................. विद्यते। (अयम्) व्ययतः वृद्धिम् .............................., सञ्चयात् च .............................. आयाति।

(ख) विद्यासमम् .................................. न अस्ति, सत्यसमम् तपः न .............................., रागसमम् .............................. न अस्ति .............................. सुखम् न अस्ति।

(ग) यत् वाक्यम् .............................. सत्यम् .............................. च (तथा) स्वाध्याय-अभ्यसनम् च एव .............................. तपः उच्यते।

**11. अधोलिखितपङ्क्तिषु स्थूलाक्षरपदानां प्रसङ्गानुसारं शुद्धम् अर्थं चिनुत –**

(क) स्वाध्यायाभ्यसनं चैव **वाङ्मयं** तपः उच्यते।

(i) साहित्यम् (ii) वाचिकम् (iii) मनोमयम्

(ख) आचार्यात् **पादम्** आदत्ते।

(i) श्लोकस्य पङ्क्तिम् (ii) चरणम् (iii) चतुर्थांशम्

(ग) **माधुर्यम्** अक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।

(i) शर्करायुक्तम् (ii) कोमलतया वर्णोच्चारणम् (iii) मधुरतायाः अभावः

(घ) **सर्वदा** सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्।

(i) सर्वं ददाति इति (ii) सर्वाधिका (iii) सर्वं वदति इति

**12. रेखाङ्कितपदानां समस्तपदं विग्रहं वा लिखत –**

(क) नास्ति <u>विद्यासमं</u> चक्षुः। ..............................................................

(ख) नास्ति <u>त्यागेन समं</u> सुखम्। ..............................................................

(ग) न तथा <u>शीतलसलिलं</u> पुरुषं प्रह्लादयति। ..............................................................

(घ) न <u>चन्दनस्य रसः</u> मानवं तथा तर्पयति। ..............................................................

(ङ) <u>सर्वदा</u> शारदा अस्माकं सन्निधिं क्रियात्। ..............................................................

(च) <u>शारदाम्भोजम् इव वदनं यस्याः सा</u> अस्माकं वदनाम्बुजे सन्निधिं क्रियात्। ..............................................................

(छ) <u>अनुद्वेगकरं</u> वाक्यं वाङ्मयं तपः उच्यते। ..............................................................

**13. पठितः पाठः। इदानीं क्रीडामः। सर्वे छात्राः वर्गद्वये विभक्ताः स्युः। वाल्मीकिवर्गः व्यासवर्गश्च। वाल्मीकिवर्गात् एकः छात्रः प्रश्नं पृच्छति व्यासवर्गात् च कश्चित् उत्तरति। पुनश्च व्यासवर्गात् प्रश्नः पृच्छ्यते वाल्मीकिवर्गात् उत्तरं दीयते। शिक्षकः अङ्कप्रदानं करोति। सर्वाधिकान् अङ्कान् लभमानः वर्गः विजेता घोष्यते।**

| **वाल्मीकिवर्गः** | **व्यासवर्गः** |
| --- | --- |
| (क) 'अम्भोजः' इति शब्दस्य पर्यायः कः? | .................................................... |
| (ख) .................................................... | 'शरत्कालीन' इति कस्य अर्थः? |
| (ग) सरस्वत्याः कोशः कथं वर्धते? | .................................................... |
| (घ) .................................................... | कया समं चक्षुर्न विद्यते? |
| (ङ) कीदृशी वाणी पुरुषं प्रसन्नं करोति? | .................................................... |
| (च) .................................................... | शारदा सर्वदा कुत्र निवसेत्? |

(छ) उद्वेगकरम् इत्यस्य कः विलोमः ? ..................................................

(ज) .................................................. सप्तमे श्लोके 'चतुर्थांशः' कस्य अर्थः ?

(झ) 'ऊहः' शब्दस्य कः विलोमः ? ..................................................

(ञ) .................................................. बुद्धेः प्रथमः गुणः कः ?

## अन्वयाः

1. शारद-अम्भोज-वदना सर्वदा शारदा अस्माकम् वदन-अम्बुजे सर्वदा सत् निधिम् सन्निधिम् क्रियात्।
2. भारति! तव अयम् कोशः कः अपि अपूर्वः विद्यते। व्ययतः वृद्धिम् आयाति सञ्चयात् च क्षयम् आयाति।
3. विद्यासमम् चक्षुः न अस्ति, सत्यसमम् तपः न अस्ति। रागसमम् दुःखम् न अस्ति, त्यागसमम् सुखम् न अस्ति।
4. यथा मधुरभाषिणी वाणी पुरुषम् प्रह्लादयति तथा शीतल-सलिलम् न, चन्दनरसः न, शीतला छाया च न (प्रह्लादयति)।
5. शुश्रूषा, श्रवणम् च एव, ग्रहणम् तथा धारणम्, ऊह-अपोह-अर्थविज्ञानम्, तत्त्वज्ञानम् च धीगुणाः (सन्ति)।
6. माधुर्यम्, अक्षरव्यक्तिः, पदच्छेदः तु सुस्वरः धैर्यम् लयसमर्थम् च एते षट् पाठकाः गुणाः (सन्ति)।
7. शिष्यः आचार्यात् पादम् आदत्ते। (शिष्यः) स्वमेधया पादम् (आदत्ते), (शिष्यः) कालेन पादम् आदत्ते, (शिष्यः) सब्रह्मचारिभिः पादम् आदत्ते।
8. यत् वाक्यम् अनुद्वेगकरम् सत्यम् प्रियहितम् च (तथा) स्वाध्याय-अभ्यसनम् च एव वाङ्मयम् तपः उच्यते।।

## योग्यताविस्तारः

**(न परीक्षाकृते)**

### (क) लेखकपरिचयः

एते श्लोकाः विभिन्नेभ्यः ग्रन्थेभ्यः सङ्कलिताः। प्रथमश्लोकद्वयं सुभाषितरत्नभाण्डागारतः तृतीयः, पञ्चमः सप्तमः च श्लोकः महाभारतात्, चतुर्थः कामन्दकीयनीतेः, षष्ठः पाणिनिशिक्षातः, अष्टमः च गीतायाः।

### (ख) भाव-विकासः

**माधुर्यम्** — श्रवणमधुरता, कोमलतया वर्णोच्चारणम्।

**अक्षरव्यक्तिः** — कोमलत्वेऽप्यक्षराणां स्पष्टतयोच्चारणम्।

**पदच्छेदः** — पदानां पार्थक्येनोच्चारणम्।

**लयसमर्थञ्च** — धैर्यं तच्च स्वरताललयादिप्रदर्शने।

**अधोलिखिताः पठनस्य दोषाः**

गीती शीघ्री शिरःकम्पी यथालिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाऽधमाः॥

**विद्याविषयकसूक्तयः**

ज्ञातिभिर्वण्ट्यते नैव चौरेणापि न नीयते।
न दानेन क्षयं याति विद्यारत्नं महाधनम्॥ 1॥
रूपयौवनसम्पन्ना विशालकुलसम्भवाः।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ 2॥

**सरस्वतीविषयकसूक्तयः**

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती॥
इदमन्धन्तमः कृत्स्नं प्रजायते भुवस्तलम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥

**उच्चारणविषयकपद्यम्**

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत्।
भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत्॥

**एवं विद्याविषयकपद्यानां सरस्वतीविषयकपद्यानां च सङ्कलनं क्रियताम्।**

**भाषा-विस्तारः**

**क.** तृतीयान्तपदं सम-सदृश-ऊन-मिश्रशब्दैः समस्यते

यथा- मात्रा समः- मातृसमः (बालकः)
मात्रा सदृशः-मातृसदृशः
माषेण ऊनम् - माषोणम्
गुडेन मिश्रः-गुडमिश्रः।

अत्र तृतीयातत्पुरुषः समासः वर्तते।

**ख.**
1. कुम्भं करोति इति कुम्भकारः
2. निशां करोति इति निशाकरः
3. प्रियं वदति इति प्रियंवदः
4. भयं करोति इति भयङ्करः
5. द्वाभ्यां पिबति इति द्विपः (हस्ती)
6. उरसा गच्छति इति उरगः (सर्पः)

**अत्र उपपदतत्पुरुषः समासः।**

## प्रहेलिका

**कस्तूरी जायते कस्मात् को हन्ति करिणां कुलम्।**
**किं कुर्यात् कातरो युद्धे मृगात् सिंहः पलायनम्॥**

अत्र चरणत्रये त्रयः प्रश्नाः चतुर्थे चरणे त्रयाणाम् एव उत्तरं वर्तते। कस्तूरी कस्मात् जायते इति प्रथमः प्रश्नः, 'करिणां कुलं कः हन्ति' इति द्वितीयः प्रश्नः, कातरः युद्धे किं कुर्यात् इति तृतीयः प्रश्नः।

## एहि हसाम

**शिक्षकः –** पृथिव्याः अक्षरेखा एका काल्पनिकी रेखा। तत्र वस्त्राणि प्रसारयितुं न शक्यन्ते इति जानन्ति वा भवन्तः?

**एकः छात्रः –** परन्तु महोदय! तत्र काल्पनिकानि वस्त्राणि तु प्रसारयितुं शक्यानि एव ननु?

द्वितीयः पाठः

# नास्ति त्यागसमं सुखम्

| | | |
|---|---|---|
| **राजीवः** | – | सोम! पश्य एतत् चित्रम्। |
| **सोमः** | – | अतीव सुन्दरम्। |
| **शोभा** | – | एतत् तु अजन्ता-गुहानां चित्रं प्रतीयते। |
| **राजीवः** | – | आम्! महाराष्ट्रप्रदेशे स्थिताः एताः अजन्ता-गुहाः एव। |
| **सौरभः** | – | अहो! दृष्टम्। अत्र तु अनेकानि जातक-चित्राणि उट्टङ्कितानि सन्ति। |
| **देविका** | – | जातकं किं भवति? |
| **राजीवः** | – | अहं न जाने! आचार्यं प्रक्ष्यामः। |
| | | (तत्र गत्वा) |
| **छात्राः** | – | गुरुवर! जातकं किं भवति? |
| **आचार्यः** | – | जातकम् अर्थात् जन्म। 'जातकमाला' इति नाम्नि पुस्तके भगवतः बुद्धस्य पूर्वजन्मनः विविधाः कथाः सन्ति। एतासु परहिताय सर्वस्वं त्यक्तव्यम् इत्येव शिक्षितम्। एतादृशीम् एकां कथां कथयामि। |
| **छात्राः** | – | एवम्! वयम् एतादृशीं कथां श्रोतुम् उत्सुकाः। |
| **आचार्यः** | – | श्रूयतां तावत्। बौद्धाचार्यस्य आर्यशूरस्य जातकमालायाः शिविजातक-आधारिता एषा कथा। |

# द्वितीयः पाठः

# नास्ति त्यागसमं सुखम्



अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत्। स बाल्यात् एव वृद्धोपसेवी, विनयशीलः, शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म। कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।

अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते।' एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।

राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपतिः शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत्-हे राजन्! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारा-मण्डलभूषितं जगत् एतत् कथमिव पश्येयं चक्षुर्हीनः।

राजा उवाच- भगवन्! भवन्मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तुम् इच्छामि। आदिश्यतां किं करवाणि? विप्रः अकथयत् - यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि येन मम लोकयात्रा निर्बाधा भवेत्। तत् श्रुत्वा राजा अचिन्तयत्- "लोके चक्षुर्दानं दुष्करमेव। नूनम् ईदृशं दानम् इच्छन् अयं याचकः केनापि प्रेरितः स्यात्! अथवा भवतु नाम किं बहु चिन्तनेन?" इति विचार्य राजा अभाषत-"भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि इति।"

राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा अमात्याः विषण्णाः भूत्वा अवदन्-महाराज! अलम् एतावता दुस्साहसेन, प्रभूतं धनमेव दीयताम्।

अथ स राजा तान् अवदत्-

**दास्यामीति प्रतिज्ञाय योऽन्यथा कुरुते मनः।**
**कार्पण्यानिश्चितमतेः कः स्यात् पापतरस्ततः॥**

नाहं स्वर्गं न मोक्षं वा कामये किन्तु आर्त्तानां परित्राणाय एव मे निश्चयः।

अस्य याच्ञा वृथा मा अस्तु इत्युक्त्वा स राजा वैद्योक्तविधिना नीलोत्पलम् इव एकं चक्षुः शनैः अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्। सः अपि तत् नेत्रं यथास्थानम् अस्थापयत्। ततो महीपालः द्वितीयं नेत्रमपि शनैः निष्कास्य तस्मै

अयच्छत्। अथ विस्मितः शक्रः अचिन्तयत्–

**अहो धृतिः! अहो सत्त्वम् !**

**अहो सत्त्वहितैषिता!**

नायं चिरं परिक्लेशम् अनुभवितुम् अर्हति। अतः प्रयतिष्ये चक्षुषोऽस्य पुनः प्रत्यारोपणाय इति।

कतिपयैः दिनैः व्रणविरोपणे जाते एकदा राजा सरोवरस्य समीपे विहरति स्म। तदा तस्य पुरतः पुनः देवराजः शक्रः उपस्थितः भूत्वा तस्य त्यागवृत्तिं प्रशंसन् अवदत्–

**शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।**

**वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्।**

एवम् उक्तेन राज्ञा नेत्रार्थं प्रार्थिते सति शक्रस्य प्रभावेण आत्मनः सत्यपुण्यबलेन च तस्य प्रथमम् एकं चक्षुः प्रतिष्ठितम् अभवत् ततः द्वितीयमपि। भूयः प्रीतः शक्रः वरम् अयच्छत्–

शतयोजनपर्यन्तं शैलानां पारं च द्रष्टुं समर्थः भव इति।

इति उक्त्वा शक्रः तत्रैव अन्तर्हितः अभवत्।

अतः सत्यमेव उक्तम्–

**धनस्य निःसारलघोः स सारो यद् दीयते लोकहितोन्मुखेन।**

**निधानतां याति हि दीयमानम् अदीयमानं निधनैकनिष्ठम्॥**



# शब्दार्थाः

| | | | |
|---|---|---|---|
| **अभीष्टानि** (वि०) (नपुं०प्र०ब०व०) (अभि+इष्+क्त) | इच्छितानि | इच्छित | desired. |
| **आशान्वितः** (वि०) (पु०प्र०ए०व०) [आशया अन्वितः, तृ०त०पु०] | आशायुक्तः | आशावान् | full of hope. |
| **कारुण्य-औदार्यादिसद्गुणोपेतः** (वि०)(पु०प्र०ए०व०) [कारुण्यम् औदार्यम् च आदौ येषाम् तैः सद्गुणैः उपेतः, तृ०त०पु०] | करुणा-उदारतादि-सद्गुणैः युक्तः | करुणा, उदारता आदि सद्गुणों से युक्त | endowed with the qualities of compassion and generosity etc. |
| **कार्पण्यम्** (सं०) (नपुं०प्र०ए०व०) [कृपण+घञ्, कृपणस्य भावः] | हृदयस्य दुर्बलता | हृदय की दुर्बलता | Weakness of mind. |
| **चक्षुः** (सं०-चक्षुष्) (नपुं०प्र०ए०व०) | नेत्रम् | आँख | eye. |
| **जनकल्याणकर्मसु** (सं०) (नपुं० स०ब०) [जनानां कल्याणम्, जनकल्याणस्य कर्मसु, ष०त०पु०] | लोकहितस्य कार्येषु | मानवहित के कर्मों में | in the deeds beneficial for humanity. |
| **निधनैकनिष्ठम्** (वि०) (पु०प्र०ए०व०) [निधनम् एका निष्ठा यस्य तत्, ब०व्री०] | विनाशः एव भाग्यं यस्य तत् (धनम्) | विनाश ही जिसकी नियति है (ऐसा धन) | (wealth) of which destruction is the ultimate destiny. |
| **निधानताम्** (सं०) (स्त्री०द्वि०ए०व०) [नि+धा+ल्युट्+तल्] | सम्पन्नताम् | सम्पन्नता, समृद्धि | stored, treasure. |
| **नीलोत्पलम्** (सं०) (नपुं०प्र०ए०व०) [नीलं च तत् उत्पलम्, कर्मधा०] | नीलं कमलम् | नीला कमल | blue lotus. |
| **निरासक्तिम्** (सं०) (स्त्री०द्वि०ए०व०) [निर्+आ+सञ्ज्+क्तिन्] | वैराग्यम् | वैराग्य | detachment |
| **प्रीतः** (वि०) (पु०प्र०ए०व०)[प्री+क्त] | प्रहृष्टः | प्रसन्न | pleased. |
| **बहुजन्मार्जितपुण्यफलैः** (सं०) (नपुं०ब०व०) [बहूनि च तानि जन्मानि कर्मधा०, बहुजन्मसु अर्जितम्, स०त०पु० बहुजन्मार्जितं च तत् पुण्यम्, कर्मधा० बहुजन्मार्जितपुण्यस्य फलैः, ष०त०पु०] | अनेक-जन्म-सञ्चितैः फलैः | अनेक (पूर्व) जन्मों में अर्जित पुण्यों से संचित फलों के द्वारा | as a result of virtuous deeds done in many (previous) births. |

| | | | |
|---|---|---|---|
| **बोधिसत्त्वः** (सं०) (पु०प्र०ए०व०) [बोधि इति ज्ञानम्, सत्त्वम् इति प्राणी, ज्ञानाय यः प्रयतते सः बोधिसत्वः] | प्रबुद्धः | ज्ञानप्राप्ति के लिए प्रयत्नशील प्राणी | Bodhisattva is who tries to obtain knowledge. |
| **ब्रह्माण्डम्** (सं०) (नपुं०प्र०ए०व०) [ब्रह्मणः अण्डम्, ष०त० पु०] | सम्पूर्णा सृष्टिः | समस्त सृष्टि | whole universe. |
| **याच्ञा** (सं०) (स्त्री०प्र०ए०व०) [याच्+नङ्+टाप्] | याचना | प्रार्थना | request. |
| **लोकयात्रा** (सं०) (स्त्री०प्र०ए०व०) [लोकस्य यात्रा, ष०त०पु०] | सांसारिक-जीवनयात्रा | सांसारिक जीवन यात्रा | journey of the worldly life.. |
| **विचारणाम्** (सं०) (स्त्री०द्वि०ए०व०) [वि+चर्+णिच्+ल्युट्+टाप्] | धारणाम् | विचार | thought. |
| **विरलसङ्ख्याम्** (सं०) (स्त्री०द्वि०ए०व०) [विरला च सा सङ्ख्या ताम्, कर्मधा०] | न्यूनसङ्ख्याम् | कम संख्या | areft; of lesser number. |
| **विषण्णाः** (वि०) (पु०प्र०ब०व०) [वि+सद्+क्त] | हताशाः, खिन्नाः | दुःखी, व्यथित | disturbed, unhappy. |
| **विस्मिताः** (वि०) (पु०प्र०ब०व०) [वि+स्मि+क्त] | चकिताः | आश्चर्य में पड़े हुए | astonished, surprised. |
| **वैद्योक्तविधिना** (सं०)(पु०तृ०ए०व०) [वैद्येन उक्तः तृ०त०पु०; वैद्योक्तः च असौ विधिः तेन, कर्मधा०] | चिकित्सकेन निर्दिष्टमार्गेण | वैद्य द्वारा बताई गयी विधि से | by the method told by the physician. |
| **व्रणविरोपणे** (सं०) (नपुं०स०ए०व०) [व्रणस्य विरोपणे, ष०त०पु०] | घाते स्वस्थे जाते | घाव के भरने पर | on healing of the wound. |
| **शाश्वतः** (वि०) (पु०प्र०ए०व०) | नित्यः, सनातनः | नित्य, सदा रहने वाला | Omnipresent. |
| **शास्त्रपारङ्गतः** (वि०)(पु०प्र०ए०व०) [शास्त्राणाम् शास्त्रेषु पारङ्गतः ष०स०त०पु०] | शास्त्रेषु निष्णातः | शास्त्रों में दक्ष | expert in shastras. |
| **सत्त्वहितैषिता** (सं०)(स्त्री०प्र०ए०व०) [सत्त्वानां हितैषिता, ष०त०पु०] | प्राणिनां कल्याणस्य इच्छा | जीवों के कल्याण की इच्छा करना | desire for the welfare of the living beings. |
| **समन्ततः** (अव्य०) | परितः | चारों ओर | all the sides. |

# इदमपि जानन्तु

## सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| औदार्यादिसद्गुणोपेत: | = | औदार्य+आदिसत्+गुण+उपेत: | देशान्तरेभ्योऽपि | = | देशान्तरेभ्य:+अपि |
| गात्रेष्वपि | = | गात्रेषु+अपि | चक्षुर्हीन: | = | चक्षु:+हीन: |
| चक्षुर्दानम् | = | चक्षु:+दानम् | योऽन्यथा | = | य:+अन्यथा |
| पापतरस्तत: | = | पापतर:+तत: | वृद्धोपसेवी | = | वृद्ध+उपसेवी |
| वैद्योक्तविधिना | = | वैद्य+उक्तविधिना | चक्षुषोऽस्य | = | चक्षुष:+अस्य |
| ततो महीपाल: | = | तत:+महीपाल: | प्रत्यारोपणाय | = | प्रति+आरोपणाय |
| शक्रोऽहम् | = | शक्र:+अहम् | नेत्रार्थम् | = | नेत्र+अर्थम् |
| तदुच्यताम् | = | तत्+उच्यताम् | | | |

## सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| रत:+असौ | = | रतोऽसौ | सन्तुष्ट:+अभवत् | = | सन्तुष्टोऽभवत् |
| जना:+तम् | = | जनास्तम् | स:+राजा | = | स राजा |
| दानवीरा:+सौभाग्यशालिन: | = | दानवीरास्सौभाग्यशालिन: | तत:+महीपाल: | = | ततो महीपाल: |
| चक्षु:+शनै:+अक्षतम् | = | चक्षुश्शनैरक्षतम् | आगत:+अस्मि | = | आगतोऽस्मि |
| भवत्+मनोरथ: | = | भवन्मनोरथ: | लोकहित+उन्मुखेन | = | लोकहितोन्मुखेन |
| दास्यामि+इति | = | दास्यामीति | सन्तुष्ट:+अभवत् | = | सन्तुष्टोऽभवत् |
| निधन+एकनिष्ठम् | = | निधनैकनिष्ठम् | | | |

## संयोग:

| | | | | | |
|---|---|---|---|---|---|
| द्वयमेव | = | द्वयम्+एव | प्रथममेकम् | = | प्रथमम्+एकम् |
| द्वितीयमपि | = | द्वितीयम्+अपि | सत्यमेव | = | सत्यम्+एव |

# अभ्यास:

1. **एकपदेन उत्तरत –**

(क) भगवान् बोधिसत्त्व: कथं शिवीनां राजा अभवत्? ......................................

(ख) सकलं ब्रह्माण्डं कीदृशं सञ्जातम्? ......................................

(ग) के सौभाग्यशालिन: यान् याचका: शरीरस्य अङ्गानि याचन्ते? ......................................

(घ) राजा वैद्योक्तविधिना नीलोत्पलम् इव किम् अक्षतम् उदपाटयत्? ..........................................

(ङ) राजा कस्य समीपे विहरति स्म? ..........................................

(च) राज्ञः काम् आकर्ण्य देशान्तरेभ्योऽपि जनाः आयान्ति स्म? ..........................................

(छ) भूयः प्रीतः शक्रः किम् अयच्छत्? ..........................................

**2. पूर्णवाक्येन उत्तरत –**

(क) बोधिसत्त्वः शैशवात् एव कीदृशः आसीत्?

..........................................................................................

(ख) शिवेः राज्ये याचकाः किं लब्ध्वा सन्तुष्टाः अभवन्?

..........................................................................................

(ग) नेत्रहीनयाचकस्य रूपं धृत्वा शक्रः बोधिसत्त्वं किम् अवदत्?

..........................................................................................

(घ) सकलं ब्रह्माण्डं किं ज्ञात्वा व्याकुलं जातम्?

..........................................................................................

(ङ) राजा प्रीत्या याचकाय किं समर्पितवान्?

..........................................................................................

(च) शक्रः किं वरम् अयच्छत्?

..........................................................................................

**3. अधोलिखित-कथनेषु स्थूलपदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं क्रियताम्-**

**यथा**– राजा **नगरस्य** समन्ततः दानशालाः अकारयत्।

राजा **कस्य** समन्ततः दानशालाः अकारयत्?

(क) अभीष्टवस्तूनि प्राप्य **याचकाः** सन्तुष्टाः आसन्। ..........................................

(ख) **दानशालासु** विचरन् राजा अचिन्तयत्। ..........................................

(ग) राजा पुत्रवत् **प्रजाः** पालयति स्म। ..........................................

(घ) स राजा **तान्** अकथयत्। ..........................................

(ङ) राजा **याचकेभ्यः** दानं ददाति स्म। ..........................................

**4. अधोलिखित-प्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'शक्रः तत्रैव अन्तर्हितः अभवत्।' अस्मिन् वाक्ये विशेषणपदं किम्?

(ख) 'सत्यबलेन तस्य चक्षुः प्रतिष्ठितम् अभवत्।' अस्मिन् वाक्ये कर्तृपदम् किम्?

(ग) 'जनाः तं देशम् आयान्ति स्म।' अस्मिन् वाक्ये विशेष्यपदं किम्?

(घ) 'अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते।' अत्र 'परितोषः' अस्मिन् अर्थे किं पदं प्रयुक्तम्?

(ङ) 'शतयोजनपर्यन्तं शैलानां पारं च द्रष्टुं समर्थः भव।' अत्र 'असमर्थः' अस्य विलोमपदं किं प्रयुक्तम्?

(च) 'बोधिसत्त्वः शिवीनां राजा अभवत्।' अत्र क्रियापदं किम्?

**5. समुचितम् अर्थं मेलयत –**

| | | |
|---|---|---|
| (क) शैलानाम् | ...................................... | नेत्रम् |
| (ख) शक्रः | ...................................... | स्वस्य |
| (ग) आत्मनः | ...................................... | पर्वतानाम् |
| (घ) चक्षुः | ...................................... | इन्द्रः |
| (ङ) उत्पाट्य | ...................................... | भूपतिः |
| (ङ) महीपालः | ...................................... | निष्कास्य |

**6. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत –**

(क) स बाल्यात् एव वृद्धोपसेवी, विनयशीलः शास्त्रपारङ्गतः च आसीत्।

(ख) राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म।

(ग) कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्।

(घ) मम अर्थिनः तु धनलाभमात्रेण सन्तोषं भजन्ते।

(ङ) अथ कदाचित् दानशालासु विचरन् स राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसङ्ख्यां विलोक्य अचिन्तयत्

(च) जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म।

(छ) तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत्।

(ज) अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत्।

**7. प्रसङ्गानुसारम् अर्थं चिनुत –**

(क) राज्ञः दानशीलताम् <u>आकर्ण्य</u> जनाः तं देशम् आयान्ति स्म।

(i) श्रुत्वा (ii) मत्वा (iii) प्राप्य

(ख) राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा अमात्याः विषण्णाः भूत्वा अवदन्।

(i) विमुखाः (ii) खिन्नाः (iii) प्रसन्नाः

(ग) यदि भवान् प्रीतः, तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि।

(i) श्रोत्रस्य (ii) गात्रस्य (iii) नेत्रस्य

(घ) एकदा राजा सरोवरस्य समीपे विहरति।

(i) तडागस्य (ii) नगरस्य (iii) नद्याः

(ङ) न अयं चिरं परिक्लेशम् अनुभवितुम् अर्हति।

(i) एषः (ii) सः (iii) तत्

(च) सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्।

(i) सम्पूर्णम् (ii) परिपूर्णम् (iii) गभीरम्

**8. अधः केचन विग्रहाः दत्ताः। कोष्ठकात् चित्वा क्रमानुसारं समस्तपदानि लिखत–**

| समास-विग्रहाः | समस्तपदानि | |
|---|---|---|
| (क) निर्गता बाधा यस्याः सा | ............ | वृद्धोपसेवी |
| (ख) धान्येन समृद्धाः | ............ | विनयशीलः |
| (ग) विनयः शीलं यस्य सः | ............ | धान्यसमृद्धाः |
| (घ) वृद्धान् उपसेवितुं शीलं यस्य सः | ............ | निर्बाधा |
| (ङ) शक्रस्य प्रभावेण | ............ | शक्रप्रभावेण |
| (च) शास्त्रेषु पारङ्गतः यः सः | ............ | शास्त्रपारङ्गतः |

**9. अधोलिखितानां सूक्तीनाम् अधः सम्बद्धाः पाठान्तर्गतपङ्क्तयः लिख्यन्ताम् –**

(क) न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम्।

............

(ख) हुतं च दत्तं च सदैव तिष्ठति।

............

(ग) क्षयम् आयाति सञ्चयात्।

............

**10. अधोलिखितानां वाक्यानां सम्मुखे दत्तेषु भावेषु उचित-भावस्य सम्मेलनं क्रियताम् -**

| वाक्यानि | भावः |
|---|---|
| (क) असौ पुत्रवत् प्रजाः पालयति स्म। | दानवीरता |
| (ख) सः नगरस्य समन्ततः दानशालाः अकारयत्। | दुःखम् |
| (ग) ममार्थिनस्तु धनलाभमात्रेण सन्तोषं लभन्ते। | स्नेहः |
| (घ) राज्ञः नेत्रदाननिश्चयं ज्ञात्वा अमात्याः विषण्णाः जाताः। | उदारता |
| (ङ) अहं भवते चक्षुर्द्वयमेव प्रयच्छामि। | निराशा |

## अन्वयः

1. दास्यामि इति प्रतिज्ञाय यः मनः अन्यथा कुरुते कार्पण्य-अनिश्चितमतेः ततः पापतरः कः स्यात्?
2. राजर्षे! अहम् देवेन्द्रः शक्रः त्वत् समीपम् उपागतः अस्मि। वरम् वृणीष्व यत् इच्छसि तत् उच्यताम्।
3. निःसारलघोः धनस्य सः सारः यत् लोकहित-उन्मुखेन दीयते। दीयमानम् (धनम्) निधानताम् हि याति। अदीयमानम् (धनम्) निधन-एकनिष्ठम् (भवति)।

## योग्यताविस्तारः

**(न परीक्षाकृते)**

**(क) ग्रन्थ-परिचयः**

इयं कथा श्रीमदार्यशूरेण विरचितायाः जातकमालायाः सङ्गृहीता अस्ति। अस्मिन् ग्रन्थे भगवतः बुद्धस्य पूर्वजन्मनां कथाः सन्ति।

जातक (जात + कन्) अर्थात् उत्पन्नः।

**बोधिसत्त्वः**

बोधि-ज्ञानम्। सत्त्वम्-मनः। ज्ञानाय यः प्रयतते सः बोधिसत्त्वः।

**दानमहिमा**

(क) दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति॥

(ख) गौरवं प्राप्यते दानान्न तु वित्तस्य सञ्चयात्।
स्थितिरुच्चैः पयोदानां पयोधीनामधः स्थितिः॥

(ग) दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः॥

# प्रहेलिका

**कृष्णमुखी न मार्जारी द्विजिह्वा न च सर्पिणी।**
**पञ्चभर्त्री न पाञ्चाली यो जानाति स पण्डितः॥**

मुखभागः कृष्णवर्णः वर्तते किन्तु कृष्णवर्णा मार्जारी नास्ति, द्वे जिह्वे भवतः किन्तु सर्पिणी नास्ति, पञ्च पतयः सन्ति किन्तु पाञ्चाली (द्रौपदी) नास्ति। तर्हि किम् अस्ति? यः जानाति सः पण्डित एव।

# एहि हसाम

एकदा चत्वारः जनाः कुत्रचित् एकं लघु-आयोजनं (पार्टी) कर्तुं गतवन्तः। ते आपणतः चतुष्टयं त्रिकोणपिष्टकं स्वीकृतवन्तः। यदा ते आनन्दायोजनं कर्तुम् उद्युक्ताः आसन् तेषां स्मरणम् आगतं यत् ते इदानीं पर्यन्तं शीतपेयं (पेप्सी इत्यादिकं) न स्वीकृतवन्तः। ते विचारितवन्तः यत् तेषु कश्चित् पुनः विपणिं गत्वा शीतलपेयं स्वीकुर्यात्। तेषु एकः गन्तुं स्वीकृतिं दत्तवान्। किन्तु यावत् अहं न आगच्छामि तावत् कोऽपि एकमपि पिष्टकं न खादेत् इति सः अवदत्। सर्वे अङ्गीकृतवन्तः। सः गतः। एकहोरायावत् कालः गतः, सः न आगतवान्। द्वितीय-होरा अपि गतः, पुनरपि सः न आगतवान्। सर्वे विचारितवन्तः यत् सम्भवतः सः विस्मृतवान् शीतलपेयम् आनेतुम्, अतः इदानीं वयं स्वं पिष्टकं भुञ्जेम। अतः यदा ते पिष्टकं भोक्तुं तत् हस्ते स्वीकृतवन्तः तदैव चतुर्थः वृक्षस्य पृष्ठतः बहिः आगतः उक्तवान् च यदि भवन्तः पिष्टकं खादिष्यन्ति तर्हि अहं शीतलपेयम् आनेतुं न गच्छामि।

तृतीयः पाठः

# रमणीया हि सृष्टिः एषा



**( विद्यालस्य प्राङ्गणे रङ्गमञ्चः। नटः नटी च प्रविशतः। )**

**उभौ** – (करौ बद्ध्वा) नमः सर्वेभ्यः। अस्माकं विद्यालयस्य प्राङ्गणे भवतां हार्दिकम् अभिनन्दनम्।

**नटः** – अद्य जूनमासस्य पञ्चमी तारिका।

**नटी** – आम् सत्यम्। अद्य तु विश्वपर्यावरणदिवसः।

**उभौ** – एवम् । अस्मिन् शुभावसरे वयं रम्यां सृष्टिम् अधिकृत्य एकस्याः लघुनाटिकायाः प्रस्तुतिं करिष्यामः।

**नटी** – इदं तु सत्यमेव यत् इयं सृष्टिः अति सौन्दर्यमयी अस्ति।

**नटः** – अतः परस्परं कलहेन विवादेन एषा दूषिता न कर्त्तव्या।

**नटी** – सर्वेषाम् एव अत्र महत्त्वं विद्यते।

**नटः** – कोऽपि इह संसारे कनिष्ठः वरिष्ठः वा नास्ति।

**उभौ** – सर्वे समानाः।

**नटी** – प्रकृतिः माता सर्वान् स्नेहेन परिपालयति।

**उभौ** – अतः प्रस्तूयते लघुनाटिका '**रमणीया हि सृष्टिः एषा।**'

(गच्छतः)

तृतीयः पाठः

# रमणीया हि सृष्टिः एषा

[**स्थानम्** – सरस्तीरम्! समयः – प्रभातवेला। तत्र राजहंसः हंसी च विहरतः। नेपथ्ये काकध्वनिः श्रूयते।]

**राजहंसः** – अये! किन्तु खलु सरस्तीरे विहरति मयि केनापि कर्कशैः 'का का' शब्दैः वातावरणम् आकुलीक्रियते?



**राजहंसी** – भर्तः! काकात् अन्यः को भवितुमर्हति? अस्य वर्णः अपि कृष्णः, कर्म अपि कृष्णम्। मेध्यम् अमेध्यं सर्वमेव भक्षयति। कर्णकटुशब्दैः – – –

**काकः** – (प्रविश्य, सक्रोधम्) आः! किम् उक्तवती भवती? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः? श्रीवासुदेवस्य वर्णः कीदृशः? मुग्धे! अहं तु अतीव कर्तव्यपरायणः। प्रभाते 'का–का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।

**राजहंसः** – हुं! किमनेन? एतत् कार्यं तु कुक्कुटोऽपि करोति।

**काकः** – (विहस्य) कुक्कुटः। अरे अद्य कुतः कुक्कुटाः नगरेषु। अहमेव सर्वत्र सुलभः।

**राजहंसी** – भोः भो वाचाल! स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि?

**काकः** – अहो अज्ञानं भवत्याः! अरे! यस्य गृहस्य भित्तौ स्थित्वा आलपामि, जनाः प्रियस्य आगमनसङ्केतं मत्वा हृष्यन्ति। किं बहुना! अहं तु एतादृशः सत्यप्रियः यत् मातरः शिशून् कथयन्ति–"अनृतं वदसि चेत् काकः दशेत्।" अस्माकम् ऐक्यं तु जगत्प्रसिद्धम्। सर्वथा जागरूकोऽहं छात्राणां कृते आदर्शः एव। किं न श्रुतं काकचेष्टा, बकध्यानम्---

**राजहंसः** – विरम विरम! श्रूयतां यत् जनैः सर्वदा गीयते तव विषये–

**काकस्य गात्रं यदि काञ्चनस्य माणिक्यरत्नं यदि चञ्चुदेशे।**
**एकैकपक्षे ग्रथितं मणीनां तथापि काको न तु राजहंसः॥ 1॥**

अपि च

**हंस श्वेतः बकः श्वेतः को भेदः बकहंसयोः।**
**नीरक्षीरविवेके तु हंसो हंसः बको बकः॥ 2॥**

**बकः** – (प्रविश्य, स्वपक्षौ अवधूय) कथं माम् अपि अधिक्षिपसि? किं ते महत्त्वम्?

– वर्षर्तौ तु मानसं पलायसे। अहम् एव अत्र वृष्टेः अभिनन्दनं करोमि। कीदृशी तव मैत्री? आपत्काले सरांसि

त्यक्त्वा दूरं व्रजसि। वस्तुतः अहमेव शीतले जले बहुकालपर्यन्तम् अविचलं ध्यानमग्नः 'स्थितप्रज्ञ' इव तिष्ठामि। दुग्धधवला मे पक्षाः। न जाने कथं माम् अपरिगणयन्तः जनाः चित्रवर्णम् अहिभुजं मयूरं 'राष्ट्र-पक्षी' इति मन्यन्ते। अहमेव योग्यः ........

**मयूरः** – (प्रविश्य साट्टहासम्) सत्यं सत्यम्। अहमेव राष्ट्रपक्षी। को न जानाति तव ध्यानावस्थाम्? मौनं धृत्वा वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्! अवमानितं खलु सर्वं पक्षिकुलं त्वया।

**काकः** – रे सर्पभक्षक! नर्तनात् अन्यत् किम् अपरं जानासि?

**मयूरः** – श्रूयतां श्रूयताम्! मम नृत्यं तु प्रकृतेः आराधना। पश्य! चारुवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम्। मम केकारवं श्रुत्वा कोकिलः अपि लज्जते। मम शिरसि राजमुकुटमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः।

**कोकिलः** – (प्रविश्य) रे मयूर! अलम् अतिविकत्थनेन। मधुमासे आम्रवृक्षे स्थित्वा यदा अहं पञ्चमस्वरेण गायामि तदा श्रोतारः कथयन्ति–

**काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।**
**वसन्तसमये प्राप्ते काकः काकः पिकः पिकः॥ 3॥**

**काकः** – रे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः!

**राजहंसः** – शान्तं शान्तम्। अहमेव नीरक्षीरविवेकी पक्षिणां राजा!

**बकः** – धिक् युष्मान्! अहमेव सर्वशिरोमणिः!

(ततः प्रकृतिमाता प्रविशति)



**प्रकृतिः** – (सस्नेहम्) अलम् अलं मिथः कलहेन। अहं प्रकृतिः एव युष्माकं जननी। यूयं सर्वे एव मम प्रियाः। सर्वेषामेव महत्त्वं विद्यते यथासमयम्। सर्वैः एव मे शोभा। न तावत् कलहेन समयं वृथा यापयेत। मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम्। सर्वे मिलित्वा गायन्ति–

**आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिकैः।**
**स चेन्निरर्थकं नीतः का नु हानिस्ततोऽधिका॥ 4॥**

**अधुना रमणीया हि सृष्टिरेषा जगत्पतेः।**
**जीवाः सर्वेऽत्र मोदन्तां भावयन्तः परस्परम्॥ 5॥**

# शब्दार्थाः

| | | | |
|---|---|---|---|
| **अधिक्षिपसि** (क्रि०) (म०पु०ए० व०) [अधि+क्षिप्+लट्] | तिरस्करोषि | अपमानित करते हो | you insult. |
| **अधिगृह्य** (अव्य०) [अधि+ग्रह्+ ल्यप्] | गृहीत्वा | पकड़कर | having caught. |
| **अनृतम्** (वि०) (नपुं०प्र०ए०व०) [न ऋतम्, नञ् त०पु०] | मिथ्या, असत्यम् | असत्य, झूठ | false. |
| **अपरिगणयन्तः** (वि०) (पु०प्र० ब०व०) [(परि+गण्+शतृ) न परिगणयन्तः, नञ् त०पु०] | अमन्यमानाः | न मानते हुए | not considering, ignoring. |
| **अमेध्यम्** (वि०)(नपुं०प्र०ए०व०) [न मेध्यम्, नञ् त०पु०] | अशुद्धम् | अशुद्ध, अपवित्र | impure, dirty. |
| **श्रूयताम्** (क्रि०) (प्र०पु०ए०व०) [श्रु+यक्+लोट्] | आकर्ण्यताम् | सुनिए | please, listen. |
| **अवधूय** (अव्य०)[अव+धू+ल्यप्] | कम्पयित्वा | हिला करके | having shaken, after flapping (the wings). |
| **अवमानितम्** (वि०) नपुं०प्र०ए०व० [अव+मन्+क्त] | तिरस्कृतम् | अपमानित किया गया | humiliated. |
| **अहिभुजम्** (सं०)(पु०द्वि०ए०व०) [अहिं भुङ्क्ते यः तम्, उप०त०पु०] | गरुडम् | गरुड़ को | to Garud (eagle the vehicle of Lord Vishnu). |
| **आकुलीक्रियते** (नामधातुः क्रिया) (प्र०पु०ए०व०) [आकुल+च्वि+कृ+यक्] | व्याकुलीक्रियते | व्याकुल किया जाता है | being perturbed. |
| **आयुषः** (सं०) (नपुं०ष०ए०व०) [आयुष्-मूलशब्दः] | वयसः | आयु का | of the age. |
| **ऐक्यम्** (सं०) (नपुं०प्र०ए०व०) [एक्+ष्यञ्] | एकता | एकता, समरूपता | oneness, unity. |
| **कनिष्ठः** (वि०) (पु०प्र०ए०व०) [कन्+इष्ठन्] | सर्वेभ्यः लघुः | सबसे छोटा | Youngest, smallest. |

| | | | |
|---|---|---|---|
| **कर्कशः** (वि) (पु०प्र०ए०व०) | निष्ठुरः | क्रूर, कठोर | Harsh, hoarse. |
| **काकचेष्टा** (सं०)(स्त्री०प्र०ए०व०) [काकस्य चेष्टा, ष०त०पु०] | काकप्रयत्नः, काकप्रयासः (त्वरितक्रिया) | कौवे जैसी सक्रियता | Bodily efforts of crow. |
| **केकारवम्** (सं०)(पु०द्वि०ए०व०) [केकायाः रवः तम्, ष०त०पु०] | मयूरस्य ध्वनिम् | मोर की आवाज को | to peacock's warble (sound of the peacock). |
| **क्वणितैः** (वि०)(पु०तृ०ब०व०) [क्वण्+क्त] | अस्पष्टस्वरैः | अस्पष्ट स्वरों से | by indistinct sounds. |
| **गात्रम्** (सं०) (नपुं०प्र०ए०व०) | शरीरम् | शरीर | Body. |
| **ग्रथितम्** (वि०)(नपुं०प्र०ए०व०) [ग्रन्थ्+क्त] | जटितम् | गुँथा हुआ | studded. |
| **चञ्चुदेशे** (सं०)(पु०स०ए०व०) [चञ्चोः देशे (स्थाने), ष०त०पु०] | चञ्चुभागे | चोंच के हिस्से में | in the part of the beak. |
| **चारुवर्तुलचन्द्रिकाशोभितानाम्** (वि०) (पु०ष०ब०व०) [चारुभिः वर्तुलाभिः चन्द्रिकाभिः शोभितानाम्, तृ०त०पु०] | सुन्दर – गोलार्धचन्द्राकारैः शोभितानाम् | सुन्दरगोलार्ध चन्द्राकार से सुशोभितों के | adorned with beautiful round and half moons. |
| **नीरक्षीरविवेके** (सं०) (पु०स०ए०व०) [नीरञ्च क्षीरञ्च नीरक्षीरे (द्वन्द्वः) तयोः विवेकः, ष०त०पु०] | जलस्य दुग्धस्य च भेदस्य बुद्धिः | सूक्ष्मबुद्धि, विवेचनात्मक बुद्धि | discriminating power (a colloquial use). |
| **नेपथ्यम्** (सं०) (नपुं०) प्र०ए०व०) | परिधान कक्षः, रङ्गमञ्चस्य पृष्ठः भागः | परदे के पीछे का भाग जहाँ नाटक के पात्र अपनी वेशभूषा धारण करते हैं | the retiring room where the characters dress up. |
| **पञ्चमस्वरेण** (सं०)(पु०तृ०ए०व०) [पञ्चमः च स असौ स्वरः तेन, कर्मधा०] | सङ्गीतस्य पञ्चमः स्वरः | सरगम का पाँचवा सुर | fifth musical note. |
| **परभृत्** (सं०) (पु०प्र०ए०व०) [परैः भ्रियते, उप०त०पु०] | अन्यैः पाल्यते | दूसरों द्वारा पालित (कोयल) | brought up by others. |
| **पलायसे** (क्रि०)(म०पु०ए०व०) [परा 'र' स्थाने 'ल' अय्+लट्] | धावसि | भागते हो | you run away. |

| | | | |
|---|---|---|---|
| **पिच्छानाम्** (सं०) (पु०ब०व०) | मयूरस्य पक्षाणाम् | मोर पंखों का | of the peacock's plume. |
| **प्रबोधयामि** (क्रि०) (उ०पु०ए०व०) [प्र+बुध्+णिच्+लट्] | जागरणं सम्पादयामि | जगाता हूँ | is being a wakened by me. |
| **प्राङ्गणम्** (सं०)(नपुं०प्र०ए०व०) [प्रकर्षेण आङ्गनं गमनं यत्र] | आङ्गनम् | आँगन | courtyard. |
| **भावयन्तः** (क्रि०)(पु०प्र०ब०व०) [भू+णिच्+शतृ] | सद्भावयन्तः | सद्भावना रखते हुए | having good feelings. |
| **मिथः** (अव्य) | परस्परम् | आपस में | amongst. |
| **मेध्यम्** (वि०) (नपुं०प्र०ए०व०) [मेध्+ण्यत्, मेधायै हितं यत् वा] | विशुद्धम् | शुद्ध, स्वच्छ | pure, clear. |
| **यापयेत** (क्रि०) (म०पु०ब०व०) [या+णिच्+विधिलिङ्] | कालक्षेपं कुर्यात | बिताएँ | should spend. |
| **रमणीया** (वि०)(स्त्री०प्र०ए०व०) [रम्+अनीयर्+टाप्] | आनन्दप्रदा, मनोहरा | मनोहारी | delightful, pleasant. |
| **वराकान्** (वि०) (पु०द्वि०ब०व०) | दयनीयान्, मन्दभाग्यान् | बेचारों को, अभागों को | to the pitiable ones, to the unlucky ones. |
| **वरिष्ठः** (वि०) (पु०प्र०ए०) [उरु+इष्ठन्] | सर्वोत्तमः | अत्यन्त श्रेष्ठ, प्रमुख | superior most. |
| **वाचाल** (वि०) (पु०प्र०ए०व०) [वाच्+आलच्] | प्रगल्भः | बातूनी | talkative. |
| **विकत्थनेन** (सं०)(पु०तृ०ए०व०) | आत्मप्रशंसया, आत्मश्लाघया | आत्मप्रशंसा के द्वारा | through self-praise, through egoism. |
| **विहस्य** (अव्य०)[वि+हस्+ल्यप्] | हसित्वा | हँसकर | laughingly. |
| **सृष्टिः** (सं०) (स्त्री०प्र०ए०व०) [सृज्+क्तिन्] | विश्वम्, निखिलजगत् | संसार की रचना | creation. |
| **स्थितप्रज्ञः** (वि०) (पु०प्र०ए०व०) [स्थिता प्रज्ञा यस्य सः, ब०व्री०] | स्थिरबुद्धिः | निश्चित बुद्धि वाला | steady minded, firm. |

# इदमपि जानन्तु

## सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| सरस्तीरम् | = | सर:+तीरम् | केनापि | = | केन+अपि |
| को भवितुमर्हति | = | क:+ भवितुमर्हति | कुक्कुटोऽपि | = | कुक्कुट:+अपि |
| जागरूकोऽहम् | = | जागरूक:+अहम् | एकैकपक्षे | = | एक+एकपक्षे |
| काको न | = | काक:+न | को भेद | = | क:+भेद |
| हंसो हंस: | = | हंस:+हंस: | वर्षर्तौ | = | वर्षा+ऋतौ |
| ध्यानावस्थाम् | = | ध्यान+अवस्थाम् | अपरं जानासि | = | अपरम्+जानासि |
| एकोऽपि | = | एक:+अपि | स चेन्निरर्थकम् | = | स:+चेत्+निरर्थकम् |
| हानिस्ततोऽधिका | = | हानि:+तत:+अधिका | सृष्टिरेषा | = | सृष्टि:+एषा |
| सर्वेऽत्र | = | सर्वे+अत्र | | | |

## सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| काकात्+अन्य: | = | काकादन्य: | यदि+अहम् | = | यद्यहम् |
| वर्ण:+अपि | = | वर्णोऽपि | प्रियस्य+आगमनसङ्केतम् | = | प्रियस्यागमनसङ्केतम् |
| आदर्श:+एव | = | आदर्श एव | एव+अत्र | = | एवात्र |
| वृष्टे:+अभिनन्दम् | = | वृष्टेरभिनन्दनम् | वस्तुत:+अहम् | = | वस्तुतोऽहम् |
| नर्तनात्+अन्यत् | = | नर्तनादन्यत् | विधात्रा+एव+अहम् | = | विधात्रैवाहम् |
| यदा+अहम् | = | यदाहम् | धिक्+युष्मान् | = | धिग्युष्मान् |
| प्रकृति:+एव | = | प्रकृतिरेव | सर्वै:+एव | = | सर्वैरेव |
| मिलित्वा+एव | = | मिलित्वैव | | | |

## संयोग:

| | | | | | |
|---|---|---|---|---|---|
| भवितुमर्हति | = | भवितुम्+अर्हति | सर्वमेव | = | सर्वम्+एव |
| किमनेन | = | किम्+अनेन | अहमेव | = | अहम्+एव |
| किमपि | = | किम्+अपि | राजमुकुटमिव | = | राजमुकुटम्+इव |
| सर्वेषामेव | = | सर्वेषाम्+एव | | | |

# अभ्यासः

1. **अधोलिखितान् प्रश्नान् 'आम्' अथवा 'नहि' माध्यमेन उत्तरत-**

(क) किं 'का का' इति राजहंसस्य ध्वनिः ? ..........

(ख) किं काकः मेध्यम् अमेध्यं वा सर्वमेव भक्षयति ? ..........

(ग) किं कुक्कुटाः नगरेषु सर्वत्र सुलभाः एव ? ..........

(घ) किं राजहंसी श्लोकद्वयं पठति ? ..........

(ङ) किं बकः श्वेतः भवति ? ..........

(च) किं वर्षाणाम् अभिनन्दनं बकः करोति ? ..........

(छ) किं मयूरः एव अस्माकं राष्ट्रपक्षी ? ..........

(ज) किं मयूरः क्रोधेन प्रविशति ? ..........

(झ) किं कोकिलः एव मधुमासे आम्रवृक्षे स्थित्वा गायति ? ..........

(ञ) किं राजहंसः एव नीरक्षीरविवेकी मन्यते ? ..........

2. **अधोलिखितप्रश्नान् पूर्णवाक्येन उत्तरत -**

(क) राजहंसः राजहंसी च काकध्वनिं कस्यां वेलायां शृणुतः ?

..........

(ख) मयूरः केन पक्षिराजः कृतः ?

..........

(ग) कोकिलः कुत्र स्थित्वा पञ्चमस्वरेण गायति ?

..........

(घ) मातरः शिशून् किं कथयन्ति ?

..........

(ङ) केषाम् ऐक्यं जगत्प्रसिद्धम् ?

..........

(च) काकपिकयोः भेदः कदा ज्ञायते ?

..........................................................................................

(छ) कीदृशी सृष्टि: एषा?

..........................................................................................

(ज) केन समय: वृथा न यापयितव्य: ?

..........................................................................................

### 3. अधोलिखितवाक्येषु स्थूलपदम् आधृत्य प्रश्ननिर्माणं कुरुत-

(क) **नेपथ्ये** काकध्वनि: श्रूयते। ..............................

(ख) काक: प्रभाते 'का का' ध्वनिना **सुप्तान्** प्रबोधयति। ..............................

(ग) मयूरस्य **पिच्छानां** सौन्दर्यम् अद्भुतम् अस्ति। ..............................

(घ) बक: मीनान् छलेन अधिगृह्य **क्रूरतया** भक्षयति। ..............................

(ङ) जगत्पते: एषा सृष्टि: **रमणीया** अस्ति। ..............................

(च) मयूरस्य नृत्यं **प्रकृते:** आराधना। ..............................

(छ) **आयुष:** एक: अपि क्षण: स्वर्णकोटिकै: न लभ्यते। ..............................

(ज) हंस: **वर्षर्तौ** तु मानसं पलायते। ..............................

### 4. यथानिर्देशम् उत्तरत -

(क) 'जना: प्रियस्य आगमनसङ्केतं मत्वा हृष्यन्ति।' अस्मिन् वाक्ये कर्तृपदं किम् अस्ति?

(ख) 'अलम् अलं मिथ: कलहेन।' वाक्येऽस्मिन् 'परस्परम्' इति पदस्य किं पर्यायपदं प्रयुक्तम्?

(ग) 'आपत्काले सरांसि त्यक्त्वा दूरं व्रजसि।' वाक्येऽस्मिन् किं क्रियापदं प्रयुक्तम्?

(घ) 'सत्यम्' इति पदस्य किं विलोमपदं पाठे प्रयुक्तम्?

(ङ) 'दुग्धधवला:' इति विशेषणपदस्य किं विशेष्यपदं पाठे प्रयुक्तम्?

(च) 'पिच्छानाम्' इति पदस्य विशेषणपदं पाठात् चित्वा लिखत।

(छ) 'विचित्रा खलु दैवगति:।' अत्र विशेष्यपदं किम् अस्ति?

### 5. अधोलिखितपदानां समुचितं पर्यायपदं पाठात् चित्वा लिखत-

(क) असत्यम् ..............................

(ख) शरीरम् ..............................

(ग) गृहीत्वा ....................................

(घ) प्रात:काल: ....................................

(ङ) प्रसीदन्ति ....................................

**6. अत्र उदाहरणम् अनुसृत्य रिक्तस्थानानि पूरयत–**

यथा (क) राजहंसी <u>राजहंसं</u> कथयति यत् काकस्य कर्म अपि कृष्णम्।

(ख) काक: .................... कथयति यत् यदि स: (काक:) कृष्णवर्ण: तर्हि श्रीरामस्य वर्ण: कीदृश: ?

(ग) राजहंस: .................... कथयति यत् एतत् कार्यं तु कुक्कुटोऽपि करोति।

(घ) बक: .................... कथयति यत् तस्य किं महत्त्वम् ?

(ङ) मयूर: .................... कथयति यत् तस्य ध्यानावस्थां को न जानाति ?

(च) कोकिल: .................... कथयति यत् अलम् 'अतिविकत्थनेन'।

(छ) काक: .................... कथयति यत् स: एव करुणापर: पक्षिसम्राट्!

**7. अधोलिखितेषु वाक्येषु समुचितं पदं लिखत–**

यथा (क) राजहंस: काकस्य ध्वनिं श्रुत्वा व्याकुल: भवति।

(ख) काक: .................... कथनं श्रुत्वा तु क्रुद्ध: भवति परं .................... वचनं श्रुत्वा विहसति।

(ग) राजहंसी .................... वचनं श्रुत्वा तं 'वाचाल' इति कथयति।

(घ) मयूर: .................... वचांसि श्रुत्वा प्रविशति।

(ङ) कोकिल: .................... वाचांसि श्रुत्वा प्रविशति।

(च) अन्ते .................... प्रविशति।

**8. पाठगतश्लोकानां भावस्पष्टीकरणम् उचितपदै: कुरुत–**

(क) यदि .................... चञ्चुदेशे माणिक्यरत्नम् अपि भवेत् तथापि स: .................... न मन्यते अपितु .................... एव। एवमेव यदि .................... पक्षा: मणिभि: ग्रथिता: भवेयु: तथापि स: .................... एव न .................... ।

(ख) हंस: श्वेतवर्ण: बकस्य अपि च वर्ण: .................... एव। अत: बकहंसयो: वर्णदृष्ट्या कोऽपि न भेद: परं .................... एव विवेकशील: मन्यते न तु .................... ।

(ग) काकस्य वर्ण: कृष्ण: .................... अपि वर्ण: .................... । एतयो: भेद: तु .................... एव ज्ञायते यत् काक: .................... पिक: च पिक: अस्ति।

9. निम्नलिखितकथनेषु स्थूलानि सर्वनामपदानि 'कस्मै प्रयुक्तानि' इति लिखत –

| कथनानि | कस्मै प्रयुक्तं सर्वनामपदम् |
|---|---|
| यथा– सर्वथा जागरूकः **अहम्**। | **काकाय** |
| (क) सरस्तीरे विहरति **मयि**। | राजहंसाय |
| (ख) कथं **माम्** अधिक्षिपसि? | .................................... |
| (ग) **अहम्** एव वृष्टेः अभिनन्दनं करोमि। | .................................... |
| (घ) **मम** नृत्यं तु प्रकृतेः आराधना। | .................................... |
| (ङ) **अहं** पञ्चमस्वरेण गायामि। | .................................... |
| (च) **अहमेव** सर्वशिरोमणिः। | .................................... |
| (छ) सर्वैः एव **मे** शोभा। | .................................... |
| (ज) **अहमेव** नीरक्षीरविवेकी। | .................................... |

10. केन कथितानि एतानि कथनानि?

| कथनानि | वक्ता |
|---|---|
| (क) अहं तु अतीव कर्तव्यपरायणः। | .................................... |
| (ख) नीरक्षीरविवेके तु हंसो हंसः बको बकः। | .................................... |
| (ग) दुग्धधवलाः मे पक्षाः। | .................................... |
| (घ) अहमेव सर्वशिरोमणिः। | .................................... |
| (ङ) सर्वेषामेव महत्त्वं विद्यते यथासमयम्। | .................................... |

11. अधोलिखितवाक्येषु समस्तपदैः रिक्तस्थानानि पूरयत–

(क) राजहंसः हंसी च (सरसः तीरे) ..................... विहरतः

(ख) तत्र (काकस्य ध्वनिः) ..................... अपि श्रूयते।

(ग) काकः (क्रोधेन सहितम्) ..................... प्रविशति।

(घ) काकः आत्मानं (सत्यं प्रियं यस्य तम्) ..................... कथयति।

(ङ) काकस्य चञ्चुदेशे (माणिक्यानि च रत्नानि च तेषां समाहारः) ..................... भवेत् तथापि सः राजहंसः न भवति।

(च) बकः (स्थिता प्रज्ञा यस्य सः) ..................... इव जले बहुकालपर्यन्तं तिष्ठति।

(छ) (समयम् अनतिक्रम्य) ..................... सर्वेषां महत्त्वं विद्यते।

12. अधोलिखितवाक्येषु स्थूलाक्षरपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत –

(क) मेध्यम् अमेध्यं सर्वमेव भक्षयति।

(i) मेधाविनम् (ii) अभक्षणीयम् (iii) विशुद्धम्

(ख) अस्माकम् ऐक्यं तु जगत्प्रसिद्धम्।

(i) एकता (ii) भिन्नता (iii) क्रूरता

(ग) काकस्य गात्रं यदि काञ्चनस्य।

(i) गोत्रम् (ii) कुटुम्बम् (iii) शरीरम्

(घ) आपत्काले सरांसि त्यक्त्वा दूरं व्रजसि।

(i) वदसि (ii) भजसि (iii) गच्छसि

(ङ) बकः मीनान् छलेन अधिगृह्य क्रूरतया भक्षयति।

(i) गृहीत्वा (ii) खादित्वा (iii) त्यक्त्वा

## अन्वयः

1. यदि काकस्य गात्रम् काञ्चनस्य, यदि चञ्चुदेशे माणिक्यरत्नम्, एकैकपक्षे मणीनाम् ग्रथितम् तथापि (सः) काकः (एव) न तु राजहंसः॥ 1॥
2. हंसः श्वेतः बकः श्वेतः, बकहंसयोः कः भेदः? नीरक्षीरविवेके तु हंसः हंस, बकः बकः॥ 2॥
3. काकः कृष्णः पिकः कृष्णः, पिककाकयोः कः भेदः? वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥ 3॥
4. आयुषः एकः क्षणः अपि स्वर्णकोटिकैः न लभ्यः। स चेत् निरर्थकम् नीतः ततः अधिका नु हानिः का? ॥ 4॥
5. एषा जगत्पतेः सृष्टिः हि अधुना रमणीया। सर्वे जीवाः अत्र परस्परम् भावयन्तः मोदन्ताम् ॥ 5॥

## योग्यताविस्तारः

**(न परीक्षाकृते)**

**हंसः** **अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम्।**
**रमते न मरालस्य मानसं मानसं विना॥ 1॥**
**यत्रोदकं तत्र वसन्ति हंसाः तथैव शुष्कं परिवर्जयन्ति।**
**न हंसतुल्येन नरेण भाव्यं पुनस्त्यजन्ति पुनराश्रयन्ते॥**

**कोकिलः** **काकैः सह विवृद्धस्य कोकिलस्य कला गिरः।**
**खलसङ्गेऽपि नैष्ठुर्यं कल्याणप्रकृतेः कुतः।**

बकः न कोकिलानामिव मञ्जु कूजितं
न लब्धलास्यानि गतानि हंसवत्।
न बर्हिणानामिव चित्रपक्षता
गुणस्तथाप्यस्ति बके बकव्रतम्॥
इन्द्रियाणि च संयम्य बकवत् पण्डितो नरः।
देशकालबलं ज्ञात्वा सर्वकार्याणि साधयेत्॥

काकः तुल्यवर्णच्छदः कृष्णः कोकिलैः सह सङ्गतः।
केन विज्ञायते काकः स्वयं यदि न भाषते॥

## प्रहेलिका

सुप्तोऽपि नेत्रे न निमीलयामि जलस्य मध्ये निवसामि नित्यम्।
स्वजातिजीवाः मम भोजनानि वदन्तु मान्याः मम नामधेयम्॥

## एहि हसाम

दम्पत्योः मध्ये कलहः जातः। परस्परं वार्तालापः स्थगितः आसीत्। अन्यस्मिन् दिवसे कार्यवशात् पत्या अन्यत्र गन्तव्यम् आसीत्। अतः सः पत्न्यै चिटिकायां सूचनां लिखितवान् – 'प्रातः पञ्चवादने माम् उत्थापयतु' इति। ततः निश्चिन्ततया निद्रां च कृतवान्। प्रातः शीघ्रं जागरिता पत्नी तस्याम् एव चिटिकायां लिखितवती – 'पञ्चवादनम् अभवत् उत्तिष्ठतु।'

चतुर्थः पाठः

# आज्ञा गुरूणां हि अविचारणीया

(अद्य शिक्षक-दिवसः। आचार्यमहोदयः कक्षां प्रविशति। शिष्याः गुरुवन्दनां कुर्वन्ति।)

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥

**आचार्यः** – (प्रविश्य) अहो! अतिमधुरः स्वरः। वत्साः! भवन्तः जानन्ति किम्, अत्र कस्मै प्रणामः क्रियते?

**राकेशः** – (विचिन्त्य) 'तस्मै श्रीगुरवे नमः।' अत्र तु गुरवे एव प्रणामः क्रियते।

**आचार्यः** – शोभनम्। 'गुरुः' इति शब्दस्य कोऽर्थः?

**सुमेधा** – ननु आचार्य एव।

**आचार्यः** – शोभनम्। परं भवन्तः जानन्ति किं 'गुरुः' शब्दस्य अन्येऽपि अर्थाः भवन्ति।

**ऋचा** – किम् अस्य अन्येऽपि अर्थाः भवन्ति?

**आचार्यः** – आम्। शब्दार्थं दृष्ट्वा वदन्तु।

**राधिका** – ज्ञानवृद्धः, आदरणीयः, गरिष्ठः।

**आचार्यः** – आम्! ज्ञातव्यं यत् ज्ञानवृद्धः यदि बालोऽपि स्यात् सोऽपि पूजनीयः।

**अभिषेकः** – आम्! अस्माभिः पठितम् अपि। अष्टावक्रस्तु द्वादशवर्षीय एव आसीत् परन्तु सर्वैः वन्द्यः जातः।

**आचार्यः** – साधु! एवं युष्मासु अपि कश्चित् स्वविद्यया ज्ञानेन च गुरुः भवितुं शक्नोति।

**ऋचा** – किं सत्यम्?

**आचार्यः** – आम्! श्रावयामि एकां कथां यत्र वानराणां वरिष्ठस्य यूथपतेः उपदेशम् अवमत्य वानराः दुःखिनः भवन्ति।

**सर्वे छात्राः** – श्रोतुमिच्छामः।

चतुर्थः पाठः

# आज्ञा गुरूणां हि अविचारणीया



कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं कांस्यताम्रपात्रं वा पश्यन्ति तेन तम् आशु ताडयन्ति स्म।

मेषस्य सूपकाराणां च कलहम् अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत्–'एतेषां कलहो न वानराणां हिताय।' एवं विचार्य स यूथपः सर्वान् कपीन् आहूय रहसि अवदत्––

सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं भविष्यति। उक्तम् हि–

**तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।**

**तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत्॥ 1॥**

ततः सर्वेषां संक्षयो न भवेत्, तदेतद् राजभवनं परित्यज्य वनं गच्छामः। यतः–

**कलहान्तानि हर्म्याणि कुवाक्यान्तं च सौहृदम्।**
**कुराजान्तानि राष्ट्राणि कुकर्मान्तं यशो नृणाम्॥ 2॥**



तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः प्रहस्य अवदन्– 'भो! किमिदम् उच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः।' तच्छ्रुत्वा साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान्–'रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।'



अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः।





ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् दग्धाः केचिद् अर्धदग्धाः केचन च पञ्चत्वं गताः। दग्धां हयशालां विज्ञाय सविषादः राजा शालिहोत्रज्ञान् वैद्यान् आहूय अपृच्छत्–'हा! दग्धाः मे घोटकाः कथं रक्षणीयाः? सपदि उपायः क्रियताम्।' तदा राजवैद्यः प्रोवाच–

**कपीनां मेदसा दोषो वह्निदाहसमुद्भवः।**
**अश्वानां नाशमभ्येति तमः सूर्योदये यथा॥ 3॥**

'यथोचितं क्रियताम्' इति राजादेशं श्रुत्वा सर्वे भयत्रस्ताः कपयः अचिन्तयन्– 'हा! हताः वयम्। अवधीरिताः अस्माभिः गुरुजनोपदेशाः।' उक्तम् हि–

**मित्ररूपाः हि रिपवः सम्भाव्यन्ते विचक्षणैः।**
**ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः॥ 4॥**

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अज्ञानतिमिरान्धस्य** (वि०) (पु०ष०ए०व०) [अज्ञानम् एव तिमिरम्, कर्मधा०] तेन अन्धः तस्य, तृ०त० | अज्ञानतायाः अन्धकारेण दृष्टिहीनस्य | अज्ञानता रूपी अन्धकार के कारण अन्धे हुए का | of the one who is blind due to darkness of ignorance. |
| **अभ्येति** (क्रि०) (प्र०पु०ए०व०) [अभि+इ, लट् ल०] | प्राप्नोति | प्राप्त करता है | obtains. |
| **अवधीरिताः** (वि०) (पु०प्र०ब०व०) [अव+धीर्+क्त] | अवज्ञा कृता | तिरस्कार किया गया | disrespected, disregarded. |
| **अवशेषाः** (सं०) (प्र०ब०व०) [अव+शिष्+घञ्] | शेषाः | बचे हुए (खंडहर) | remains, ruins. |
| **प्रेक्ष्य** (प्र+ईक्ष्+ल्यप्) | दृष्ट्वा | अवलोकन करके, देखकर | having seen. |
| **अहनि** (सं०-अहन्) (नपुं०स०ए०व०) | दिने | दिन में | during day time. |
| **अहर्निशम्** (अव्य०) [अहश्च निशा च, तयोः समाहारः, द्वन्द्वः समासः] | दिवारात्रिः, अहोरात्रम् | दिनरात | day and night. |
| **उत्सृज्य** (अव्य०) [उत्+सृज्+ल्यप्] | परित्यज्य | छोड़ करके | having released. |
| **ऊर्णाप्रचुरः** (वि०) (पुं०प्र०ए०व०) | लोमबहुलः | अधिक ऊन से युक्त | having excess of wool. |

| | | | |
|---|---|---|---|
| **कलहान्तानि** (वि०) (नपुं०प्र०ब०व०) [कलहै: अन्त: येषां तानि, ब०व्री०] | विवादै: येषां नाश: तानि | झगड़ों से जिनका विनाश होता है | Which are destroyed due to disputes. |
| **कुराजान्तानि** (वि०) (नपुं०प्र०ब०व०)[कुत्सित: राजा इति कुराजा, कर्मधा०; कुराजभि: अन्त: येषां तानि, ब०व्री०] | दुष्टनृपै: नष्टानि | बुरे राजाओं के कारण जिनका विनाश होता है | Who are destroyed due to bad rulers. |
| **कुवाक्यान्तम्** (वि०) (नपुं०प्र०ए०व०)[कुत्सितं वाक्यम् इति कुवाक्यम्, कर्मधा०; कुवाक्यै: अन्त: यस्य तत्, ब०व्री०] | अपभाषणेन विनाश: यस्य तत् | अप्रिय भाषण के कारण जिसका अन्त होता है | Which ends due to unpleasant language. |
| **क्षितौ** (सं०-क्षिति) (स्त्री०स०ए०व०) | भूमौ | पृथ्वी पर | on the ground. |
| **गरिष्ठ:** (वि०) (पु०प्र०ए०व०)[गुरु+इष्ठन्] | ज्ञानवृद्ध:, आदरणीय: | वन्दनीय, अत्यन्त महत्त्वपूर्ण, सबसे भारी | most venerable excessively heavy, heaviest. |
| **जिह्वालोलुपतया** (सं०) (स्त्री०तृ०ए०व०)[जिह्वाया: लोलुपता तया, ष०त०पु०] | रसनाया: स्वादस्य लोभेन | जिह्वा द्वारा खाने के लालच से | because of the greed of eating. |
| **ज्ञानाञ्जनशलाकया** (सं०) (स्त्री०तृ०ए०व०)[ज्ञानम् एव अञ्जनम्, कर्मधा० तस्य शलाका तया, ष०त०पु०] | ज्ञान-कज्जल-शलाकया | ज्ञान रूपी काजल की सलाई से | with the stick of collyrium of knowledge. |
| **ज्वालमालाकुला:** (वि०) (पु०प्र०ब०व०)[ज्वालानां माला ष०त०पु०, ताभि: आकुला:, तृ०त०पु०] | अग्निज्वालासमूहेन पीडिता: | अग्निज्वालाओं से व्याकुल | bewildered with continuous row of flames. |
| **नीतिविदाम्** (सं०-नीतिविद्) (पु०ष०ब०व०) | नीतिज्ञानाम् | राजनीति तथा नैतिकमूल्यों से सम्बन्धित शास्त्रों के ज्ञाताओं का | of those having knowledge of moral and political science. |
| **पञ्चत्वं गता:** पञ्चत्वम् (सं०) (नपुं०द्वि०ए०व०) पञ्चतत्त्वानि (पृथ्वी, जलम्, अग्नि:, वायु:, आकाश: च) गता: (क्रि०)(पु०प्र०ब०व०) [गम्+क्त] प्राप्ता: | पञ्चतत्त्वेषु विलीना:, मृता: | मृत्यु को प्राप्त हुए | dead. |

| | | | |
|---|---|---|---|
| **प्रलुठतः** (वि०) [प्र+लुठ्+शतृ, पुं०ष०ए०व०] | लोठनं कुर्वतः | जमीन पर लोटते हुए का | of one rolling on the ground. |
| **महानसम्** (सं०) (पु०द्वि०ए०व०) पर्यायाः- रसवती, पाकस्थानम्, पाकशाला | पाकशालाम् | रसोईघर | kitchen. |
| **मेषयूथम्** (सं०)(पु०द्वि०ए०व०) [मेषाणां यूथः तम्, ष०त०] | एडकानां समूहः | भेड़ों के झुण्ड को | to he flock of sheep. |
| **मेदसा** (सं०-मेदस्) (नपुं०तृ०ए०व०) | वसया ['वसा' इति पदार्थेन] | वसा से, चर्बी से | with fat, with marrow. |
| **यूथपः** (सं०)(पु०प्र०ए०व०) [यूथं पाति, उप०त०] | वृन्दरक्षकः | झुण्ड का सरदार | group leader. |
| **रसनास्वादलुब्धाः** (वि०) [रसनायाः स्वादः (ष०त०) तेन लुब्धाः, ब०व्री०] | जिह्वायाः स्वादेन लोभिनः | जीभ के स्वाद से ललचाए हुए | covetous, greedy by taste. |
| **रहसि** (नपुं०-रहस्) (स०ए०व०) | एकान्ते | एकान्त में | in a lonely or deserted place, in solitude. |
| **राजादेशम्** (सं०) (पु०द्वि०ए०व०) [राज्ञः आदेशः तम्, ष०त०पु०] | नृपस्य आज्ञाम् | राजा के आदेश को | order of the king. |
| **विचक्षणैः** (वि०) (पु०तृ०ब०व०) [वि+चक्ष्+ल्युट्] | चतुरैः | बुद्धिमानों के द्वारा, सावधान रहने वालों के द्वारा | by experienced, bright, clever, wise. |
| **शालिहोत्रज्ञान्** (वि०) (पु०द्वि०ब०व०) [शालिहोत्रेण वैद्येन प्रणीतं शास्त्रम् तृ०त०, शालिहोत्रशास्त्रं जानन्ति तान्, उप०त०पु०] | शालिहोत्रनाम्ना वैद्येन रचितस्य शास्त्रस्य ज्ञातॄन् | शालिहोत्र द्वारा प्रणीत पशुचिकित्सा शास्त्र के ज्ञाताओं को | to those well versed in Veterenary Sciences propounded by Shalihotra. |
| **संक्षयः** (सं०) (पु०प्र०ए०व०) [सम्+क्षी+अच्] | विनाशः | नाश | destruction. |
| **सपदि** (अव्य०) | सत्वरम् त्वरितम्, शीघ्रम्, आशु, अचिरेण, क्षिप्रम् | तुरन्त, जल्दी, क्षण भर में | immediately, very soon. |

| | | | |
|---|---|---|---|
| **साश्रुनयनः** (वि०) (पु०प्र०ए०व०) [साश्रुणी नयने यस्य, सः ब०व्री०] | सवाष्पलोचनः | सजल नेत्रों वाला | one in tears. |
| **सूपकाराणाम्** (सं०) (पु०ष०ब०व०) [सु+पा+घञ् सुखेन पीयते इति सूपः। सूपं करोति इति सूपकारः, उप०त०पु०] | पाचकानाम् | रसोइयों का | of the cook. |
| **हयशालाम्** (सं०) (स्त्री० द्वि०ए०व०) [हयानां शाला, ष०त०पु०] | अश्वशालाम् | अस्तबल को | horse stable. |
| **हर्म्याणि** (सं०) (नपुं०प्र०ब०व०) | प्रासादाः | महल | palaces, harems. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| चन्द्रो नाम | = | चन्द्रः+नाम | वानराणां हिताय | = | वानराणाम्+हिताय |
| एको मेषः | = | एकः+मेषः | तदेतद् | = | तत्+एतद् |
| एतद् राजभवनम् | = | एतत्+राजभवनम् | यशो नृणाम् | = | यशः+नृणाम् |
| मदोद्धताः | = | मद+उद्धताः | स्वर्गसमानोपभोगान् | = | स्वर्गसमान+उपभोगान् |
| तच्छ्रुत्वा | = | तत्+श्रुत्वा | केचिद् दग्धाः | = | केचित्+दग्धाः |
| यथोचितम् | = | यथा+उचितम् | | | |

### सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| पुत्राः+वानरक्रीडारताः | = | पुत्रा वानरक्रीडारताः | सह+एषः | = | सहैषः |
| अहं+तु | = | अहन्तु | सः+मेषः | = | स मेषः |
| मेषः+वह्निना | = | मेषो वह्निना | रिपवः+सम्भाष्यन्ते | = | रिपवस्सम्भाष्यन्ते |

### संयोगः

| | | | | | |
|---|---|---|---|---|---|
| नित्यमेव | = | नित्यम्+एव | तमाशु | = | तम्+आशु |
| नित्यमकारणः | = | नित्यम्+अकारणः | किमिदम् | = | किम्+इदम् |
| वाक्यमुत्सृज्य | = | वाक्यम्+उत्सृज्य | नाशमभ्येति | = | नाशम्+अभ्येति |

# अभ्यासः

## 1. एकपदेन संस्कृतभाषया उत्तरत –

(क) राजपुत्राः प्रासादे **कैः** सह क्रीडन्ति स्म ? ..............................

(ख) राजगृहे **कीदृशं** मेषयूथम् आसीत् ? ..............................

(ग) जिह्वालोलुपतया मेषः **कुत्र** प्रविशति स्म ? ..............................

(घ) **के** पाकशालां प्रविष्टं मेषं ताडयन्ति स्म ? ..............................

(ङ) **केन** जाज्वल्यमानशरीरः मेषः अश्वशालां प्रविशति ? ..............................

(च) मेषस्य क्षितौ प्रलुठतः तृणेषु **काः** समुत्थिताः ? ..............................

(छ) **किमर्थम्** अश्वाः इतस्ततः अधावन् ? ..............................

(ज) **केषां** वह्निदोषः कपीनां मेदसा शाम्यति ? ..............................

(झ) **कस्य** आदेशं श्रुत्वा सर्वे कपयः भयत्रस्ताः जाताः ? ..............................

(ञ) **केषाम्** आज्ञा अविचारणीया भवति ? ..............................

## 2. पूर्णवाक्येन उत्तरत –

(क) जिह्वालोलुपतया मेषः अहर्निशं किं करोति स्म ?

..............................

(ख) सूपकाराः मेषं कैः वस्तुभिः ताडयन्ति स्म ?

..............................

(ग) मेषस्य सूपकाराणां च कलहम् अवेक्ष्य वानरयूथपतिः किम् अचिन्तयत् ?

..............................

(घ) मदोद्धताः कपयः वानरयूथपतिं किम् अवदन् ?

..............................

(ङ) सविषादः राजा वैद्यान् आहूय किम् अकथयत् ?

..............................

(च) राजादेशं श्रुत्वा भयत्रस्ताः कपयः किम् अचिन्तयन् ?

..............................

(छ) केषाम् उपदेशाः नैव अवधीरणीयाः ?

..........................................................................................

(ज) नरः कीदृशं गृहं दूरतः परिवर्जयेत् ?

..........................................................................................

3. **अधोलिखितवाक्येषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

**यथा –** कथनम्–राजपुत्राः वानरयूथं **भोज्यपदार्थैः** पुष्टिं नयन्ति स्म।

प्रश्नः – राजपुत्राः वानरयूथं **कैः** पुष्टिं नयन्ति स्म ?

(क) अश्वाः **प्राणत्राणाय** इतस्ततः अधावन्। ..........................................

(ख) राजा **वैद्यान्** आहूय अश्वरक्षार्थम् अपृच्छत्। ..........................................

(ग) सूपकारेण मेषः **अर्धज्वलितकाष्ठेन** ताडितः। ..........................................

(घ) **प्राज्ञः** कलहयुक्तं गृहं दूरतः परिवर्जयेत्। ..........................................

(ङ) सूर्योदये **तमः** नश्यति। ..........................................

(च) ज्वलन् मेषः **अश्वशालां** प्रविशति। ..........................................

4. **अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म।' अत्र क्रियापदं किम् ?

..........................................................................................

(ख) 'एवं विचार्य सः यूथपः सर्वान् कपीन् आहूय रहसि अवदत्।' अत्र 'कपीन्' पदस्य किं विशेषणपदं प्रयुक्तम् ?

..........................................................................................

(ग) 'मदोद्धताः कपयः प्रहस्य अवदन्।' अस्मिन् वाक्ये किं कर्तृपदं प्रयुक्तम् ?

..........................................................................................

(घ) 'हा दग्धाः मे घोटकाः कथं रक्षणीयाः ?' वाक्येऽस्मिन् 'अश्वाः' इत्यर्थे किं पदं प्रयुक्तम् ?

..........................................................................................

(ङ) 'मेषः महानसं प्रविश्य यत् पश्यति तद् भक्षयति।' अत्र 'निर्गत्य' पदस्य किं विलोमपदं प्रयुक्तम् ?

..........................................................................................

(च) 'ज्वालमालाकुलाः' पदस्य विशेष्यपदं पाठात् चित्वा लिखत।

..........................................................................................

5. 'क' स्तम्भे विशेषणपदानि 'ख' स्तम्भे च विशेष्यपदानि दत्तानि, तेषां समुचितमेलनं कृत्वा लिखत –

| | 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|---|
| (क) | कुवाक्यान्तम् | मेषः |
| (ख) | मदोद्धताः | यशः |
| (ग) | ऊर्णाप्रचुरः | हर्म्याणि |
| (घ) | कुराजान्तानि | यूथपतिः |
| (ङ) | मृण्मयम् | कपयः |
| (च) | कलहान्तानि | राष्ट्राणि |
| (छ) | साश्रुनयनः | सौहृदम् |
| (ज) | कुकर्मान्तम् | भाजनम् |

6. (अ) स्थूलाक्षराणि सर्वनामपदानि कस्मै प्रयुक्तानि? समक्षं प्रदत्तस्थाने लिखत –

यथा **अस्माकं** विनाशकारकः भविष्यति। वानरेभ्यः

(क) **तस्य** पुत्राः वानरैः सह क्रीडन्ति स्म। ..........

(ख) **एतेषां** कलहः न वानराणां हिताय। ..........

(ग) **सर्वेषां** संक्षयः न भवेत्। ..........

(घ) **वयम्** अटव्यां रूक्षफलानि नैव भक्षयिष्यामः। ..........

(ङ) **अहं** तु वनं गच्छामि। ..........

(च) हा! दग्धा **मे** घोटकाः। ..........

(छ) अवधीरिताः **अस्माभिः** गुरुजनोपदेशाः। ..........

(ज) **यूयम्** अस्य कुपरिणामं न जानीथ। ..........

(आ) कोष्ठकात् समुचितं पदं विचित्य रिक्तस्थानानि पूरयत–

(क) .......... नगरे चन्द्रः भूपतिः प्रतिवसति स्म। (कस्याञ्चित्/कस्मिंश्चित्)

(ख) .......... एव राजगृहे मेषयूथम् अपि आसीत्। (तस्य/तस्मिन्)

(ग) .......... अहनि स मेषः महानसं प्रविशति। (अन्यस्मिन्/पूर्वस्मिन्)

(घ) .......... क्षितौ प्रलुठतः तृणेषु अग्निज्वालाः समुत्थिताः। (तस्याः/तस्य)

(ङ) .......... भयत्रस्ताः कपयः अचिन्तयन्। (सर्वाः/सर्वे)

**7. घटनाक्रमानुसारम् अधोलिखितानि वाक्यानि पुनः लेखनीयानि –**

(क) सूपकारैः नित्यं ताडितं मेषं दृष्ट्वा वानरयूथपः वानरान् राजभवनं त्यक्तुम् अकथयत्।

(ख) राजा राजवैद्यम् आहूय अश्वरक्षायै न्यवेदयत्।

(ग) भूपतेः चन्द्रस्य पुत्राः वानरान् भोज्यपदार्थैः पुष्टिं नयन्ति स्म।

(घ) ज्वलन् स मेषः अश्वशालां प्रविष्टः। परिणामतः दग्धाः अश्वाः प्राणत्राणाय अधावन्।

(ङ) भयत्रस्ता कपयः गुरुजनोपदेशस्य अवधीरणातः पश्चात्तापं कृतवन्तः।

(च) अन्यस्मिन् अहनि स मेषः सूपकारेण अर्धज्वलितकाष्ठेन ताडितः।

(छ) राजगृहे बालवाहनयोग्यः मेषः जिह्वालोलुपतया महानसं प्रविश्य भोजनं खादति स्म।

(ज) रसनास्वादलुब्धाः मदोद्धताः मर्कटाः तद् राजभवनं त्यक्तुं न स्वीकृतवन्तः।

**8. अधः समस्तपदानां विग्रहाः दत्ताः। उदाहरणम् अनुसृत्य समस्तपदानि लिखत–**

| | विग्रहाः | समस्तपदानि | |
|---|---|---|---|
| (क) | मेषाणां मध्ये | मेषमध्ये | षष्ठीतत्पुरुषः |
| (ख) | वानराणां हिताय | .................................... | ...................... |
| (ग) | प्राणानां त्राणाय | .................................... | ...................... |
| (घ) | कपीनां मेदसा | .................................... | ...................... |
| (ङ) | राज्ञः आदेशम् | .................................... | ...................... |
| (च) | जिह्वायाः लोलुपतया | .................................... | ...................... |
| (छ) | अश्वानां नाशः | .................................... | ...................... |
| (ज) | यूथस्य पतिः | .................................... | ...................... |

**9. अधः मञ्जूषायां प्रत्येकशब्दस्य त्रीणि समानार्थकानि पदानि दत्तानि तानि चित्राणां समक्षं लिखत –**

| |
|---|
| अग्निः, वानरः, घोटकः, भूपतिः, सूपकारः, कपिः, राजा, वह्निः, अश्वः, हयः, मर्कटः, नृपः, अनलः, औदनिकः, पाचकः। |















10. अधोलिखितानां पङ्क्तीनां शुद्धं भावार्थं ( ✔ ) चिह्नेन चिह्नीक्रियताम् –

(क) 'एतेषां कलहो न वानराणां हिताय अर्थात्

(i) मेषस्य सूपकारैः सह दैनन्दिनः कलहः वानराणां विनाशकारणं भविष्यति।

(ii) एतेषां वानराणां पारस्परिकः विवादः जनानां हिताय न अस्ति।

(iii) वानरेभ्यः हितकरम् एतत् यत् ते जनैः सह कलहं न कुर्युः।

(ख) तद्गृहं जीवितं वाञ्छन् दूरतः परिवर्जयेत् अर्थात्

(i) यस्मिन् गृहे महान् कोलाहलः वर्तते, धनम् इच्छन् नरः तस्मात् दूरे गृहनिर्माणं कुर्यात्।

(ii) यत्र गृहे नित्यं सुखमयं जीवनम् अस्ति, तद्गृहं दूरतः अपि न परिवर्जितव्यम्, तत्रैव वस्तव्यम्।

(iii) यस्मिन् गृहे नित्यं विवादः भवति, नरः सुखेन जीवितुम् तत् गृहं कदापि न प्रविशेत्, तद् दूरतः एव परिवर्जयेत्।

(ग) 'रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ अर्थात्

(i) जिह्वास्वादलोभेन मेषः महानसप्रवेशस्य दुष्परिणामं न जानाति, अतः अवश्यमेव दण्डं प्राप्स्यति।

(ii) यूयं सर्वे वानराः जिह्वास्वादवशाः लोलुपाः, अतः अस्य क्षणिकसुखस्य दुष्परिणामं न अवगच्छथ यत् अनेन युष्माकं विनाशः भविष्यति।

(iii) रसनास्वादेन लुब्धाः जनाः लोभस्य दुरन्तं न जानन्ति। तेषां लोभवृत्तिः तेभ्यः विनाशकारिणी भविष्यति।

(घ) हा हन्त! वयम्। अवधीरिताः अस्माभिः गुरुजनोपदेशाः अर्थात्

(i) घोटकाः चिन्तयन्ति–'अस्माभिः स्वस्वामिनः आज्ञापालनं न कृतम् अतः वयं दग्धाः।'

(ii) सूपकाराः दुःखिनः भवन्ति—'स्वराजादेशस्य पालनं न कृतम् अस्माभिः अतः वयं दण्डिताः भविष्यामः।'

(iii) वानराः पश्चात्तापं कुर्वन्ति—'स्वगुरुजनस्य यूथपतेः उपदेशानाम् अस्माभिः अवहेलना कृता अतः वयं विनाशोन्मुखाः।'

11. अधोलिखितपङ्क्तिषु स्थूलाक्षरपदानाम् प्रसङ्गानुसारं शुद्धम् अर्थं चिनुत –

(क) मेषः **महानसं** प्रविश्य यत् पश्यति तद् भक्षयति।

(i) हयशालाम् (ii) मन्दिरम् (iii) पाकशालाम्

(ख) 'कलहान्तानि **हर्म्याणि** कुवाक्यान्तं च सौहृदम्।'

(i) राजभवनानि (ii) उद्यानानि (iii) मन्दिराणि

(ग) 'अन्यस्मिन् **अहनि** महानसं प्रविष्टः मेषः सूपकारेण ताडितः।

(i) रात्रौ (ii) मार्गे (iii) दिवसे

(घ) 'तस्य **क्षितौ** प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः।'

(i) मार्गे (ii) भूमौ (iii) पाकशालायाम्

(घ) '**सपदि** उपायः क्रियताम्।'

(i) एकपदेन (ii) पादेन सह (iii) झटिति

**12. रेखाङ्कितपदानां समस्तपदं विग्रहं वा लिखत –**

(क) कस्मिंश्चित् नगरे चन्द्रो नाम भूपतिः प्रतिवसति स्म।

(ख) राजपुत्राः वानरक्रीडारताः वानराणां यूथः, तम् नित्यमेव पुष्टिं नयन्ति स्म।

(ग) तेषां मेषाणां मध्ये एकः मेषः जिह्वालोलुपः आसीत्।

(घ) एकः मेषः जिह्वालोलुपतया महानसं प्रविशति स्म।

(ङ) एतद् राज्ञः भवनं परित्यज्य वनं गच्छामः।

(च) जाज्वल्यमानं शरीरं यस्य सः मेषः अश्वशालां प्रविशति।

## अन्वयाः

1. **अन्वयः** – तस्मात् यत्र गृहे नित्यम् अकारणः कलहः स्यात्। जीवितम् वाञ्छन् तत् गृहम् दूरतः परिवर्जयेत्।
2. **अन्वयः** – हर्म्याणि कलहान्तानि (भवन्ति), सौहृदम् च कुवाक्यान्तम् (भवति) राष्ट्राणि कुराजान्तानि (भवन्ति) नृणाम् यशः (च) कुकर्मान्तम् (भवति)।
3. **अन्वयः** – अश्वानाम् वह्नि-दाह-समुद्भवः दोषः कपीनाम् मेदसा नाशम् अभ्येति यथा सूर्योदये तमः।
4. **अन्वयः** – ये हितम् वाक्यम् उत्सृज्य विपरीत-उपसेविनः (ते) विचक्षणैः मित्ररूपाः हि रिपवः सम्भाष्यन्ते।

## योग्यताविस्तारः

**(न परीक्षाकृते)**

**(क) ग्रन्थपरिचयः**

'पञ्चतन्त्रम्' पण्डितवरेण विष्णुशर्मणा प्रणीतः संसारे प्रसिद्धः नीतिग्रन्थोऽस्ति। अस्मिन् ग्रन्थे कथानां पात्राणि प्रायः पशवः पक्षिणश्च सन्ति। तेषां माध्यमेन नीतिशास्त्रस्य गहनतत्त्वमपि अतिसरलतया अत्र प्रतिपादितम् अस्ति। अस्याः अनुवादः जगतः पञ्चाशदधिकासु भाषासु कृतः। अस्य पञ्च विभागाः सन्ति। 1. मित्रभेदः 2. मित्रसम्प्राप्तिः 3. काकोलूकीयम् 4. लब्धप्रणाशः 5. अपरीक्षितकारकम् च। प्रस्तुतकथा अन्तिमतन्त्रात् अपरीक्षितकारकात् उद्धृता।

**लोभः**

(क) लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम्॥

(ख) लोभाविष्टो नरो वित्तं वीक्षते न स चापदम्।
दुग्धं पश्यति मार्जारो न तथा लगुडाहतिम्॥

(ग) लोभेन बुद्धिश्चलति लोभो जनयते तृषाम्।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः॥

**गुरुः**

(क) गु शब्दस्त्वन्धकारे स्यात् रु शब्दस्तन्निरोधके।
अन्धकारनिरोधित्वाद् गुरुरित्यभिधीयते॥

(ख) आचिनोति हि शास्त्रार्थमाचारे स्थापयत्यपि।
स्वयमाचरते यस्मादाचार्यः परिकीर्त्यते॥

**इन्द्रियनिग्रहः**

(क) इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेतौ ह्यस्य परिपन्थिनौ॥

(ख) इन्द्रियाणां विसर्गेण दोषमृच्छत्यसंशयम्।
संनियम्य तु तान्येव ततः सिद्धिमवाप्नुयात्॥

(ग) जितेन्द्रिया जितक्रोधा जितमानमदास्तथा।
लोभमात्सर्यहीना ये ते नराः स्वर्गगामिनः।

## प्रहेलिका

**शङ्करं पतितं दृष्ट्वा पार्वती हर्षनिर्भरा।**
**रुरुदुः पन्नगाः सर्वे हा हा शङ्कर शङ्कर॥**

(अत्र श्लेषद्वारा अर्थः बोध्यः।) शङ्करं पतितं दृष्ट्वा पार्वती प्रसन्ना भवति, सर्पाः दुःखिताः जाताः। अत्र शङ्करशब्दे पार्वतीशब्दे च श्लेषः। सर्पाः शीतलं चन्दनवृक्षं आलिङ्ग्य मिलन्ति, सः चन्दनवृक्षः प्रकृतिविकोपेन पतितः अतः निराश्रिताः पन्नगाः रुदन्ति तथा भिल्लस्त्री (मलयपर्वते) चन्दनवृक्षबाहुल्यात् चन्दनवृक्षकाष्ठम् इन्धनाय प्रयुङ्क्ते। भिल्लस्त्री (पार्वती) पतितं चन्दनवृक्षं दृष्ट्वा इन्धनं लब्धमिति हर्षनिर्भरा जाता।
शङ्करः – शिवः चन्दनवृक्षः च, पार्वती – गौरी भिल्लस्त्री च।

## एहि हसाम

**आरक्षकः** – (बन्दीपालम् उद्दिश्य) श्रीमन्! एका महती समस्या अभवत्!

**बन्दीपालः** – किम् अभवत्?

**आरक्षकः** – कारागारे ये अपराधिनः आसन् ते सर्वे मिलित्वा ह्यः रामायणस्य नाटकम् अकुर्वन्।

**बन्दीपालः** – अस्तु समीचीनम्! परन्तु तत्र का समस्या?

**आरक्षकः** – श्रीमन्! लक्ष्मणस्य प्राणान् रक्षितुम् औषधम् आनेतुं यः हिमालयं गतवान् आसीत् सः अधुनापि न प्रत्यागतवान्।

**बन्दीपालः** – किं किम्! कुत्र गतः सः अपराधी? शीघ्रं गत्वा तम् आनयतु!

पञ्चमः पाठः

# अभ्यासवशगं मनः




**सङ्गीता** – अमूल्यः एषः पुस्तकानां सङ्ग्रहः।

**रविः** – सङ्गीते! अयम् अस्माकं विद्यालयस्य पुस्तकालयः।

**सङ्गीता** – अहो! अत्र तु ग्रन्थचक्रिका अपि अस्ति।

**रविः** – आम्! अस्यां ग्रन्थचक्रिकायाम् अनेके संस्कृतग्रन्थाः स्थापिताः।

**सङ्गीता** – (पठित्वा) वेदाः, उपनिषदः, रामायणम्, महाभारतम्, पुराणानि। कथम्! अत्र गीता तु न दृश्यते?

**रविः** – अयि! गीता तु महाभारतस्य एव अंशः।

**सङ्गीता** – महाभारते तु कौरवपाण्डवानां युद्धं वर्णितम्।

**रविः** – मुग्धे! किं न जानासि तस्मिन् एव युद्धकाले श्रीकृष्णः मोहग्रस्तम् अर्जुनं यत् उपादिशत् तदेव गीतायां निबद्धम्।

**सङ्गीता** – आम्, स्मरामि। परं कस्तावत् उपदेशः?

**रविः** – तस्य उपदेशस्यैव एकम् अंशम् अद्य वयं पठामः किल। शीर्षकस्तु – 'अभ्यासवशगं मनः'

**सङ्गीता** – कोऽर्थः अस्य शीर्षकस्य?

**रविः** – मनः चञ्चलं परम् अभ्यासेन वशं गच्छति।

पञ्चमः पाठः

# अभ्यासवशगं मनः

**अर्जुन उवाच**

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजित॥ 1॥

**श्रीभगवानुवाच**

काम एषः क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥ 2॥
शक्नोतीहैव यः सोढुं प्राक् शरीरविमोक्षणात्।
कामक्रोधोद्भवं वेगं सः युक्तः स सुखी नरः॥ 3॥
ध्यायतः विषयान् पुंसः सङ्गस्तेषूपजायते।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते॥ 4॥
क्रोधाद्भवति संमोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥ 5॥
तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ!
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्॥ 6॥



**अर्जुन उवाच**

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्॥ 7॥

**श्रीभगवानुवाच**

असंशयं महाबाहो मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते॥ 8॥

# शब्दार्थाः

| | | | |
|---|---|---|---|
| **अनिच्छन्** (वि०) (पु०प्र०ए०व०) [न इच्छन्, नञ् त०पु०(इष्+शतृ)] | न वाञ्छन् | न चाहते हुए भी | not desiring. |
| **अर्जुनः** (सं०) (पु०प्र०ए०व०) | शुद्धेन अन्तःकरणेन युक्तः, श्वेतः, देदीप्यमानः, उज्ज्वलः, शुद्ध - अन्तः-करणयुक्तः। (पर्यायाः- कौन्तेयः, पार्थः, धनञ्जयः, भारतः, परन्तपः, पाण्डवः, सव्यसाची, किरीटी, गुडाकेशः) | सफेद, चमकीला, उज्ज्वल, | having pure and pious heart; white, clear bright. |
| **एनम्** (सर्व०) (पु०द्वि०ए०व०) [एतत् शब्दस्य अन्वादेशे एनत् भवति, वाक्यस्य आदौ एतत् न प्रयुज्यते] | एतम् | इसको | (know) it. |
| **कृष्णः** (सं०) (पु०प्र०ए०व०) [कृष्+न] | आकर्षकः, श्यामवर्णः (पर्यायाः- गोविन्दः, केशवः, माधवः, कमलपत्राक्षः, मधुसूदनः, यादवः, वार्ष्णेयः, हृषीकेशः, योगेश्वरः) | भगवान् कृष्ण, काला, आकर्षित करने वाला | Lord Krishna, black, attractive. |
| **कौन्तेय** (सं०) (पु०सम्बो०ए०व०) [कुन्ती+ढक् (एय), कुन्त्याः अपत्यम् पुमान्] | कुन्तीपुत्रः, अर्जुनः | कुन्ती का पुत्र (अर्जुन) | son of Kunti - Arjuna. |
| **दुर्निग्रहम्** (वि०) (पु०प्र०ए०व०) [दुःखेन निग्रहः यस्य तत्, ब०व्री०] | यस्य वशीकरणं कठिनम् | जिसको वश में करना कठिन है | that which is controlled with difficulty. |
| **दुष्करम्** (वि०) (नपुं०प्र०ए०व०) [दुस्+कृ+अच्] | काठिन्येन कर्तुं सम्भवम् | कठिन | difficult to do. |
| **ध्यायतः** (वि०) (पु०ष०ए०व०) [ध्यै+शतृ] | चिन्तनपरस्य | चिन्तन (ध्यान) करने वाले का | of the person who meditates. |
| **निग्रहम्** (सं०) (पु०द्वि०ए०व०) [नि+ग्रह+अप्] | वशीकरणम् | वश में करने को | control. |
| **नियोजितः** (क्रि०) (पु०प्र०ए०व०) [नि+युज्+णिच्+क्त] | (कार्यं कर्तुम्) प्रेरितः | (काम में) लगाया हुआ | set to work. |

| | | | |
|---|---|---|---|
| **पुंसः** (सं०-पुम्स्) (पु०ष०ए०व०) [प्रथमा - पुमान् पुमांसौ पुमांसः] | मानवस्य | पुरुष का, मनुष्य का | of the man. |
| **पूरुषः** (सं०) (पु०प्र०ए०व०) | पुरुषः, मानवः | पुरुष, मनुष्य | man, person. |
| **प्रजहि** (क्रि०) (म०पु०ए०व०) [प्र+हन्+लो०] | परित्यज, दमय | छोड़ दो, दमन करो | evade, abstain. |
| **प्रणश्यति** (क्रि०) (प्र०पु०ए०व०) [प्र+नश्+लट्] | नाशम् उपैति | नष्ट हो जाता है | vanishes, disappears. |
| **प्रमाथि** (वि०) (नपुं०प्र०ए०व०) | प्रमथनशीलम्, शरीरस्य इन्द्रियाणां वा च उद्वेगकारकम् | मथनेवाला, शरीर और इन्द्रियों को उद्विग्न करने वाला | which causes physical or sensory turmoil. |
| **प्रयुक्तः** (वि०) (पु०प्र०ए०व०) [प्र+युज्+क्त] | प्रेरितः | प्रेरित | provoked. |
| **प्राक्** (अव्य०) ['प्राक्' इति पदस्य योगे पञ्चमीविभक्तिः प्रयुज्यते यथा सूर्योदयात् प्राक्] | पूर्वम् | पहले | before. |
| **भरतर्षभ** (सं०) (पु०सम्बो०ए०व०) [भरतेषु ऋषभः, स०त०पु०] | भरतवंशे श्रेष्ठ! | हे अर्जुन!, भरतवंश में श्रेष्ठ | O superior most in Bharat dynasty. |
| **महापाप्मा** (वि०) (पु०प्र०ए०व०) [महान् पाप्मा यस्य सः, ब०व्री०] | पापशीलः (मूलशब्दः पाप्मन् अस्य रूपाणि आत्मन्वत् भवन्ति) | पापी | sinner. |
| **महाबाहो** (वि०) (पु०सम्बो०ए०व०) [महान्तौ बाहू यस्य, ब०व्री०] | हे विशालभुज! | हे विशाल भुजाओं वाले | O long armed one. |
| **महाभुज** (वि०) (पु०सम्बो०ए०व०) [महान्तौ भुजौ यस्य, ब०व्री०] | हे महाबाहो! | हे विशाल भुजाओं वाले | O long armed one. |
| **महाशनः** (वि०) (पु०प्र०ए०व०) [महत् अशनं (भोजनम्) यस्य सः, ब०व्री०] | बहुभोजी | बहुत खाने वाला | verocious eater. |
| **युक्तः** (वि०) (पु०प्र०ए०व०) | भक्तिमान् | योगी | a disciplined sage |
| **रजोगुणसमुद्भवः** [रजोगुणात् समुद्भवः यस्य सः, ब०व्री० (सम्+उद्+भू+अप्] | रजोगुणात् उत्पन्नः | रजोगुण से जिस का जन्म होता है | born of passion (Rajoguna). |

| | | | |
|---|---|---|---|
| **वार्ष्णेय** (सं०) (पु०सम्बो०ए०व०) [वृष्णि+ढक् (एय) वृष्णेः अपत्यं पुमान् इति वार्ष्णेय] | हे वृष्णिवंशोद्भव, हे वृष्णिकुलप्रसूत! | वृष्टि नाम वंश में उत्पन्न होने वाले, श्रीकृष्ण | descendant of 'Vrishni' family Lord Krishna. |
| **विद्धि** (क्रि०) (लो०म०पु०ए०व०) | जानीहि | जानो, समझो | know, understand. |
| **शरीरविमोक्षणात्** (सं०) (नपुं०पं०ए०व०) [शरीरस्य विमोक्षणं तस्मात्, ष०त०पु० (विमोक्षणम्=वि+मोक्ष्+ल्युट्] | देहत्यागात् | शरीर त्याग से | before discarding the physical body. |
| **संमोहः** (सं०) (पु०प्र०ए०व०) [सम्+मुह+अच्] | उद्विग्नता | किंकर्तव्यविमूढता | infatuation. |
| **सङ्गः** (सं०) (पु०प्र०ए०व०) [सञ्ज्+अच्] | आसक्तिः | लगाव | attachment. |
| **स्मृतिविभ्रमः** (सं०)(पु०प्र०ए०व०) [स्मृतेः विभ्रमः, ष०त०पु०] | स्मरणशक्तेः ह्रासः | स्मरण शक्ति का हास | loss of memory. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | |
|---|---|---|---|
| प्रयुक्तोऽयम् | = प्रयुक्तः+अयम् | अनिच्छन्नपि | = अनिच्छन्+अपि |
| बलादिव | = बलात्+इव | विद्ध्येनम् | = विद्धि+एनम् |
| शक्नोतीहैव | = शक्नोति+इह+एव | कामक्रोधोद्भवम् | = कामक्रोध+उद्भवम् |
| सङ्गस्तेषूपजायते | = सङ्गः+तेषु+उपजायते | क्रोधोऽभिजायते | = क्रोधः+अभिजायते |
| क्रोधाद्भवति | = क्रोधात्+भवति | ह्येनम् | = हि+एनम् |
| तस्मात्त्वमिन्द्रियाण्यादौ | = तस्मात्+त्वम्+इन्द्रियाणि+आदौ | वायोरिव | = वायोः+इव |
| स सुखी | = सः+सुखी | काम एषः | = कामः+एषः |

### सन्धिकार्यम्

| | | | |
|---|---|---|---|
| यः+सोढुम् | = यस्सोढुम् | ध्यायतः+विषयान् | = ध्यायतो विषयान् |

### संयोगः

| | | | |
|---|---|---|---|
| एनमिह | = एनम्+इह | त्वमिन्द्रियाणि | = त्वम्+इन्द्रियाणि |

# अभ्यासः

**1. अधोलिखितप्रश्नानाम् उत्तरम् एकपदेन लिखत–**

(क) 'वार्ष्णेय' इति सम्बोधनं कस्मै प्रयुक्तम्?

..............................

(ख) 'न इच्छन् अपि' इत्यस्य स्थाने किं पदं श्लोके प्रयुक्तम्?

..............................

(ग) कामः कस्मात् गुणात् सम्भवति?

..............................

(घ) 'ध्यायतः' पदं कस्य पदस्य विशेषणम्?

..............................

(ङ) कानि वशे कृत्वा नरः कामं नाशयितुं शक्नोति?

..............................

(च) कः ज्ञानविज्ञाननाशकः?

..............................

(छ) मनः वशीकर्तुं किं कर्तव्यम्?

..............................

(ज) केषु आसक्तिः न कर्तव्या?

..............................

**2. पूर्णवाक्येन संस्कृतभाषया उत्तराणि लिखत –**

(क) कः नरः सुखी भवति?

..............................

(ख) क्रोधः कस्मात् जायते?

..............................

(ग) सम्मोहात् किं भवति?

..............................

(घ) कस्य निग्रहम् अर्जुनः वायोरिव सुदुष्करं मन्यते?

..........................................................................................

(ङ) चञ्चलं मनः कथं गृह्यते?

..........................................................................................

(च) पाठे 'वार्ष्णेय' इति पदं कस्मै प्रयुक्तम्?

..........................................................................................

**3. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

(क) मनुष्यः **कामेन** प्रयुक्तः एव पापस्य आचरणं करोति। ..............................

(ख) कामः एव **क्रोधं** जनयति। ..............................

(ग) काम एव **अस्माकं** शत्रुः। ..............................

(घ) यः क्रोधस्य वेगं जीवने सहते स **सुखी** नरः। ..............................

(ङ) **विषयाणाम्** उपभोगेन तेषु आसक्तिः जायते। ..............................

(च) **मनसः** निग्रहः वायोः इव कठिनः। ..............................

(छ) **कामः** ज्ञानस्य विज्ञानस्य च नाशं करोति। ..............................

(ज) कामस्य नाशाय **इन्द्रियाणि** वशे करणीयानि। ..............................

**4. अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।' अत्र किं क्रियापदं प्रयुक्तम्?

(ख) 'शरीरविमोक्षणात् प्राक् यः सोढुं शक्नोति।' अत्र 'पूर्वम्' इत्यर्थे किं पदं प्रयुक्तम्?

(ग) 'चञ्चलं हि मनः कृष्ण!' अत्र किं विशेष्यपदम्?

(घ) 'सः युक्तः सः सुखी नरः' अस्मिन् वाक्ये 'योगी' इत्यर्थे किं पदं प्रयुक्तम्?

(ङ) 'तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्' अत्र सुकरम् इति पदस्य कि विलोमपदं प्रयुक्तम्?

(च) 'मनो दुर्निग्रहं कृष्ण!' अत्र किं विशेषणपदम् अस्ति?

**5. विशेषणविशेष्यपदानाम् उचितं मेलनं कुरुत –**

| (अ) | (ब) | उत्तराणि |
|---|---|---|
| (क) सुखी | (i) क्रोधः | .............................. |
| (ख) चञ्चलम् | (ii) वेगम् | .............................. |

(ग) रजोगुणसमुद्भवः (iii) निग्रहम् ..........................

(घ) कामक्रोधोद्भवम् (iv) नरः ..........................

(ङ) सुदुष्करम् (v) मनः ..........................

**6. श्लोकात् समुचितं पदं विचित्य अन्वये रिक्तस्थानानि पूरयत–**

(क) यः शरीरविमोक्षणात् .................... कामक्रोधोद्भवम् .................... इह एव .................... शक्नोति स .................... युक्तः स सुखी (भवति)।

(ख) .................... ध्यायतः पुंसः तेषु .................... उपजायते। सङ्गात् .................... सञ्जायते। .................... क्रोधः अभिजायते।

(ग) कृष्ण! मनः हि .................... , बलवद्दृढम् ....................। अहम् तस्य निग्रहम् .................... इव दुष्करम् ....................।

(घ) ....................! तस्मात् त्वम् आदौ ....................! नियम्य .................... एनम् पाप्मानम् हि ....................।

(ङ) ....................! असंशयम् .................... दुर्निग्रहम् चलम् कौन्तेय!, (एतत्) तु .................... वैराग्येण च ....................।

**7. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत –**

(क) "चञ्चलं हि मनः कृष्ण! <u>प्रमाथि</u> बलवद्दृढम्।"

(i) मथनशीलम् (ii) चिन्तनशीलम् (iii) गुणवत्

(ख) "ध्यायतः विषयान् <u>पुंसः</u> सङ्गस्तेषूपजायते।"

(i) मित्रस्य (ii) पुरुषस्य (iii) शिक्षकस्य

(ग) तस्मात् त्वम् <u>आदौ</u> इन्द्रियाणि नियम्य पाप्मानं प्रजहि।

(i) सर्वप्रथमम् (ii) रात्रौ (iii) यदा कदा

(घ) अभ्यासेन तु <u>कौन्तेय</u> वैराग्येण च गृह्यते।

(i) भीमः (ii) अर्जुन (iii) नकुल

(ङ) क्रोधाद् भवति <u>सम्मोहः</u>।

(i) उद्विग्नता (ii) निर्धनता (iii) व्याकुलता

**8. रेखाङ्कितपदानां समस्तपदं विग्रहं वा लिखत –**

(क) <u>अनिच्छन्</u> अपि वार्ष्णेय! बलादिव नियोजितः।

(ख) एषः क्रोधः <u>रजोगुणात् समुद्भवः</u> अस्ति।

(ग) शरीरस्य विमोक्षणात् प्राक् यः क्रोधस्य वेगं सोढुं शक्नोति।

(घ) असंशयं महाबाहो! मनो दुर्निग्रहं चलम्।

(ङ) मनो दुःखेन निग्रहं चलम्।

**9. मञ्जूषायाः विचित्य अधोलिखित-क्रियापदानाम् अर्थान् लिखत –**

| अर्हति, जानीहि, करोति, उद्भवति, अवगच्छामि, विनाशय, वशीक्रियते, विनश्यति |
|---|

(क) विद्धि ....................................।

(ख) मन्ये ....................................।

(ग) शक्नोति ....................................।

(घ) गृह्यते ....................................।

(ङ) प्रणश्यति ....................................।

(च) चरति ....................................।

(छ) सञ्जायते ....................................।

(ज) प्रजहि ....................................।

**10. अशुद्धं कथनं ( ✘ ) इति चिह्नेन दर्शयत–**

**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।**

(क) भोः अर्जुन! इदं मनः चञ्चलं, दुःखेन निग्रहीतुं शक्यम्।

(ख) चञ्चलमपि मनः सततम् अभ्यासेन वशीकर्तुं शक्यते। या क्रिया पुनः पुनः क्रियते सः अभ्यासः कथ्यते। मनसः वशीकरणाय निरन्तरं या साधना क्रियते सः अभ्यासः एव।

(ग) सांसारिकभोगाः नश्वराः अतः एतेषां पुनः पुनः चिन्तनेन तेषु विरक्तिः जायते। एषा विरक्तिः (वैराग्यम्) एव मनः वशीकर्तुं शक्नोति।

(घ) हे कुन्तीपुत्र! सततं अभ्यासेन सांसारिकभोगान् प्रति वैराग्येण च मनः वशं गच्छति।

**11. अस्मिन् वृक्षे कानिचित् त्याज्यानि कानिचित् च फलानि ग्राह्याणि। ग्राह्याणां फलानां नामानि अधः लिखत –**

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................

..........................................................................................................................




## अन्वयः

1. वार्ष्णेय! अथ केन प्रयुक्तः अयम् पूरुषः अनिच्छन् अपि बलात् नियोजितः इव पापम् चरति।
2. रजोगुणसमुद्भवः एषः कामः एषः क्रोधः महाशनाः महापाप्मा। एनम् इह वैरिणम् विद्धि।
3. यः शरीरविमोक्षणात् प्राक् कामक्रोधोद्भवम् वेगम् इह एव सोढुम् शक्नोति सः नरः युक्तः सः सुखी (भवति)।
4. विषयान् ध्यायतः पुंसः तेषु सङ्गः उपजायते। सङ्गात् कामः सञ्जायते। कामात् क्रोधः अभिजायते।
5. क्रोधात् सम्मोहः, सम्मोहात् स्मृतिविभ्रमः, स्मृतिभ्रंशात् बुद्धिनाशः, बुद्धिनाशात् प्रणश्यति।
6. भरतर्षभ! तस्मात् त्वम् आदौ इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनम् एनम् पाप्मानम् हि प्रजहि।
7. कृष्ण! मनः हि चञ्चलम् प्रमाथि बलवद् दृढम्। अहम् तस्य निग्रहम् वायोः इव दुष्करम् मन्ये।
8. महाबाहो! असंशयम् मनः दुर्निग्रहम् चलम्, कौन्तेय! (एतत्) तु अभ्यासेन वैराग्येण च गृह्यते।

## योग्यताविस्तारः

**(क) ग्रन्थपरिचयः**

श्रीमद्भगवद्गीता नाम ग्रन्थः महाभारतस्य भीष्मपर्वणः एव अंशः। अस्मिन् ग्रन्थे अष्टादश-अध्यायाः सप्तशतं च श्लोकाः सन्ति। अस्य उपदेशाः सार्वकालिकाः सार्वभौमिकाः च । संसारस्य प्रायः सर्वासु भाषासु अस्य अनुवादाः रूपान्तराणि च लभ्यन्ते।

## ( ख ) भावविस्तारः

### I. गीतायाः महत्त्वम् एभिः श्लोकैः ज्ञायते

गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
या स्वयं पद्मनाभस्य मुखपद्माद्विनिः सृता॥ 1॥
सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥ 2॥
मल-निर्मोचनं पुंसां जलस्नानं दिने दिने।
सकृद् गीतामृतस्नानं संसारमलनाशनम्॥ 3॥

### II. गीतायां गुणानां त्रिधा विभागः कृतः

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम्॥

गुणाः त्रयः – 1. सत्त्वम् 2. रजः 3. तमः।

1. **सत्त्वगुणः** — **तत्र सत्त्वं निर्मलत्वात्प्रकाशकम् अनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ॥**

**सात्विकः**

| | |
|---|---|
| आहाराः | आयुः-सत्त्व-बल-आरोग्य-प्रीतिविवर्धनाः। |
| यज्ञः | अफलार्थिभिः विधिपूर्वकं क्रियते। |
| तपः | शरीरं तपः, वाङ्मयं तपः, मानसं तपः। |
| दानम् | देशकाल-पत्रानुसारं सुपात्राय दीयते। |
| बुद्धिः | यम-यिम-श्रद्धा-भक्तिमयी। |

2. **रजोगुणः** — **रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥**

**राजसिकः**

| | |
|---|---|
| आहाराः | कटु-आम्ल-लवण-तीक्ष्ण-रूक्ष-विदाहिनः। |
| यज्ञः | यत् फलम् उद्दिश्य दम्भार्थं क्रियते। |
| तपः | सत्कारमानपूजार्थं दम्भेन क्रियते। |
| दानम् | प्रत्युपकारार्थम् फलेच्छया दीयते। |
| बुद्धिः | धर्मम् अधर्मं, कार्यम् अकार्यं सम्यक् न जानाति। |

3. **तमोगुणः** — **तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥**

| | | |
|---|---|---|
| तामसी | आहाराः | उच्छिष्टाः, पर्युषिताः, अमेध्याः, गतरसाः। |
| | यज्ञः | मन्त्रहीनः, अन्न-दान-हीनः, अदक्षिणः। |
| | तपः | परेषां विनाशाय। |
| | दानम् | अदेशकाले अपात्रेभ्यः। |
| | बुद्धिः | प्रमाद-मूढता-आलस्य-मोह-अज्ञानमयी। |

### III. उपर्युक्तगुणविश्लेषणं पठित्वा अधोलिखितान् प्रश्नान् ( ✔ ) चिह्नेन चिह्नीकुरुत-

1. केन प्रवृत्तः नरः पुण्यम् आचरति?
   (क) रजोगुणेन
   (ख) तमोगुणेन
   (ग) सत्त्वगुणेन

2. कीदृशः आहारः सात्त्विकः?
   (क) कटु-तीक्ष्ण-रूक्ष-विदाही
   (ख) आयुः-सत्त्व-बल-प्रीतिवर्धकः
   (ग) उच्छिष्टः, अमेध्यः, पर्युषितः

3. कीदृशी बुद्धिः सत्विकी?
   (क) ज्ञान-भक्ति-श्रद्धामयी
   (ख) प्रमाद-मूढता-आलस्यमयी
   (ग) लोभ-मोह-क्रोधमयी

4. किं वाङ्मयं तपः उच्यते?
   (क) यत् सत्कारमानपूजार्थं क्रियते।
   (ख) यत् परेषां विनाशाय क्रियते।
   (ग) यत् अनुद्वेगकरं सत्यं प्रियहितं च।

5. किं सात्त्विकं दानं कथ्यते?
   (क) यत् फलेच्छया दीयते।
   (ख) यत् देश-काल-पात्रानुसारं दीयते।
   (ग) यत् अदेशकाले अपात्रेभ्यः दीयते।

6. कीदृशी वाणी सात्त्विकी?
   (क) सत्य-माधुर्य-निष्ठामयी
   (ख) परनिन्दा-असत्यमयी
   (ग) क्रूर-अपशब्दयुता

**( ग ) समानार्थकसूक्तयः**

1. इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।
2. मनः एव मनुष्याणां कारणं बन्धमोक्षयोः।
3. सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी।
4. त्रिविधं नाशनमात्मनः- कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।
5. जहि शत्रुं महाबाहो कामरूपं दुरासदम्।

**भाषाविस्तारः**

**( क ) 'एय' ( ढक् ) प्रत्ययः अपत्यार्थे प्रयुज्यते। यथा विनतायाः पुत्रः वैनतेयः ( गरुडः )**

**'एय' प्रत्यययोगेन शब्दानां निर्माणं पश्यत**

**यथा-**

1. गङ्गायाः पुत्रः = गाङ्गेयः
2. कुन्त्याः पुत्रः = कौन्तेयः
3. वृष्णेः अपत्यं पुमान् = वार्ष्णेयः
4. भगिन्याः पुत्रः = भागिनेयः
5. राधायाः पुत्रः = राधेयः

**( ख ) 'मनः' पदे मूलशब्दः, 'मनस्'** इति वर्तते।

'मनस्'- 'पयस्'- 'तपस्'-शब्दाः नपुंसकलिङ्गाः सन्ति। मनसः विशेषणपदानि अपि नपुंसकलिङ्गे सन्ति।

**यथा -** चञ्चलं मनः

दृढं मनः

दुर्निग्रहं मनः

## 'मनस्' ( मन ) नपुंसकलिङ्गे

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा** | मनः | मनसी | मनांसि |
| **द्वितीया** | मनः | मनसी | मनांसि |
| **तृतीया** | मनसा | मनोभ्याम् | मनोभिः |
| **चतुर्थी** | मनसे | मनोभ्याम् | मनोभ्यः |
| **पञ्चमी** | मनसः | मनोभ्याम् | मनोभ्यः |
| **षष्ठी** | मनसः | मनसोः | मनसाम् |
| **सप्तमी** | मनसि | मनसोः | मनस्सु |
| **सम्बोधन** | हे मन! | हे मनसी! | हे मनांसि! |

अनुरूपशब्दाः – पयस् (जल), तपस् (तपस्या), तमस् (अन्धकार), वचस् (वचन), सरस् (तालाब), यशस् (यश), नभस् (आकाश), रजस् (धूलि)।

**(ग)** कोष्ठकप्रदत्तधातुभिः सह 'तुमुन्' प्रत्ययं योजयित्वा निर्मित-पदानि ध्यानेन पश्यत अवगच्छत च।

'शक्' धातोः पूर्वं 'तुमुन्' प्रत्ययस्य प्रयोगः द्रष्टव्यः

**यथा-** (i) क्रोधी गुरुजनोपदेशं श्रोतुं न शक्नोति।

(ii) देशभक्ताः एव राष्ट्रं सेवितुं शक्नुवन्ति।

1. संयमी क्रोधोद्वेगं **सोढुं** शक्नोति (सह्)
2. अहम् अभ्यासेन मनः **रोद्धुं** शक्नोमि (रुध्)
3. कामेन वशीभूतः नरः पापं **चरितुं** शक्नोति (चर्)
4. इन्द्रियाणां निग्रहेण नरः कामं **हन्तुं** शक्नोति (हन्)
5. इन्द्रियनिग्रहस्य अभ्यासेन जनाः मनः वशी **कर्तुं** शक्नुवन्ति (कृ)
6. बुद्धेः नाशः नरं **नाशयितुं** शक्नोति (नाशय्)

## प्रहेलिका

केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः।
रुदन्ति कौरवाः सर्वे हा केशव हा केशव॥

## एहि हसाम

**वैद्यः** – भवतः कर्णयोः चिकित्सा मया अतीव सम्यक्तया कृता अस्ति। इदानीं भवान् सम्यक् रूपेण श्रोतुं शक्नोति, अत्र न कापि समस्या।

**रोगी** – वैद्यमहोदय! भवान् माम् उद्दिश्य इदानीं किमपि उक्तवान् किम्?

षष्ठः पाठः

# राष्ट्रं संरक्ष्यमेव हि



**( विद्यालये बालचराणां शिबिरम्। सायं सर्वे स्व-अनुभवान् श्रावयन्ति )**

**ध्रुवः** – विचित्रः अयं संसारः। केचन महापुरुषाः महात्मगान्धिवत् अहिंसायाः पाठं पाठयन्ति। अन्ये च आणविक-अस्त्राणां निर्माणं विधाय जगतः संहारं कर्तुम् इच्छन्ति।

**सिद्धार्थः** – वस्तुतः विज्ञानस्य सत्प्रयोगः राष्ट्रस्य कल्याणाय, दुरुपयोगश्च विनाशाय भवति।

**सुश्रुतः** – आम्, दुरुपयोगः तु अभिशापः एव।

**चरकः** – विदितम् अस्ति किं युष्माकं यत् प्राचीनकाले अपि आणविक-अस्त्राणां मानवेषु प्रयोगः निषिद्धः आसीत्।

**ध्रुवः** – किं पुरा अपि एतादृशानि अस्त्राणि आसन् येषां मानवेषु प्रयोगः वर्जितः आसीत्।

**सिद्धार्थः** – किमिदं सत्यम्? आश्चर्यम्।

**चरकः** – प्रत्यक्षं किं प्रमाणम्? 'राष्ट्र संरक्ष्यमेव हि' अयं पाठः महाभारत-आधारितः। एतं पठित्वा ज्ञास्यामः।

# षष्ठः पाठः राष्ट्रं संरक्ष्यमेव हि

(ततः पुत्रशोकसन्तप्ताः युधिष्ठिरः भीमः द्रौपदी च रणभूमौ प्रविशन्ति।)

**द्रौपदी** – (दीर्घं निःश्वस्य) हा हन्त। किम् इदं घोरम् आपतितम्। पापकर्मणा द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः।

**युधिष्ठिरः** – शुभे! धैर्यं धारय। नूनं तव पुत्राः वीरगतिम् एव प्राप्ताः। वीरजननी त्वं शोचितुं न अर्हसि।

**द्रौपदी** – कथं मन्दभाग्या अहं धैर्यं धारयामि। यावत् असौ क्रूरकर्मा न दण्ड्यते, तावत् अहम् इतः न गमिष्यामि, अत्रैव प्राणत्यागं च करिष्यामि।

**युधिष्ठिरः** – प्रिये! मा एवं ब्रूयाः। स पापकर्मा कुत्र गतः इति न जानीमः। अतिदूरं किञ्चिद् दुर्गमवनं प्रविष्टः भवेत्।

**द्रौपदी** – (भीमं प्रति) आर्यपुत्र! क्षत्रधर्मम् अनुस्मरन् मां शोकसागरात् रक्ष। अस्मिन् संसारे कश्चित् अपि त्वया सदृशः पराक्रमी नास्ति। पुरा वारणावते त्वमेव पाण्डवान् रक्षितवान्। विराट-नगरे अपि त्वं मां प्राणङ्कटात् उद्धृतवान्।

**भीमः** – (युधिष्ठिरं प्रति) भ्रातः! द्रौणिम् अनुगन्तुं मह्यम् अनुमतिं ददातु भवान्।

**युधिष्ठिरः** – गच्छ वत्स! विजयी भव, नकुलः तव सारथिः भवतु।

(भीमसेनः निर्गच्छति, श्रीकृष्णः अर्जुनेन सह प्रविशति।)

**श्रीकृष्णः** – भो धर्मराज! समीचीनं न कृतं भवता। पुत्रशोकविह्वलः भीमसेनः एकाकी एव द्रौणिं हन्तुम् अभिधावति।

**युधिष्ठिरः** – भगवन्! सः तु एकाकी एव द्रोणपुत्राय अलम्।

**श्रीकृष्णः** – वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। पितुः द्रोणात् प्राप्तं ब्रह्मशिरो नाम अस्त्रं विद्यते तस्य पार्श्वे। यदि तत् प्रयुज्यते, सर्वा पृथ्वी दग्धा स्यात्।



युधिष्ठिरः – अप्येवम्! आचार्येण कीदृशः अनर्थः कृतः? किं चपलबालकेभ्यः एतादृश–भीषणानाम् अस्त्राणां प्रदानम् उचितम्?

श्रीकृष्णः – शृणु तावत्, आचार्येण तु प्रियशिष्याय अर्जुनाय एव प्रीत्या मनसा ब्रह्मास्त्रशिक्षा प्रदत्ता किन्तु पुत्रप्रेमपराधीनेन तेन अश्वत्थामा अपि तच्छिक्षया वञ्चितः न कृतः।

अर्जुनः – अपरं च, अस्त्रशिक्षाप्रदानात् पूर्वम् आचार्यः पुत्रं सावधानम् अकरोत् यत्–

**परमापद्गतेनापि नैव तात त्वया रणे।**
**इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः॥ 1॥**

युधिष्ठिरः – सम्प्रति आश्वस्तः अस्मि। मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति।

श्रीकृष्णः – तर्हि न जानासि तस्य मनोवृत्तिम्। पितुः उपदेशेन असन्तुष्टः स एकदा द्वारकापुरीम् आगच्छत्। ब्रह्मास्त्रं दत्त्वा सः सुदर्शनचक्रम् अवाञ्छत्।

युधिष्ठिरः – (साश्चर्यम्) कथं चक्रम् इति!

श्रीकृष्णः – आम्! मया कथितम्। नाहं त्वत्तः ब्रह्मास्त्रम् इच्छामि। यदि त्वं मम गदां, शक्तिं, धनुः चक्रं वा इच्छसि, तुभ्यं ददामि।

युधिष्ठिरः – ततस्ततः।

श्रीकृष्णः – सः तु चक्रम् एव अयाचत। गृहाण चक्रम् इति उक्तः सः सव्येन पाणिना चक्रं गृहीतवान्, किन्तु सः तत् चक्रं स्वस्थानात् सञ्चालयितुम् अपि समर्थः न अभवत्।

युधिष्ठिरः – जानीमः भवतः दिव्यां शक्तिम्।

श्रीकृष्णः – तदा अहं नैराश्येन खिन्नं द्रौणिं पृष्टवान्, 'वत्स! किमर्थं त्वम् इदं दिव्यं चक्रं वाञ्छसि?'



युधिष्ठिरः – किम् उक्तं तेन?

श्रीकृष्णः – सः प्रत्यवदत्–

**प्रार्थितं ते मया चक्रं देवदानवपूजितम्।**
**अजेयः स्यामिति विभो! सत्यमेतद् ब्रवीमि ते॥ 2॥**

अतोऽहं ब्रवीमि, तस्मिन् चञ्चले क्रूरे च द्रोणपुत्रे न विश्वसितव्यम्।

(ततः युधिष्ठिरार्जुनौ श्रीकृष्णेन सह रथारोहणं नाटयतः।)

अश्वथामा – रे दुष्ट भीम! त्वम् अद्य वध्योऽसि मया। (विलोक्य) अये कथं श्रीकृष्णार्जुनौ युधिष्ठिरश्च? (स्वगतम्) इदानीं किं करवाणि? आः दृष्टम्, अस्मिन् विषमे समये ब्रह्मास्त्रम् एव मे शरणम्। मोचयामि अस्त्रम्। (ध्यानं नाटयति ब्रवीति च) इदम् अपाण्डवाय।

श्रीकृष्णः – पार्थ पश्य, पश्य। एतद् विमुच्यते ब्रह्मास्त्रं द्रोणपुत्रेण! त्रैलोक्यं दहन् इव प्रचण्डज्वालः अग्निः परितः प्रसरति। अर्जुन! अर्जुन! त्वमपि मुञ्च ब्रह्मास्त्रं एतत् निवारयितुम्।

अर्जुनः – नमः भगवते। स्वस्ति आचार्यपुत्राय, स्वस्ति मे भ्रातृभ्यः। उत्सृज्यते मया ब्रह्मास्त्रम्। अस्त्रम् अस्त्रेण शाम्यताम्।

(ततः प्रविशतः व्यासनारदौ)

**नारदः** – (व्यासं प्रति) पश्यतु भवान्। कोऽयम् अनर्थः क्रियते एताभ्यां वीराभ्याम्। समन्तात् वर्धमानाः प्रचण्डानलशिखाः आकाशं लिहन्ति इव। गगनात् सहस्रशः उल्काः भूमौ पतन्ति। कम्पते खलु सपर्वत-वन-द्रुमा सकला मही। पवनः स्तब्धः जातः। सहस्रांशुः न भासते। शैलाः विदीर्यन्ते। कथमपि एतौ निवारणीयौ, अन्यथा सकलं जगद् ध्वस्तं भविष्यति।

**व्यासनारदौ** – भो वीरौ! संहरतं संहरतम् निजास्त्रे।



**नारदः** – **नानाशस्त्रविदः पूर्वे येऽप्यतीता महारथाः।**
**नैतदस्त्रं मनुष्येषु तैः प्रयुक्तं कथञ्चन॥ 3॥**
**अस्त्रं ब्रह्मशिरो यत्र परमास्त्रेण वध्यते।**
**समाः द्वादश पर्जन्यस्तद् राष्ट्रं नाभिवर्षति॥ 4॥**

**अर्जुनः** – (बद्धाञ्जलिः भूत्वा) भगवन्! मया तु अस्त्रम् अस्त्रेण शाम्यताम् इति कृत्वा अस्त्रं विमुक्तम्। तत् च मया संह्रियते। परन्तु द्रौणेः अस्त्रम् अस्मान् सर्वान् प्रधक्ष्यति एव।

**व्यासः** (द्रौणिं प्रति) अयि द्रोणपुत्र! त्वम् अपि निज-अस्त्रं संहर येन सर्वनाशो न भवेत्।
**पाण्डवास्त्वं च राष्ट्रं च सदा संरक्ष्यमेव हि।**
**तस्मात् संहर दिव्यं त्वमस्त्रमेतन्महाभुज॥ 5॥**

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **[इदम्] अपाण्डवाय** (सं०) (पु०च०ए०व०) | इदं शस्त्रं पाण्डुपुत्राणां विनाशाय (प्रयुज्यते मया), इदं मन्त्रं प्रयुज्य अस्त्रं विमुच्यते। | यह शस्त्र पाण्डवों के विनाश के लिए (प्रयुक्त किया जाता है) इस मन्त्र को बोलकर अस्त्र छोड़ा जा रहा है। | This weapon (is being used) to destroy Pandavas. This was the mantra spoken by Ashwatthama while throwing the missile. |
| **उत्पत्य** (अव्य०)[उत्+पत्+ल्यप्] | उड्डीय | उड़कर | having flown. |
| **उल्काः** (सं०)(स्त्री०प्र०ब०व०) | उल्कापिण्डानि | आग के गोले, दाहक तत्त्व | Fire falling from heaven i.e. meteors. |
| **द्रौणिना** (सं०) (पु०तृ०ए०व०) | द्रोणस्य अपत्यं पुमान्, द्रोण+इञ्-द्रौणिः, द्रोणपुत्रेण | द्रोण के पुत्र अश्वत्थामा के द्वारा | by the son of Drona-Ashwatthama. |
| **निवारणीयौ** (वि०) (पु०प्र० द्वि०व०) [नि+वृ+णिच्+अनीयर्] | रोद्धव्यौ, रोधनीयौ, वर्जनीयौ | उन दोनों को रोकना चाहिए | (both must) be checked. |

| | | | |
|---|---|---|---|
| **पर्जन्यः** (सं०) (पु०प्र०ए०व०) | मेघः | मेघ, बादल, वृष्टि का देवता (इन्द्र) | clouds, lord of rain (Indra). |
| **प्रधक्ष्यति** (क्रि०) (प्र०पु०ए०व०) [प्र+दह्+सन्नन्त+लट्] | प्रज्वालयति | जलाता है | burns. |
| **ब्रह्मशिरः** (सं०) (प्र०ए०व०) | ब्रह्मास्त्रम् | ब्रह्मास्त्र | A weapon named Brahmastram. |
| **युयुत्सते** (क्रि०) (प्र०पु०ए०व०) [युध्+सन्+लट्] | योद्धुम् इच्छति | लड़ना चाहता है | wants to fight. |
| **लिहन्ति** (क्रि०) (प्र०पु०ब०व०) [लिह्+लट्] | लेहनं कुर्वन्ति | चाटते हैं | lick. |
| **वध्यते** (क्रि०) (प्र०पु०ए०व०) [हन्+वध्+यक्+लट्] | हन्यते | मारा जाता है | gets killed (Not in common use). |
| **वारणावते** (सं०) (पु०–नपुं०स०ए०च०) | वारणावतनाम्नि नगरे | एक नगर का नाम, वारणावत में | name of a city, in the city of Varnavata. |
| **विदीर्यन्ते** (क्रि०) (प्र०पु०ब०व०) [वि+दृ+यक्+लट्] | विदीर्णानि भवन्ति | विदीर्ण हो रहे हैं | are being split |
| **विभो** (वि०) (सम्बो०ए०व०) | हे व्यापक, हे विभो, हे शक्तिमन् | हे ईश्वर! | O All pervading lord, O Omnipresent, O God. |
| **वृकोदरः** (पु०प्र०ए०व०) [वृकस्य उदरम् इव उदरं यस्य सः, ब०व्री०] | अतिभोजी | भेड़िये के समान पेट वाला अतिभोजी | Glutton. |
| **वेद** (क्रि०) (प्र०पु०ए०व०) [विद्+लट्] | जानाति | जानता है | knows. |
| **शमयितुम्** (अव्य०) [शम्+णिच्+तुमुन्] | शान्तां कर्तुम् | शान्त करने के लिए | For pacifying. |
| **सञ्चालयितुम्** (अव्य०) [सम्+चल्+णिच्+तुमुन्] | प्रयोक्तुम् | संचालन के लिए | for using, for applying. |
| **संरक्ष्यम्** (वि०) (नपुं०प्र०ए०व०) [सम्+रक्ष्+यत्] | रक्षणीयम् | रक्षा करने योग्य | to be protected. |
| **संरम्भी** (वि०) (पु०प्र०ए०व०) [संरम्भ+इनि] | विक्षुब्धः | हठी, उत्तेजित, जिद्दी | angry, obstinate. |

| | | | |
|---|---|---|---|
| **संहरतम्** (क्रि०) (म०पु०द्वि०व०) [सम्+हृ+लोट्] | प्रतिनिवर्तयतम् | (तुम दोनों अपने-अपने अस्त्रों को) लौटाओ | (both of you) withdraw. |
| **संह्रियते** (क्रि०-कर्मवा०) (प्र० पु०ए०व०) [सम्+हृ+यक्+लट्] | प्रतिनिवर्त्यते, संक्षिप्यते | वापिस लौटाया जाता है | is being withdrawn. |
| **समाः** (सं०) (स्त्री०प्र०ब०व०) [प्रायः बहुवचने प्रयुज्यते] | वर्षाणि | वर्ष | years. |
| **सर्वधर्मविद्** (वि०) (पु०प्र०ए०व०) [सर्वान् धर्मान् वेत्ति, उप०त०पु०] | सर्वधर्मज्ञः | सब धर्मों के ज्ञाता | one who knows all dharmas. |
| **सव्येन पाणिना** (सं०) (पु०तृ०ए०व०) | वामहस्तेन | बाएँ हाथ से | with left hand. |
| **सहस्रांशुः** (सं०)(पु०प्र०ए०व०) [सहस्रम् अंशवः यस्य सः, ब०व्री०] | सूर्यः | सूर्य | One who has thousands of rays i.e. sun. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| अत्रैव | = | अत्र+एव | किञ्चिद् दुर्गमवनम् | = | किञ्चित् +दुर्गमवनम् |
| कश्चित् | = | कः+ चित् | तच्छिक्षया | = | तत्+शिक्षया |
| नैव | = | न+एव | ब्रह्मास्त्रम् | = | ब्रह्म+अस्त्रम् |
| अतोऽहम् | = | अतः+अहम् | वध्योऽसि | = | वध्यः+असि |
| प्रत्यवदत् | = | प्रति+अवदत् | नैतदस्त्रम् | = | न+एतत्+अस्त्रम् |
| ब्रह्मशिरो यत्र | = | ब्रह्मशिरः+यत्र | पर्जन्यस्तद् | = | पर्जन्यः+तत् |
| बद्धाञ्जलिः | = | बद्ध+अञ्जलिः | एतन्महाभुज | = | एतत्+महाभुज |
| स पापकर्मा | = | सः+पापकर्मा | | | |

### सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| अग्निः+इव | = | अग्निरिव | कश्चित्+अपि | = | कश्चिदपि |
| कीदृशः+अनर्थः | = | कीदृशोऽनर्थः | पितुः+उपदेशेन | = | पितुरुपदेशेन |
| असन्तुष्टः+सः | = | असन्तुष्टस्सः | स्तब्धः+जातः | = | स्तब्धो जातः |
| वञ्चितः+न | = | वञ्चितो न | भीमसेनः+एकाकी | = | भीमसेन एकाकी |

# अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत-**

(क) द्रौपद्याः पुत्राः केन हताः ? ......................................

(ख) वारणावते पाण्डवान् कः अरक्षत् ? ......................................

(ग) नकुलः कस्य सारथिः अभवत् ? ......................................

(घ) आपद्गतेन अपि ब्रह्मास्त्रं केषु न प्रयोक्तव्यम् ? ......................................

(ङ) अश्वत्थामा श्रीकृष्णं किम् अयाचत ? ......................................

(च) आकाशात् काः पतन्ति स्म ? ......................................

(छ) कः न भासते स्म ? ......................................

**2. पूर्णवाक्येन उत्तरं लिख्यताम् -**

(क) द्रोणाचार्यः प्रीतः भूत्वा कं ब्रह्मास्त्रम् अशिक्षयत् ?

......................................................................................................................................

(ख) अश्वत्थामा केषां विनाशाय ब्रह्मास्त्रं मोचयति ?

......................................................................................................................................

(ग) भीमसेनः नकुलेन सह कम् अनुगच्छति ?

......................................................................................................................................

(घ) द्रोणपुत्रः श्रीकृष्णात् किं वाञ्छति स्म ?

......................................................................................................................................

(ङ) 'अस्त्रं संहरतम्' इति कौ वदतः ?

......................................................................................................................................

(च) ब्रह्मास्त्रस्य निषेधेन के के संरक्ष्याः सन्ति ?

......................................................................................................................................

**3. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) पापकर्मणा द्रौणिना <u>मे</u> पुत्राः हताः। ......................................

(ख) <u>अस्मिन् संसारे</u> कश्चिदपि त्वया सदृशः नास्ति। ......................................

(ग) न जानाति भवान् द्रौणेः चपलां प्रकृतिम्। ....................................

(घ) आचार्यः पुत्रं सावधानम् अकरोत्। ....................................

(ङ) प्रचण्डज्वालः अग्निः परितः प्रसरति। ....................................

(च) गगनात् सहस्रशः उल्काः भूमौ पतन्ति। ....................................

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'युधिष्ठिरः, भीमः द्रौपदी च रणभूमौ प्रविशन्ति।' अस्मिन् वाक्ये क्रियापदं किम्?

(ख) 'वीरजननी त्वं शोचितुं न अर्हसि।' अत्र किं कर्तृपदम् अस्ति?

(ग) 'आचार्येण कीदृशः अनर्थः कृतः?' अस्मिन् वाक्ये किं विशेष्यपदं प्रयुक्तम्?

(घ) 'गगनात् सहस्रशः उल्काः भूमौ पतन्ति।' अस्मिन् वाक्ये 'धरायाम्' इत्यर्थे किं पदं प्रयुक्तम्?

(ङ) 'सकलं जगद् ध्वस्तं भविष्यति।' अस्मिन् वाक्ये विशेषणपदं किम्?

(च) 'अस्त्रशिक्षाप्रदानात् पूर्वम् आचार्यः पुत्रं सावधानम् अकरोत्।' अत्र 'पश्चात्' इति पदस्य किं विलोमपदं प्रयुक्तम्?

**5. विशेषणानां विशेष्यैः सह मेलनं क्रियताम्–**

| | |
|---|---|
| (क) सव्येन | चक्रम् |
| (ख) पापकर्मणा | समये |
| (ग) देवदानवपूजितम् | उल्काः |
| (घ) सकला | द्रौणिना |
| (ङ) सहस्रशः | पाणिना |
| (च) विषमे | मही |

**6. अधोलिखितेषु पदेषु यत् पदम् अर्थदृष्ट्या भिन्नं तं रेखाङ्कितं कुरुत।**

यथा पर्जन्यः, पयोदः, वारिधरः, पयोधिः।

(क) सहस्रांशुः, हिमांशुः, दिनकरः, भानुः।

(ख) वृक्षाः, द्रुमाः, महीधराः, महीरुहाः।

(ग) पवनः, अनिलः, अनलः, वायुः।

(घ) शैलाः, भूधराः, खेचराः, पर्वताः।

(ङ) नरः, मनुष्यः, पन्नगः, मानवः।

**7. श्लोकमाश्रित्य समुचितक्रमेण अन्वयं पूरयत–**

(क) तात! परम–आपद्गतेन ........................ त्वया रणे इदम् ........................ विशेषतः ........................ न एव ...................... ।

(ख) नाना ...................... ये अपि पूर्वे महारथाः ...................... , तैः ...................... अस्त्रम् ...................... न कथञ्चन प्रयुक्तम्।

(ग) ...................... त्वम् च राष्ट्रम् च ...................... संरक्ष्यम् एव हि, ......................! तस्मात् त्वम् ...................... दिव्यम् अस्त्रम् संहर।

**8. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुनः लिखत–**

(क) इदं दृष्ट्वा अश्वत्थामा ब्रह्मास्त्रं मुञ्चति।

(ख) एतम् अनर्थं दृष्ट्वा नारदव्यासौ तत्रागच्छतः।

(ग) युधिष्ठिरः भीमं नकुलेन सह द्रौणिम् अनुगन्तुं कथयति।

(घ) द्रौणिना द्रौपद्याः भ्रातरः पुत्राः च हताः।

(ङ) इदं दृष्ट्वा अश्वत्थामा ब्रह्मास्त्रं मुञ्चति।

(च) तौ विश्वस्य संरक्षणार्थं दिव्यम् अस्त्रं संहर्तुम् कथयतः।

(छ) श्रीकृष्णः युधिष्ठिरार्जुनाभ्यां सह युद्धक्षेत्रं गच्छति।

(ज) द्रौपदी द्रौणपुत्रं दण्डयितुं कथयति।

**9. रेखाङ्कितपदेषु प्रसङ्गानुसारम् उचितम् अर्थचयनं कुरुत –**

(क) किम् इदं <u>घोरम्</u> आपतितम्।

(i) पत्रम् (ii) भयङ्करम् (iii) दायित्त्वम्

(ख) <u>समीचीनं</u> न कृतं भवता।

(i) घृणितम् (ii) वञ्चनम् (iii) उचितम्

(ग) पवनः <u>स्तब्धः</u> जातः।

(i) आरब्धः (ii) स्थगितः (iii) प्रदूषितः

(घ) <u>सकलं</u> जगत् ध्वस्तं भविष्यति।

(i) समस्तम् (ii) ईश्वरीयम् (iii) अर्धम्

(ङ) द्वादश <u>समाः</u> पर्जन्यः तद् राष्ट्रं नाभिवर्षति।

(i) मासाः (ii) वर्षाणि (iii) दिनानि

(च) <u>पर्जन्यः</u> द्वादश समाः तद् राष्ट्रं नाभिवर्षति।

(i) इन्द्रः (ii) शक्रः (iii) मेघः

## अन्वयः

1. तात! परम-आपद्गतेन अपि त्वया रणे इदम् अस्त्रम् विशेषतः मनुष्येषु न एव प्रयोक्तव्यम्।
2. विभो! अजेयः स्याम् इति मया देवदानव-पूजितम् चक्रम् ते प्रार्थितम्। एतत् ते सत्यम् ब्रवीमि।
3. नाना शस्त्रविदः ये अपि पूर्वे महारथाः अतीताः, तैः एतद् अस्त्रम् मनुष्येषु न कथञ्चन प्रयुक्तम्।
4. यत्र ब्रह्मशिरः अस्त्रम् परम-अस्त्रेण वध्यते, पर्जन्यः द्वादशसमाः तद् राष्ट्रम् न अभिवर्षति।
5. पाण्डवाः त्वम् च राष्ट्रम् च सदा संरक्ष्यम् एव हि, महाभुज! तस्मात् त्वम् एतत् दिव्यम् अस्त्रम् संहर।

## योग्यताविस्तारः

**( न परीक्षाकृते )**

**( क ) कविपरिचयः**

महाभारतं महर्षिवेदव्यासस्य कृतिः। महर्षिः कृष्णद्वैपायनो व्यासः त्रिकालज्ञः सर्वशास्त्रार्थतत्त्वज्ञ आसीत्।

**( ख ) काव्यपरिचयः**

महाभारतं प्रागैतिहासिकं महाकाव्यम्। अस्मिन् विश्वकोशे न केवलं कौरवपाण्डवानां युद्धमेव वर्णितमस्ति अपितु विविधानि पौराणिकानि आख्यानानि, उपदेशप्रदपद्यानि, नीतिसूक्तयः, पुरावृत्तकथा, पशुपक्षिसम्बन्धीनि आख्यानानि, नैतिकं धार्मिकं च विशालं साहित्यं शतसहस्रश्लोकेषु निबद्धं वर्तते। उक्तं हि-यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्।

**( ग ) भावविस्तारः**

1. भारतीयविज्ञानम्

क. प्राचीनकाले न केवलम् आणविकास्त्राणां प्रक्षेपणम् अपि च संहरणमपि ज्ञातमासीत्।

ख. एतेषां दिव्यास्त्राणां प्रयोगः मनुष्येषु वर्जितः आसीत्।

ग. एतेषाम् अस्त्राणां प्रयोगे सति द्वादशवर्षाणि तस्मिन् देशे वृष्टिः न भवेत् इत्यपि तैः ज्ञातमासीत्।

**( घ ) अन्तःप्रसङ्गाः**

**1. वारणावते लाक्षागृहात् पाण्डवानां रक्षा।**

दुर्योधनस्य आदेशेन पुरोचनः वारणावते आग्नेयं लाक्षागृहम् अरचयत्। धृतराष्ट्रः पाण्डवान् वारणावतम् प्रेषितवान्। लाक्षागृहदाहानन्तरं रात्रौ पाण्डवाः माता कुन्ती च चलितुमसमर्था आसन्। तदा महाबली भीमः जननीं स्कन्धमारोप्य नकुलसहदेवौ अङ्केन युधिष्ठिरार्जुनौ च पाणिभ्यां गृहीत्वा सुरङ्गमार्गेण गङ्गामुत्तीर्य वनं प्रविष्टः।

**2. कीचकवधः**

अज्ञातवासे द्रौपदी राज्ञ्याः सुदेष्णायाः सेवायां नियुक्ता आसीत्। राज्ञ्याः भ्राता कीचकः राज्ञः सेनापतिः आसीत्। स द्रौपदीं कुदृष्ट्या पश्यति स्म। अन्ते तस्य वधं कृत्वा द्रौपदीं रक्षितवान्।

**3. अर्जुनाय दिव्यास्त्रप्रदानम्**

**क.** भगवता शङ्करेण दिव्यं पाशुपतमस्त्रं संहारविधिपूर्वकम् अर्जुनाय दत्तम्। अस्य प्रयोगः मानुषेषु नैव कर्तव्यः इति भवान् शङ्करः अपि उपदिष्टवान्।

**ख.** अर्जुनः इन्द्रलोकं गत्वा देवशत्रून् हत्वा दिव्यानि अस्त्राणि प्राप्तवान्। यदा स तेषां प्रदर्शनं कर्तुमिच्छति स्म तदा नारदः आगत्य अवदत् (महाभारतम्–वनपर्व)

**अर्जुनार्जुन मा युङ्क्ष्व दिव्यान्यस्त्राणि भारत।**
**नैतानि निरधिष्ठाने प्रयुज्यन्ते कथञ्चन॥**
**एतानि रक्ष्यमाणानि धनञ्जय! यथागमम्।**
**बलवन्ति सुखार्हाणि भविष्यन्ति न संशयः॥**
**अरक्ष्यमाणान्येतानि त्रैलोक्यस्यापि पाण्डव।**
**भवन्ति स्म विनाशाय मैवं भूयः कृथाः क्वचित्॥**

## भाषाविस्तारः

### 1. विभक्तिप्रयोगः

| | | |
|---|---|---|
| क. | अभितः, परितः, समया, निकषा, प्रति, विना, धिक्, योगे<br>अनु+गम्, अनु+सृ, अनु+धाव्, अनु+वृत् इत्यादीनां योगेऽपि | द्वितीया |
| ख. | साकम्, सार्धम्, समम्, सह, अलम् (मा इत्यर्थे)<br>किं किं क्रियते, किं प्रयोजनम्, कोऽर्थः को गुणः | तृतीया |
| ग. | अलम् (समर्थ इत्यर्थे), दा, क्रुध्, द्रुह्, ईर्ष्य् इत्यादीनां योगे | चतुर्थी |
| घ. | बहिः, जुगुप्सते, विरमति, बिभेति, शिक्षते इत्यादीनां योगे | पञ्चमी |
| ङ. | क्त योगे, यथा रामस्य भाषितम् (संज्ञापदम्), परं रामेण<br>भाषितम् (क्रियापदम्), निर्धारणे इत्यादीनां योगे | षष्ठी |
| च. | स्निह्, अनुरञ्ज्, विश्वस्, अभिलष् योगे | सप्तमी |
| छ. | विना योगे द्वितीया, तृतीया पञ्चमी च भवति। | |

| | | |
|---|---|---|
| **अलम् योगे** | 1. अर्जुनः <u>शत्रुभ्यः</u> अलम्। | चतुर्थी |
| | 2. परमास्त्रं <u>ब्रह्मास्त्राय</u> अलम्। | चतुर्थी |
| **सह योगे** | 1. अर्जुनः <u>युधिष्ठिरेण</u> सह गच्छति। | तृतीया |
| | 2. नकुलः <u>भीमेन</u> सह गच्छति। | तृतीया |
| **विश्वस् योगे** | 1. भीमः <u>द्रोणपुत्रे</u> न विश्वसिति। | सप्तमी |
| | 2. द्रौपदी <u>भीमे</u> न विश्वसिति। | सप्तमी |
| **दानार्थे** | 1. अश्वत्थामा <u>श्रीकृष्णाय</u> ब्रह्मास्त्रं दातुम् इच्छति। | चतुर्थी |
| | 2. शङ्करः <u>अर्जुनाय</u> ब्रह्मास्त्रं यच्छति। | चतुर्थी |

**नमः योगे** 1. नमः आचार्यपुत्राय। चतुर्थी

2. नमः भ्रातृभ्यः। चतुर्थी

**II क. वाक्येषु 'क्त-प्रत्यय स्थाने ' 'क्तवतु' प्रत्ययस्य प्रयोगः**

क. मम प्रियः अर्जुनः अपि चक्रं न याचितवान्।

ख. अहं देवदानवपूजितं चक्रं याचितवान्।

ग. कीदृशम् अनर्थं गुरुः कृतवान्।

घ. अहं तं दृष्ट्वा पृष्टवान्।

ङ. सः किं नु उक्तवान्?

च. अहं तं अस्त्रं शमयितुम् अस्त्रं विमुक्तवान्।

**II ख. वाक्येषु 'क्तवतु-प्रत्यय स्थाने' 'क्त' प्रयोगः**

क. त्वया एव विपद्ग्रस्ता अहम् उद्धृता

ख. पुत्रेण अस्त्रं शिक्षितुं पिता प्रार्थितः।

ग. द्रौणिना मे पुत्राः हताः।

घ. गुरुणा बालकेषु विश्वासः कृतः।

ङ. मया सः उक्तः।

च. तैः कदापि मानुषेषु अस्त्रं न प्रयुक्तम्।

## प्रहेलिका

नान्नं फलं वा खादामि न पिबामि जलं किञ्चित्।
चलामि दिवसे रात्रौ समयञ्च बोधयामि॥

## एहि हसाम

**वस्तुविक्रेता** – गृहस्वामी गृहे अस्ति वा?

**तद्गृहस्य बालः** – अहं दुःखितः, पिता गृहे नास्ति।

**वस्तुविक्रेता** – परन्तु त्वं किमर्थं दुःखितः?

**बालः** – कारणम्, असत्यं वचनं मह्यं न रोचते इति।

सप्तमः पाठः

# साधुवृत्तिं समाचरेत्




**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥**

**श्यामा** – अयि सखि! पश्य पश्य इमां चित्रमयीं प्रहेलिकाम्।

**माधुरी** – दृष्टा मया। अस्यां तु जीवनपथः दृश्यते।

**ऋचा** – आम्। सत्यं वदसि। एषः तु जीवनपथः एव। उपरि प्रवेशस्थानम् अन्ते च गन्तव्यम् 'आनन्दः' इति शब्देन अङ्कितम् अस्ति।

**मीनाक्षी** – आः! एवम्! पश्यामः, केन मार्गेण यात्रा भवेत्?

**माधुरी** – अस्मिन् यात्रापथे तु अनेकाः वीथिकाः सन्ति। वीथिकासु एव चलनीयम्।

**ऋचा** – वीथिकासु अवरोधाः अपि सन्ति। तदा यात्रा कथं भवेत्?

**माधुरी** – पश्य पश्य, अत्र एकः प्रशस्तमार्गः अपि अस्ति।

**श्यामा** – अहम् अपि जानामि। यासु वीथिकासु धैर्यम् उत्साहः स्वाध्यायः सन्तोष आदयः सद्गुणाः लिखिताः सन्ति ताभिः एव गन्तव्यम्। एषः एव वरेण्यः मार्गः। अनेन एव गन्तव्यम्।

**श्लोका** – साधु वदसि। यत्र च क्रोधः, कामः, आलस्यं, कलहः, घृणा, द्वेषः, ईर्ष्या इत्यादयः अङ्किताः सः मार्गः तु हेयः एव।

**आचार्यः** – (प्रविश्य) मया सर्वं श्रुतम्। युष्माभिः युक्तम् एव उक्तम्। प्रशस्तः मार्गः एव अनुसरणीयः। श्रूयतां तावत् कथा– '**साधुवृत्तिं समाचरेत्**'।

सप्तमः पाठः

# साधुवृत्तिं समाचरेत्

अस्ति कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्य-नामधेयः कश्चित् कुमारः। बाल्ये वयसि विद्यापराङ्मुखः स केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि निरतः सञ्जातः। एकदा स दुष्टबुद्धिना सार्धं कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः।



अथ व्रजन्तौ तौ गर्तसङ्कुले मार्गे क्रीडतः कांश्चित् बालकान् प्रेक्ष्य अवदताम्-भो भो बालकाः! कथमत्र नतोन्नते विषमे मार्गे क्रीडथ? यदि कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्। तच्छ्रुत्वा तेषु कश्चित् उद्‌दण्डः बालकः उवाच-अयि भो! यद्येवं तर्हि कथं भवन्तौ सुपथं परित्यज्य अनेन कुपथेन गन्तुं प्रवृत्तौ? अपि इदं श्रेयस्करम्?

अनेन वचसा प्रतिहतान्तःकरणः प्रच्छन्नभाग्यः अचिन्तयत्-किम् इदं वचनं विशेषेण माम् एव लक्ष्यीकरोति? अहो! कुमार्गम् आश्रितस्य मम कीदृशी इयं क्लेशपरम्परा। गुरूपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते। अद्य आरभ्य पापपथं त्यजामि इति विचिन्त्य मित्रं दुष्टबुद्धिम् अवदत् 'सखे! यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्।'

दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत्। प्रच्छन्नभाग्यः तु समुपजातविवेकः स्वगृहं प्रतिनिवृत्तः।

गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत् - आर्य! किं सर्वगतं कुशलं वर्तते? अयथाकालं समागतोऽसि? सम्प्रति धर्ममतिः सः पश्चात्तापेन दग्धमानसः सर्वं वृत्तान्तं निवेद्य सकरुणम् उच्चैः अक्रन्दत्। बुद्धिमती सा अवदत्-अलं चिन्तया। आपदां तरणिः धैर्यम्। इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम्।

क्रन्दनं वर्धते तस्य नान्तं समधिगच्छति।
व्यसनं प्राप्य यो मोहात् केवलं परिदेवयेत्॥ 1॥
जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च॥ 2॥



एवं बहुविधम् उपदेशं श्रुत्वा शान्तचित्तः सः कस्यचित् कृषकस्य शस्यक्षेत्रे हलकार्यं कर्तुं प्रारभत, श्रमेण च शनैः शनैः प्रभूतं धनम् अर्जितवान्।

अथ पूर्वमित्रं दुष्टबुद्धिः प्रच्छन्नभाग्यस्य धनागमवृत्तान्तं श्रुत्वा कदाचित् मध्यरात्रे तस्य एव गृहे चौर्यार्थं सन्धि - खननसुयोगम् विलोकयन् स्थितः। तस्मिन्नेव काले सुप्तोत्थितः प्रच्छन्नभाग्यः सम्भ्रान्तचित्तः स्वपत्नीं सम्बोध्य उवाच-

अहो विचित्रः स्वप्नो मया दृष्टः। अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः

विद्यते इति। तच्छ्रुत्वा परद्रव्ये अनासक्ता सा न्यवेदयत्-नाथ! विरम अस्माद् लोभात्।

दुष्टबुद्धिः तु तयोः वार्तां श्रुत्वा झटिति एव क्षेत्रं गतः। तत्र अश्वत्थमूलं खनित्वा तं सुवर्णकलशं प्राप्तवान्। यदा स तस्य आवरणम् अपसारयति तदैव भयङ्करम् एकं विषधरं फूत्कारं कुर्वन्तं पश्यति। भीतः स कलशं पुनः आवृत्त्य तं च आदाय मित्रस्य गृहं समागतः। स्वमित्रं सर्पेण मारयितुम् इच्छन् सः भित्तौ सन्धिं प्रकल्प्य तन्मध्यतः कलशं गृहाभ्यन्तरे क्षिप्तवान्।



विचित्रा खलु दैवगतिः। पतितात् कलशाद् बहिः निर्गत्य विषधरः तमेव दुष्टबुद्धिं दष्टवान्। कलशपातशब्देन प्रबुद्धौ तौ दम्पती आश्चर्येण प्रचुरमणिमाणिक्यानाम् आभया भासमानं निजगृहं दृष्ट्वा परस्परम् अवलोकयन्तौ अतिष्ठताम्।

अतः उच्यते – पापिनाञ्च सदा दुःखं सुखं वै पुण्यकर्मणाम्।
एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत्॥ 3॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अनासक्ता** (वि०) (स्त्री०प्र०ए०व०) [न आसक्ता, नञ् त०पु०, आ+सञ्ज्+क्त+टाप्] | आसक्तिरहिता | जिसे लगाव नहीं है | detached. |
| **अपसारितवान्** (क्रि०)(पु०प्र०ए०व०) [अप+सृ+णिच्+क्तवतु] | अपनीतवान् | हटाया | uplifted. |
| **अयथाकालम्** (अव्य०) [न यथाकालम्, नञ् त०पु०, कालम् अनतिक्रम्य, अव्ययी०] | असमये | असमय पर | Untimely. |
| **अश्वत्थः** (सं०) (पु०प्र०ए०व०) पिप्पलः [अयम् अहोरात्रं प्राणवायुं प्रयच्छति] | बोधिद्रुमः | पीपल का वृक्ष | Peepal tree. |
| **आवरणम्** (सं०) (नपुं०द्वि०ए०व०) [आ+वृ+ल्युट्] | पिधानम् | ढक्कन | cover. |
| **आवृत्य** (अव्य०) [आ+वृ+ल्यप्] | आच्छाद्य | ढककर | having covered. |
| **उद्दण्डः** (वि०) (पु०प्र०ए०व०) [उत्+दण्डः, उद्गतः दण्डः यस्य सः, ब०व्री०] | उच्छृङ्खलः | शरारती | naughty. |

| | | | |
|---|---|---|---|
| **उन्मीलितम्** (क्रि०) (नपुं०प्र०ए०व०) [उत्+मील्+क्त] | उद्घाटितम् | खोल दिए गये | opened. |
| **गर्तसङ्कुले** (वि०) (पु०प्र०ए०व०) [गर्तैः सङ्कुले, त०पु०] | गर्तव्याप्ते मार्गे | गड्ढों से भरे हुए मार्ग पर | full of patholes (on the road). |
| **तरणिः** (सं०) (स्त्री०प्र०ए०व०) [तृ+अनि] | पाठस्य सन्दर्भे नौका इत्यर्थम्, अन्यः अर्थः सूर्यः | पाठ के सन्दर्भ में नाव, दूसरा अर्थ सूर्य | boat, sun. |
| **दग्धमानसः** (वि०) (पु०प्र०ए०व०) [दह्+क्त, दग्धं मानसं यस्य सः, ब०वी०] | सन्तप्तमनाः | अत्यन्त दुःखी मन वाला | tormented. |
| **दैवगतिः** (सं०) (स्त्री०प्र०ए०व०) [दैवस्य गतिः, ष०त०पु०] | दैव-विपाकः, भाग्यविलासः | भाग्य की चाल, नियति | ways of destiny. |
| **धनागमवृत्तान्तम्** (सं०) (पु०द्वि० ए०व०) [धनस्य आगमस्य वृत्तान्तः, तम्, ष०त०पु०] | धनप्राप्ति-वृत्तान्तम् | धनप्राप्ति की जानकारी को | information regarding receiving of wealth. |
| **नतोन्नते** (वि०) (पु०स०ए०व०) [नतः च उन्नतः च, द्वन्द्वः] | विषमे | ऊँचे-नीचे | uneven. |
| **परिदेवयेत्** (क्रि०) (प्र०पु०ए०व०) [परि+दिव्+णिच्+विधिलिङ्] | विलापं कुर्यात् | क्रन्दन करे | should wail. |
| **पूर्यते** (क्रि०-कर्मवा०) (प्र०पु०ए०व०) [पृ+यक्+लट्] | भ्रियते | भरा जाता है | is filled. |
| **प्रकल्प्य** (अव्य०) [प्र+कल्प्+ल्यप्] | रचयित्वा | बनाकर | having made. |
| **प्रतिनिवृत्तः** (वि०) (पु०प्र०ए०व०) [प्रति+नि+वृत्+क्त] | प्रत्यागच्छत् | वापस आया | returned. |
| **प्रतिहतान्तःकरणः** (वि०) (पुं०पु०ए०व०) [प्रतिहतम् अन्तःकरणं यस्य सः, ब०व्री०] | आहतचित्तः | उद्विग्न मन वाला | with disturbed mind. |
| **प्रारभत** (क्रि०) (प्र०पु०ए०व०) [प्र+रभ्+लङ्] | आरब्धवान् | शुरु किया | started. |
| **भासमानम्** (वि०) (नपुं०द्वि०ए०व०) [भास्+शानच्] | दीव्यत् | चमकते हुए को | glittering. |
| **विद्यापराङ्मुखः** (वि०) (पु०प्र०ए०व०) [विद्यया पराङ्मुखः, तृ०त०पु०] | विद्याविमुखः | विद्या के प्रति रुचि न रखने वाला | one who is not interested in getting educated. |

| | | | |
|---|---|---|---|
| **विलोकयन्** (वि०) (पु०प्र०ए०व०) [वि+लोक्+शतृ] | पश्यन् | देखता हुआ | while seeing (watching). |
| **सन्धिखननसुयोग्यम्** (सं०) (पु०द्वि०ए०व०) [सन्धेः खननस्य सुयोगः तम्, ष०त०पु०] | सन्धि-खननस्य अवसरम् | सेंध लगाने के मौके को | opportunity to make a breach in the wall. |
| **समुपजातविवेकः** (वि०) (पु०प्र०ए०व०) [समुपजातः विवेकः यस्य सः, ब०व्री०] | प्राप्तविवेकः | जिसे भले बुरे को पहचानने की क्षमता प्राप्त हो चुकी हो | having attained the ability of right judgement. |
| **सम्प्रति** (अव्य०) | अधुना | अब | Now. |
| **सम्बोध्य** [सम्+बुध्+णिच्+ल्यप्] | सम्बोधनं कृत्वा | सम्बोधित करके | having addressed (to someone). |
| **सम्भ्रान्तचित्तः** (वि०) (पु०प्र०ए०व०) [सम्भ्रान्तं चित्तं यस्य सः, ब०व्री०] | व्यग्रमनाः | घबराया हुआ | disturbed. |
| **साधुजनगर्हितम्** (वि०) (पु०द्वि०ए०व०) [साधवः च ते जनाः, कर्मधा०, तैः गर्हितम्, तृ०त०पु०] | सज्जनैः निन्दितम् | सज्जनों द्वारा निन्दित | censured by noble person. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| तदैव | = | तदा+एव | भयङ्करम् | = | भयम्+करम् |
| तन्मध्यतः | = | तत्+मध्यतः | गृहाभ्यन्तरे | = | गृह+अभ्यन्तरे |
| पापिनाञ्च | = | पापिनाम्+च | गुरूपदेशेन | = | गुरु+उपदेशेन |

### सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| श्रेष्ठिनः+गेहे | = | श्रेष्ठिनो गेहे | कीदृशी+इयम् | = | कीदृशीयम् |
| गुरूपदेशेन+इव | = | गुरूपदेशेनेव | दुष्टबुद्धिः+तु | = | दुष्टबुद्धिस्तु |
| सः+पश्चात्तापेन | = | स पश्चात्तापेन | उच्चैः+अक्रन्दत् | = | उच्चैरक्रन्दत् |
| त्यक्त्वा+उद्यमः | = | त्यक्त्वोद्यमः | विचित्रः+स्वप्नः | = | विचित्रस्स्वप्नः |
| पुनः+आवृत्य | = | पुनरावृत्य | तम्+च+आदाय | = | तञ्चादाय |

## संयोगः

| | | | | | |
|---|---|---|---|---|---|
| समुन्मीलिते | = | सम्+उन्मीलिते | तमेव | = | तम्+एव |
| समाचरेत् | = | सम्+आचरेत् | किम्+इदम् | = | किमिदम् |
| दुष्टबुद्धिम्+अवदत् | = | दुष्टबुद्धिमवदत् | बहुविधम्+उपदेशम् | = | बहुविधमुपदेशम् |
| आवरणम्+अपसारयति | = | आवरणमपसारयति | माम्+एव | = | मामेव |
| मारयितुम्+इच्छन् | = | मारयितुमिच्छन् | | | |

# अभ्यासः

**1. अधोलिखितान् प्रश्नान् एकपदेन उत्तरत–**

(क) प्रच्छन्नभाग्यः कुत्र अवसत्?

(ख) प्रच्छन्नभाग्यः कम् पापमार्गं त्यक्तुम् अकथयत्?

(ग) प्रच्छन्नभाग्यस्य पत्नी कीदृशी आसीत्?

(घ) आपदां तरणिः किम् अस्ति?

(ङ) पत्न्याः परामर्शेन सः कस्य क्षेत्रे कार्यं प्रारभत?

(च) कीदृशः प्रच्छन्नभाग्यः स्वगृहं प्रत्यागच्छत्?

(छ) सुवर्णपूरितः कलशः कस्य वृक्षस्य मूले स्थितः आसीत्?

**2. अधोलिखितान् प्रश्नान् पूर्णवाक्येन उत्तरत –**

(क) दुष्टबुद्धिः कलशे कम् अपश्यत्?

.......................................................................................................................

(ख) दुष्टबुद्धिः कलशं किमर्थं मित्रस्य गृहे अपातयत्?

.......................................................................................................................

(ग) प्रच्छन्नभाग्यस्य चक्षुषी केन समुन्मीलिते?

.......................................................................................................................

(घ) सर्पः कं दष्टवान्?

.......................................................................................................................

(ङ) नरः कीदृशीं वृत्तिं समाचरेत्?

.......................................................................................................................

(च) कलशपातशब्देन प्रबुद्धौ दम्पती किम् अपश्यताम्?

..........

(छ) परद्रव्ये अनासक्ता बुद्धिमती किं न्यवेदयत्?

..........

**3. अधोलिखितानि वाक्यानि पठित्वा स्थूलपदम् आश्रित्य प्रश्ननिर्माणं क्रियताम्-**

(क) **विषादं** त्यक्त्वा उद्यमः क्रियताम्।

(ख) **जलबिन्दुनिपातेन** क्रमशः घटः पूर्यते। ..........

(ग) कृषकस्य क्षेत्रे **श्रमं** कृत्वा स धनम् अर्जितवान्। ..........

(घ) धैर्यम् **आपदां** तरणिः। ..........

(ङ) नरः **साधुवृत्तिं** समाचरेत्। ..........

(च) प्रच्छन्नभाग्यस्य गृहम् **मणीनाम्** आभया भासमानम् अभवत्। ..........

**4. अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत -**

(क) 'साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्।' वाक्येऽस्मिन् कर्तृपदं किम् अस्ति?

..........

(ख) 'अहो विचित्रः स्वप्नो मया दृष्टः।' अत्र विशेषणपदं किम् अस्ति?

..........

(ग) 'पतितात् कलशाद् बहिः निर्गत्य विषधरः दुष्टबुद्धिं दष्टवान्।' अस्मिन् वाक्ये 'प्रविश्य' इति पदस्य विलोमपदं किं प्रयुक्तम्?

..........

(घ) 'अनेन वचसा प्रतिहतान्तःकरणः प्रच्छन्नभाग्यः अचिन्तयत्।' वाक्येऽस्मिन् क्रियापदं किम् अस्ति?

..........

(ङ) 'गृहे तस्य भार्या सपदि समागतं पतिं दृष्ट्वा अपृच्छत्।' अत्र 'शीघ्रम्' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

..........

(च) 'दुष्टबुद्धिः तु तस्य सद्वचनानि तिरस्कृत्य ग्रामाभिमुखं प्राचलत्।' अस्मिन् वाक्ये 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

..........

(छ) 'विचित्रा खलु दैवगतिः।' अत्र विशेष्यपदं किम् अस्ति?

.............................................................................................

**5. घटनाक्रमानुसारं वाक्यानि पुस्तिकायां लिखत -**

(क) सः पापपथं त्यक्त्वा गृहम् आगच्छत्।

(ख) पत्न्याः परामर्शेन सः परिश्रमं कृत्वा शनैः शनैः प्रभूतं धनम् अर्जितवान्।

(ग) प्रच्छन्नभाग्यः नामकः एकः कुमारः कर्मपुरनगरे अवसत्।

(घ) प्रच्छन्नभाग्यस्य स्वप्नवार्तां श्रुत्वा सः झटिति क्षेत्रम् अगच्छत्।

(ङ) यदा सः सुवर्णकलशस्य आवरणम् अपसारितवान् तदैव तस्मिन् एकं भयङ्करं विषधरं दृष्टवान्।

(च) मार्गे गच्छतः प्रच्छन्नभाग्यस्य मनः केनचित् बालवचसा प्रतिहतम् अभवत्।

(छ) दुष्टबुद्धिः अश्वत्थमूलं खनित्वा सुवर्णकलशं प्राप्तवान्।

(ज) बाल्ये सः दुष्टबुद्धिनाम्ना चौरेण सह चौर्यकर्मणि संलग्नः अभवत्।

(झ) मित्रस्य धनागमवृत्तान्तं श्रुत्वा दुष्टबुद्धिः तस्यैव गृहे चौर्यार्थम् अगच्छत्।

(ञ) पश्चात्तापेन दग्धमानसः सः सर्वं वृत्तान्तं भार्यायै निवेद्य सकरुणम् अक्रन्दत्।

**6. मञ्जूषायां कानिचित् विशेषणानि सन्ति। तानि उपयुक्तपात्रेण सह योजत-**

**मञ्जूषा**

बुद्धिमती, चौरः, कृतघ्नः, विद्यापराङ्मुखः, परिश्रमी, धैर्यवती, समुपजातविवेकः, लोभरहिता, लोभी, शान्तचित्तः, अनासक्ता, ईर्ष्यालुः।

| पात्राणि (विशेष्याणि)- | प्रच्छन्नभाग्यः | दुष्टबुद्धिः | प्रच्छन्नभाग्यस्य पत्नी |
|---|---|---|---|
| यथा- | विद्यापराङ्मुखः | चौरः | बुद्धिमती |
| | .................... | .................... | .................... |
| | .................... | .................... | .................... |
| | .................... | .................... | .................... |
| | .................... | .................... | .................... |

**7. अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह उचितं संयोजनं कृत्वा पुस्तिकायां लिखत-**

| क | ख |
|---|---|
| (क) सखे, यदि मां मित्रस्थाने परिगणयसि तर्हि | (i) बालवचसा मम चक्षुषी समुन्मीलिते |

| | |
|---|---|
| (ख) जलबिन्दुनिपातेन | (ii) प्रभूतं धनम् अर्जितवान्। |
| (ग) स हलकार्यं कृत्वा श्रमेण | (iii) साधुजनगर्हितं पन्थानं त्यजतु भवान्। |
| (घ) बुद्धिमती सा अवदत्–अलं चिन्तया, | (iv) क्रमशः पूर्यते घटः। |
| (ङ) गुरूपदेशेन इव अनेन | (v) आपदां तरणिः धैर्यम्। |

**8. अधोलिखितं कथनं कः कं कथयति –**

| कथनम् | कः | कम् |
|---|---|---|
| **यथा–** कथमत्र नतोन्नते मार्गे क्रीडथ? | प्रच्छन्नभाग्यः दुष्टबुद्धिः च, | बालकान् |
| (क) कथं भवन्तौ सुपथं परित्यज्य कुपथेन गन्तुं प्रवृत्तौ? | ...................... | ...................... |
| (ख) सखे! साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्। | ...................... | ...................... |
| (ग) इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम्। | ...................... | ...................... |
| (घ) अहो विचित्रः स्वप्नो मया दृष्टः। | ...................... | ...................... |
| (ङ) नाथ! विरम अस्माद् लोभात्। | ...................... | ...................... |

**9. मञ्जूषायाः समुचितपदानां चयनं कृत्वा अधो दत्तशब्दानां त्रयः पर्यायाः दीयन्ताम् –**

| | | |
|---|---|---|
| निकेतनम् | अर्थः | चक्षुः |
| भुजगः | अहिः | प्रेक्ष्य |
| द्रविणम् | विलोक्य | वित्तम् |
| परित्यज्य | लोचनम् | विषधरः |
| अक्षि | निशा | सदनम् |
| वीक्ष्य | हित्वा | रजनी |
| शर्वरी | गेहम् | विहाय |

| | | | |
|---|---|---|---|
| (क) रात्रिः | ...................... | ...................... | ...................... |
| (ख) धनम् | ...................... | ...................... | ...................... |
| (ग) सर्पः | ...................... | ...................... | ...................... |
| (घ) दृष्ट्वा | ...................... | ...................... | ...................... |
| (ङ) नेत्रम् | ...................... | ...................... | ...................... |
| (च) त्यक्त्वा | ...................... | ...................... | ...................... |
| (छ) गृहम् | ...................... | ...................... | ...................... |

**10. उदाहरणानुसारं समस्तपदैः वाक्यानि पूरयत–**

**यथा**–(सुवर्णेन पूरितं) सुवर्णपूरितं कलशं प्राप्य प्रच्छन्नभाग्यः विस्मितः अभवत्।

(क) (क्लेशानां परम्परा) ..................... कस्य मानसं न सन्तापयति।

(ख) (गुरोः उपदेशः) ..................... शिष्यस्य कल्याणाय भवति।

(ग) (परेषां द्रव्ये) ..................... आसक्तिः उचिता नास्ति।

(घ) (कलशस्य पातेन) ..................... तस्य निद्राभङ्गः अभवत्।

(ङ) यः नरः (विद्यायाः पराङ्मुखः) ..................... भवति, सः लोके आदरं न लभते।

(च) (साधूनां वृत्तिम्) ..................... आचरेत्।

(छ) (रवेः किरणाः) ..................... (गृहस्य अभ्यन्तरे) ..................... प्रविशन्ति।

**11. अधोलिखितवाक्येषु स्थूलाक्षरपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत –**

(क) सन्धिं प्रकल्प्य कलशं गृहाभ्यन्तरे क्षिप्तवान्।

(i) चिन्तयित्वा (ii) रचयित्वा (iii) कथयित्वा

(ख) प्रचुरमणिमाणिक्यानाम् आभया भासमानं गृहम् अपश्यताम्।

(i) प्रकाशेन (ii) सूर्येण (iii) अग्निना

(ग) आपदां तरणिः धैर्यम्।

(i) सूर्यः (ii) तरणम् (iii) नौका

(घ) झटिति एव क्षेत्रं गतः।

(i) सहसा (ii) शीघ्रम् (iii) विलम्बेन

(ङ) विषादं त्यक्त्वा उद्यमः क्रियताम्।

(i) परिश्रमः (ii) प्रयत्नः (iii) प्रयोगः

## अन्वयः

1. यः व्यसनम् प्राप्य मोहात् केवलम् परिदेवयेत् तस्य क्रन्दनम् वर्धते, अन्तम् (च) न समधिगच्छति।
2. (यथा) जलबिन्दुनिपातेन क्रमशः घटः पूर्यते (तथैव) सर्वविद्यानाम् धर्मस्य च धनस्य च सः (एव) हेतुः।
3. सदा पापिनाम् दुःखम् पुण्यकर्मणाम् च वै सुखम्। एवम् स्थिरतरम् ज्ञात्वा साधुवृत्तिम् समाचरेत्।

# योग्यताविस्तारः

**( न परीक्षाकृते )**

## ( क ) सन्दर्भः

**'साधुवृत्तिं समाचरेत्'** - - पाठः संस्कृतशिक्षामञ्जरीतः (द्वितीयभागात्) सङ्कलितः अस्ति। अस्याः लेखकः श्री जीवानन्द-विद्यासागरभट्टाचार्यः संस्कृतभाषायाः विशिष्टः विद्वान् आसीत्।

लेखकस्य प्रमुखाः रचनाः सन्ति-

काव्यप्रकाशटीका, साहित्यदर्पणटीका, मृच्छकटिकटीका, संस्कृतशिक्षामञ्जरी।

## ( ख ) भावविस्तारः

**अधोलिखितसूक्तयः पठ्यन्ताम्**

1. सुहृदां हितकामानां यः शृणोति न भाषितम्।
   विपत् सन्निहिता तस्य, स नरः शत्रुनन्दनः॥
2. शुभेन पुरुषार्थेन शुभमासाद्यते फलम्।
   अशुभेनाशुभं राम! यथेच्छसि तथा कुरु॥
3. शुभाशुभाभ्यां मार्गाभ्यां वहन्ती वासना सरित्।
   पौरुषेण प्रयत्नेन योजनीया शुभे पथि॥
4. आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः।
   कर्माण्यारभमाणं हि पुरुषं श्रीः निषेवते॥
5. किं कुलेन विशालेन विद्याहीनस्य देहिनः।
   विद्यावान् पूज्यते लोके नाविद्यः परिपूज्यते॥
6. दुर्जनस्य हि सङ्गेन सुजनोऽपि विनश्यति।
   प्रसन्नमपि पानीयं कर्दमैः कलुषीकृतम्॥
7. मैत्रीं सद्भिः कुर्यात् स्नेहं सत्सु तु सर्वथा।
   संसर्गं साधुभिः कुर्यादसत्सङ्गं परित्यजेत्।

## ( ग ) भाषाविस्तारः

**I. अस्ति-कथायाः आरम्भे समागतम् 'अस्ति' — ( पदम् ) भूतकालस्य द्योतकं भवति। यथा-**

1. अस्ति पाटलिपुत्रे महिलारोप्यं नाम नगरम्।
2. अस्ति कर्मपुरनाम्नि नगरे कश्चित् प्रच्छन्नभाग्यः नाम कुमारः।
3. अस्ति धारानगर्यां भोजो नाम भूपालः।
4. अस्ति वाराणस्यां वसुदत्त नाम श्रेष्ठी।

एषु वाक्येषु 'अस्ति' पदस्य 'आसीत्' अर्थः।

**II. अपि-वाक्यस्य आरम्भे 'अपि' शब्दः प्रश्नवाचकः भवति। यथा-**

1. अपि गृहे सर्वं कुशलम्?
2. अपि त्वं रामायणम् अपठः?
3. अपि त्वया सर्वेषां प्रश्नानाम् उत्तराणि दत्तानि?

एषु वाक्येषु 'किम्' पदस्य अर्थे 'अपि' पदं प्रयुक्तम् अस्ति।

### (ग) च्वि प्रत्ययः

च्विप्रत्ययः अभूततद्भावार्थकः भवति, अर्थात् यद् वस्तु पूर्वं तस्मिन् रूपे नासीत्, किन्तु सम्प्रति परिवर्तितं रूपं धारयति, तस्य बोधाय च्विप्रत्ययः प्रयुज्यते।

एषः प्रत्ययः कृ - भू - अस् धातूनाम् एव योगे भवति। प्रक्रियायां प्रत्ययः लुप्तः भवति। पूर्वपदस्य अन्तिमः अकारः आकारः वा ईकाररूपं गृह्णाति। पूर्वपदस्य अन्ते यदि अन्ये स्वराः भवन्ति ते दीर्घाः जायन्ते।

**उदाहरणानि -**

अकृष्णः कृष्णः क्रियते = कृष्णीक्रियते।

(कृष्ण +च्वि + क्रियते = कृष्ण + ई + क्रियते = कृष्णीक्रियते)

| | |
|---|---|
| अपटुः पटुः भवति | पटूभवति |
| अश्यामः श्यामः भवति | श्यामीभवति |
| अलक्ष्यं लक्ष्यं करोति | लक्ष्यीकरोति |
| अश्वेतं श्वेतं करोति | श्वेतीकरोति |

## प्रहेलिका

न तस्यादिः न तस्यान्तः मध्ये यः तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति यदि जानासि तद्वद॥

## एहि हसाम

**वैद्यः** - भवतः अस्वास्थ्यस्य कारणं मशकाः एव। भवान् एतत् लेप्यं लेपयतु। मशकाः भवन्तं न पीडयिष्यन्ति।

**हार्दिकः** - परन्तु वैद्यमहोदय! कथं मशकं गृहीत्वा तदुपरि एतद् लेपयामि इत्येव चिन्ता मम...।

# अष्टमः पाठः

# तिरुक्कुरल्-सूक्ति-सौरभम्



( चेन्नईनगरस्य समुद्रतटः। तत्र तिरुवल्लुवरस्य प्रतिमां दृष्ट्वा छात्राः परस्परं चर्चां कुर्वन्ति।)

**शारदा** – नमिते! पश्य पश्य एतां प्रतिमाम्। मन्ये कोऽपि महाकविः।

**नमिता** – कथं मन्यसे?

**सङ्गीता** – किं न पश्यसि यत् अस्य हस्ते तु पुस्तकम् इव किञ्चित् विराजते।

**आदित्यः** – आम् आम्! किमपि लिखति सः।

**वैभवः** – ननु अत्रैव लिखितम्। एष खलु महाकविः तिरुवल्लुवरः इति।

**सौम्या** – अहो! एष एव महाकविः येन तिरुक्कुरल् इति महान् पावनः ग्रन्थः विरचितः।

**हार्दिकः** – आम्। मम जनकस्तु प्रतिदिनमेव अस्य पाठं करोति। तेन तु अधिकांशपद्यानि कण्ठस्थीकृतानि।

**अधोक्षजः** – अहो स्मरामि! अस्माकं संस्कृतपुस्तके तु अस्य एव ग्रन्थस्य कतिचित् पद्यानि संस्कृतभाषया अनूद्य प्रदत्तानि।

**सर्वे** – तर्हि अवश्यमेव पठिष्यामः तं पाठं ज्ञानवृद्धिं च करिष्यामः।

# अष्टमः पाठः

# तिरुक्कुरल्-सूक्ति-सौरभम्



पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता॥1॥

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
तदेवाहुः महात्मानः समत्वमिति तथ्यतः॥2॥

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥3॥

विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।
अन्येषां वदने ये तु ते चक्षुर्नामनी मते॥4॥

यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः॥5॥

वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।
स केनापि प्रकारेण परैर्न परिभूयते॥6॥

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यादहितं कर्म स परेभ्यः कदापि च॥7॥

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥8॥

# शब्दार्थाः

| | | | |
|---|---|---|---|
| **अकातरः** (वि०) (पु०प्र०ए०व०)<br>[न कातरः, नञ् त०पु०] | वीरः | साहसी, निर्भीक | bold, fearless. |
| **अभ्युदीरयेत्** (क्रि०) (प्र०पु०ए० व०)<br>[अभि+उत्+ईर्+वि०लिङ्] | वदेत् | बोले | should utter, should pronounce, should proclaim. |
| **अवक्रता** (सं०) (स्त्री०प्र०ए०व०)<br>[न वक्रता, नञ् त०पु०] | ऋजुता | सरलता | simplicity. |
| **ईरितः** (वि०) (पु०प्र०ए०व०) [ईर्+क्त] | कथितः, प्रेरितः | प्रेरित किया गया | said, inspired. |
| **क्लेशपरम्परा** (सं०) (स्त्री०प्र०ए०व०)<br>[क्लेशानां परम्परा, ष०त०पु०] | कष्टसमूहः | अनेक कष्ट, दुःख | series of agonies. |
| **तथ्यतः** (अव्य०) [तथ्य+तसिल्] | यथार्थरूपेण | वास्तव में | in reality. |
| **तपः** (सं० तपस्) (नपुं०प्र०ए०व०) | तपस्या | साधना | Penance. |
| **तेपे** (क्रि०) (प्र०पु०ए०व०)<br>[तप् (परस्मै०) लिट्] | तपस्या कृता | तपस्या की | underwent the austerities. |
| **धर्मप्रदाम्** (वि०) (स्त्री०द्वि०ए०व०)<br>[धर्मं प्रददाति इति, उप०त०पु०] | धर्मयुक्ताम् (वाणीम्) | धर्मनिष्ठ वाणी को | righteous speech. |
| **परिभूयते** (क्रि०कर्म०वा०) (प्र०पु०ए०व०)<br>[परि+भू+यक्+लट्] | तिरस्क्रियते | अपमानित किया जाता है | disrespected. |
| **परुषाम्** (वि०) (स्त्री०द्वि०ए०व०)<br>[परुष+टाप्] | कठोराम् (वाचम्) | कठोर, रूखी (वाणी) को | harsh speech. |
| **भुङ्क्ते** (क्रि०) (प्र०पु०ए०व०)<br>[भुज्+लट् (आ०)] | खादति | खाता है | eats. |
| **मन्त्री** (वि०) (पु०प्र०ए०व०)<br>मूलशब्दः मन्त्रिन् | परामर्शदाता | परामर्श देने वाला | advisor, counsellor, minister. |
| **वाक्पटुः** (वि०) (पु०प्र०ए०व०)<br>[वाचि पटुः, स०त०पु०] | सम्भाषणे कुशलः | सम्भाषण में कुशल | eloquent. |
| **वाचि** (सं० वाच्) (स्त्री०स०ए०व०) | वाण्याम् | वाणी में | in the speech. |
| **विमूढधीः** (वि०) (पु०प्र०ए०व०)<br>[वि+मुह्+क्त इति विमूढ, विमूढा धीः यस्य सः, ब०व्री०] | मूर्खः, बुद्धिहीनः | मूर्ख, अज्ञानी | foolish, ignorant. |

# इदमपि जानन्तु

## सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| पिताऽस्य | = | पिता+अस्य | तपस्तेपे | = | तप:+तेपे |
| इत्युक्तिस्तत्कृतज्ञता | = | इति+उक्ति:+तत्कृतज्ञता | भवेद् यदि | = | भवेत्+यदि |
| तदेवाहु: | = | तत्+एव+आहु: | योऽभ्युदीरयेत् | = | य:+अभि+उदीरयेत् |
| भुङ्क्तेऽपक्वम् | = | भुङ्क्ते+अपक्वम् | लोकेऽस्मिन् | = | लोके+अस्मिन् |
| विद्वांस एव | = | विद्वांस:+एव | केनापि | = | केन+अपि |
| भवेद्येन | = | भवेत्+येन | शक्यो भवेत् | = | शक्य:+भवेत् |
| स विवेक इतीरित: | = | स:+विवेक:+इति+ईरित: | वाक्पटुर्धैर्यवान् | = | वाक्पटु:+धैर्यवान् |
| अप्यकातर: | = | अपि+अकातर: | स केनापि | = | स:+केन+अपि |
| परैर्न | = | परै:+न | | | |

## सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| य:+इच्छति+आत्मन: | = | य इच्छत्यात्मन: | कुर्यात्+अहितम् | = | कुर्यादहितम् |
| कदा+अपि | = | कदापि | प्रथम:+धर्म: | = | प्रथमो धर्म: |
| तस्मात्+रक्षेत् | = | तस्माद् रक्षेत् | इति+एतत्+विदुषाम् | = | इत्येद् विदुषाम् |
| सत्+आचारम् | = | सदाचारम् | प्राणेभ्य:+अपि | = | प्राणेभ्योऽपि |

## संयोग:

| | | | | | |
|---|---|---|---|---|---|
| तत्कृतज्ञता | = | तत्+कृतज्ञता | समत्वमिति | = | समत्वम्+इति |
| सभायामपि | = | सभायाम्+अपि | | | |

# अभ्यास:

1. **प्रश्नानाम् उत्तरम् एकपदेन लिखत–**

(क) पिता पुत्राय बाल्ये किं यच्छति?

(ख) मूढमति: कीदृशीं वाचं परित्यजति?

(ग) अस्मिन् लोके के एव चक्षुष्मन्त: प्रकीर्तिता:?

(घ) नर: केन गुणेन कस्यापि कथनस्य तत्त्वार्थनिर्णयं कर्तुं शक्नोति?

(ङ) प्राणेभ्योऽपि किं रक्षणीयम्?

(च) आत्मनः श्रेयः इच्छन् नरः कीदृशं कर्म न कुर्यात्?

(छ) वाचि किं भवेत्?

(ज) पाठे 'वाचि पटुः' इति स्थाने किं पदं प्रयुक्तम्?

**2. अधोलिखितप्रश्नाम् उत्तराणि पूर्णवाक्येन लिखत –**

(क) पुत्रः पितरं प्रति किम् अनुभवेत्?

.......................................................................................................................

(ख) आत्मनः हितम् इच्छन् नरः किं कुर्यात्?

.......................................................................................................................

(ग) मूर्खबुद्धिः जनः कीदृशीं वाणीं त्यजति?

.......................................................................................................................

(घ) विदुषां वचः किम्?

.......................................................................................................................

(ङ) वस्तुतः लोके चक्षुष्मन्तः के कथिताः?

.......................................................................................................................

(च) महात्मानः समत्वं किं कथयन्ति?

.......................................................................................................................

(छ) विवेकी जनः कस्य तत्त्वार्थनिर्णयं कर्तुं शक्नोति?

.......................................................................................................................

(ज) कीदृशः जनः परैः न तिरस्क्रियते?

.......................................................................................................................

**3. स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

(क) **विमूढधीः** पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते।

(ख) संसारे विद्वांसः **ज्ञानचक्षुभिः** नेत्रवन्तः कथ्यन्ते। ..................................

(ग) जनकेन सुताय **शैशवे** विद्याधनं दीयते। ..................................

(घ) तत्त्वार्थस्य निर्णयः **विवेकेन** कर्तुं शक्यते। ..................................

(ङ) **साधूनां** चित्ते वाचि च सरलता भवति। ..................................

(च) **धैर्यवान्** लोके परिभवं न प्रप्नोति। ..................................

(छ) **आत्मकल्याणम्** इच्छन् नरः परेषाम् अनिष्टं न कुर्यात्। ..................................

**4. यथानिर्देशम् उत्तरत –**

(क) 'भुङ्क्ते' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम्?

(ख) 'परुषाम्' इति विशेषणस्य किं विशेष्यपदं पाठे प्रयुक्तम्?

(ग) 'अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।' अस्मिन् वाक्ये किं क्रियापदं प्रयुक्तम्?

(घ) 'य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।' इत्यस्मिन् वाक्ये 'कल्याणम्' इति पदस्य किं पर्यायपदं प्रयुक्तम्?

(ङ) 'अल्पानि' इति पदस्य किं विलोमपदं पाठे प्रयुक्तम्?

**5. अधोलिखितानां शब्दानां पुरतः उचितं विलोमशब्दं कोष्ठकात् चित्वा लिखत –**

| | शब्दः | विलोमशब्दः | |
|---|---|---|---|
| (क) | कृतज्ञता | .................................. | (कृपणता, कृतघ्नता, कातरता) |
| (ख) | पक्वः | .................................. | (परिपक्वः, अपक्वः, क्वथितः) |
| (ग) | परुषा | .................................. | (पौरुषी, कोमला, कठोरा) |
| (घ) | विमूढधीः | .................................. | (सुधीः, निधिः, मन्दधीः) |
| (ङ) | आलस्यम् | .................................. | (उद्विग्नता, विलासिता, उद्योगः) |
| (च) | कातरः | .................................. | (अकरुणः, अधीरः, अकातरः) |

**6. अधोलिखितानां शब्दानां त्रयः समानार्थकाः शब्दाः शब्दमञ्जूषायाः चित्वा लिखत –**

**शब्दमञ्जूषा**

| | | |
|---|---|---|
| वदनम्<br>मनः<br>संसद्<br>लोचनम्<br>शुभम्<br>आननम् | नयनम्<br>कल्याणम्<br>भूरि<br>वक्त्रम्<br>मानसम्<br>विपुलम् | चेतः<br>बहु<br>नेत्रम्<br>समितिः<br>शिवम्<br>परिषद् |

(क) चित्तम् ...................... ...................... ......................

(ख) मुखम् ...................... ...................... ......................

(ग) प्रभूतम् .................... .................... ....................

(घ) चक्षुः .................... .................... ....................

(ङ) सभा .................... .................... ....................

(च) श्रेयः .................... .................... ....................

**7. पाठात् विचित्य समुचितैः विशेषणपदैः रिक्तस्थानानि पूरयत–**

(क) .................... .................... .................... मन्त्री परैः न परिभूयते।

(ख) बुद्धिमान् सदा .................... एव वाचं वदति।

(ग) यः सुखानि इच्छति सः .................... कर्म त्यजेत्।

(घ) पुत्रः शैशवे पितुः .................... विद्याधनं प्राप्नोति।

(ङ) .................... .................... आचारः इति विद्वांसः मन्यन्ते।

**8. पाठात् चित्वा अधोलिखितपद्यांशानां भावम् उपयुक्तपदैः पूरयत –**

(क) चित्ते वाचि च सरलता महात्मभिः .................... मन्यते।

(ख) पिता पुत्राय विद्यादानार्थं महत् कष्टं सहते। पुत्रेण अस्य अनुभूतिः एव .................... कथ्यते।

(ग) .................... एव धर्मप्रदां वाचं त्यक्त्वा .................... वाचं वदति।

(घ) अस्मिन् संसारे केवलं .................... एव .................... मन्तव्याः।

(ङ) प्रत्येकं कथनस्य .................... येन क्रियते सः .................... अस्ति।

(च) यः मन्त्री (परामर्शदाता) तु .................... .................... .................... भवति स अन्यैः कदापि न तिरस्क्रियते।

**9. पाठात् चित्वा अधोलिखितानां श्लोकानाम् अन्वयम् उचितपदक्रमेण पूरयत –**

(क) पिता पुत्राय बाल्ये महत् .................... यच्छति, अस्य पिता किम् .................... तेपे, इत्युक्तिः .................... ।

(ख) येन केनापि यत् .................... तस्य तत्त्वार्थनिर्णयः येन .................... शक्यः भवेत्, सः .................... इति ईरितः।

(ग) य आत्मनः श्रेयः .................... सुखानि च इच्छति, सः परेभ्यः अहितम् .................... कदापि च न .................... ।

10. मञ्जूषायाः तद्भावात्मकसूक्तीः विचित्य अधोलिखितकथनानां समक्षं लिखत –

(क) विद्याधनं महत्

..........................................................................................

..........................................................................................

(ख) आचारः प्रथमो धर्मः

..........................................................................................

..........................................................................................

(ग) चित्ते वाचि च अवक्रता एव समत्वम्

..........................................................................................

..........................................................................................

**मञ्जूषायाः सूक्तयः**

आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत्।
मनसि एकं वचसि एकं कर्मणि एकं महात्मनाम्।
विद्याधनं सर्वधनप्रधानम्।
सं वो मनांसि जानताम्।
विद्याधनं श्रेष्ठं तन्मूलमितरद्धनम्।
आचारप्रभवो धर्मः सन्तश्चाचारलक्षणाः।

11. अधस्ताद् समासविग्रहाः दीयन्ते तेषां समस्तपदानि पाठाधारेण दीयन्ताम्–

| | विग्रहः | समस्तपदम् | समासनाम |
|---|---|---|---|
| (क) | तत्त्वार्थस्य निर्णयः | .................................. | षष्ठी तत्पुरुषः |
| (ख) | वाचि पटुः | .................................. | सप्तमी तत्पुरुषः |
| (ग) | धर्मं प्रददाति इति (ताम्) | .................................. | उपपदतत्पुरुषः |
| (घ) | न कातरः | .................................. | नञ् तत्पुरुषः |
| (ङ) | न हितम् | .................................. | नञ् तत्पुरुषः |

(च) महान् आत्मा येषाम् ते ................................ बहुव्रीहिः

(च) विमूढा धीः यस्य सः ................................ बहुव्रीहिः

**12. अधोलिखितेषु भिन्नप्रकृतिकं शब्दं रेखाङ्कितं कुरुत–**

(क) तपः, धर्मः, श्रेयः, वचः। (लिङ्गकारणात्)

(ख) तथ्यतः, विशेषतः, मुख्यतः, ईरितः। (प्रत्ययकारणात्)

(ग) लघुता, प्रकीर्तिता, अवक्रता, कृतज्ञता (प्रत्ययकारणात्)

(घ) लोके, चित्ते, वाचि, भुङ्क्ते। (विभक्तिकारणात्)

**13. अधोलिखितवाक्येषु स्थूलाक्षरपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत –**

(क) य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।

(i) श्रेष्ठः (ii) कल्याणम् (iii) सम्पत्तिम्

(ख) तदैव आहुः महात्मानः समत्वमिति तथ्यतः।

(i) कथयन्ति (ii) शृण्वन्ति (iii) चिन्तयन्ति

(ग) वाक्पटुः धैर्यवान् मन्त्री सभायामप्यकातरः परैः न परिभूयते।

(i) निपुणः (ii) उत्तमः श्रोता (iii) वाक्कुशलः

(घ) त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।

(i) कठोराम् (ii) कोमलाम् (iii) प्रयुक्ताम्

(ङ) स विवेक इति ईरितः।

(i) दृष्टः (ii) कथितः (iii) श्रुतः

## अन्वयः

1. पिता पुत्राय बाल्ये महत् विद्याधनम् यच्छति। अस्य (पुत्रस्य) पिता किम् तपः तेपे इति उक्तिः तत्कृतज्ञता।
2. यथा अवक्रता चित्ते तथा यदि वाचि भवेत्, महात्मानः तथ्यतः तदेव समत्वम् इति आहुः।
3. यः धर्मप्रदाम् वाचम् त्यक्त्वा परुषाम् (वाचम्) अभ्युदीरयेत्। (सः) विमूढधीः पक्वम् फलम् परित्यज्य अपक्वम् (फलम्) भुङ्क्ते।
4. अस्मिन् लोके विद्वांसः एव चक्षुष्मन्तः प्रकीर्तिताः। अन्येषाम् वदने ये (चक्षुषी) ते तु चक्षुर्नामनी मते।
5. येन केन अपि यत् प्रोक्तम् तस्य तत्त्वार्थनिर्णयः येन कर्तुम् शक्यः भवेत्, सः विवेकः इति ईरितः।
6. (यः) मन्त्री वाक्पटुः, धैर्यवान्, सभायाम् अपि अकातरः (अस्ति) सः परैः केन अपि प्रकारेण न परिभूयते।
7. यः आत्मनः श्रेयः प्रभूतानि सुखानि च इच्छति, सः परेभ्यः अहितम् कर्म कदापि न कुर्यात्।
8. आचारः प्रथमः धर्मः इति एतत् विदुषाम् वचः, तस्मात् प्राणेभ्यः अपि सदाचारम् विशेषतः रक्षेत्।

# योग्यताविस्तारः

( न परीक्षाकृते )

**( क ) 'तिरुक्कुरल् - सूक्तिसौरभम्' इति पाठस्य तमिळ मूलपाठः ( देवनागरी लिपौ )**

सोर्कोट्टम् इल्लदु सेप्पुम् ओरू तलैया उहळूकोट्टम् इन्मै पेरिन्।
मगन् तन्दैक्काट्रुम् उद्रवि इवन् तन्दै एन्नोट्रान् कौमू एन्नुम् सोक्त।
इनिय उळवाग इन्नाद कूरल् कनि इरूप्पक् काय् कवरंदट्र।
कण्णुडैयर् एन्पवर् कट्रोर मुहत्तिरण्डु पुण्णुडैयर कल्लादवर्।
एप्पोरूल यार यार केट्रपिनुम् अप्पोरूल मेय् पोरूल काण्पदरिवु।
सोललवल्लन् सोरविलन् अन्जान् अवनै इहलवेल्लल् यारुक्कुम् अरितु।
नोय एल्लाम् नोय् सेयदार मेलवाम् नोय् सेययार नोय् इन्मै वेण्डुभवर्।
ओषुक्कम् विषुप्पम् तरलान् ओषुक्कम् उयिरिनुम् ओम्भप्पडुम्।

**( ख ) ग्रन्थपरिचयः**

तिरुक्कुरल् तमिलभाषायां रचिता तमिलसाहित्यस्य उत्कृष्टा कृतिः अस्ति। अस्य प्रणेता तिरुवल्लुवरः अस्ति।

ग्रन्थस्य रचनाकालः अस्ति-ईशवीयाब्दस्य प्रथमशताब्दी।

अस्मिन् ग्रन्थे सकलमानवजातेः कृते जीवनोपयोगि सत्यं प्रतिपादितम्।

तिरु शब्दः 'श्री' वाचकः। 'तिरुक्कुरल्' पदस्य अभिप्रायः अस्ति श्रिया युक्तं कुरल् छन्दः अथवा श्रिया युक्ता वाणी।

अस्मिन् ग्रन्थे धर्म-अर्थ-काम-संज्ञकाः त्रयः भागाः सन्ति। त्रयाणां पद्यसंख्या 1330 अस्ति।

**( ग ) भावविस्तारः**

**सदाचारः**

किं कुलेन विशालेन शीलमेवात्र कारणम्।
कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु॥
आगमानां हि सर्वेषामाचारः श्रेष्ठ उच्यते।
आचारप्रभवो धर्मो धर्मादायुर्विवर्धते॥

**विद्याधनम्**

विद्याधनं धनं श्रेष्ठं तन्मूलमितरद्धनम्।
दानेन वर्धते नित्यं न भाराय न नीयते।
माता शत्रुः पिता वैरी येन बालो न पाठितः।
न शोभते सभामध्ये हंसमध्ये बको यथा॥

## मधुरा वाक्

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता॥
वाणी रसवती यस्य यस्य श्रमवती क्रिया।
लक्ष्मीः दानवती यस्य सफलं तस्य जीवितम्।

## विद्वांसः

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम्।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति॥
विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते॥

## प्रहेलिका

कं सञ्जघान कृष्णः का शीतलवाहिनी गङ्गा।
के दारपोषणरताः कं बलवन्तं न बाधते शीतम्॥

## एहि हसाम

कश्चन ग्रामीणः नेत्रपरीक्षणार्थं नेत्रवैद्यसमीपं गतः। वैद्यः तं सम्यक् परीक्ष्य – ''उपनेत्रं धर्तव्यं भवता। तदा दृष्टिशक्तिः सम्यक् भविष्यति ततः पठनादिषु न क्लेशः'' इति अवदत्।

''उपनेत्रधारणाद् अनन्तरं किम् अहं पठितुम् अपि शक्नुयाम्?'' इति साश्चर्यम् अपृच्छत् ग्रामीणः।

''आम्, निश्चयेन। तत्र सन्देहः एव नास्ति'' – वैद्यः अवदत्।

तदा ग्रामीणः अवदत् – ''धन्यवादाः! महते उपकाराय एतत्। मया इतः पूर्वम् अक्षराभ्यासः अपि न कृतः आसीत्। इतः परं तु अक्षराभ्यासं विनैव पठनसामर्थ्यं भवेत् मम।''

नवमः पाठः

# सुस्वागतं भो! अरुणाचलेऽस्मिन्



अरुणाचलप्रदेशस्य एकस्मिन् विद्यालये अद्य उत्सवस्य वातावरणम्। सुसज्जिते प्रवेशद्वारे सुन्दरैः अक्षरैः लिखितम्– 'स्वागतं कुर्मः'। तदैव छात्राणाम् एकः दलः तत्र प्रविशति। तेषां स्वागताय प्रवेशद्वारम् उभयतः स्थितः बालसमूहः मधुरस्वरेण गायति–

**यः सप्तराज्येषु विभासमानः,**
**तरङ्गिणी यत्र च लोहिताख्या।**
**'ईटा' हि यस्यास्ति पुरी प्रधाना,**
**सुस्वागतं भो! अरुणाचलेऽस्मिन्॥**

(तदैव विद्यालयस्य प्रधानाचार्यः तत्र आगच्छति।)

**प्रधानाचार्यः** – अस्मिन् मनोरमे अरुणाचलप्रदेशे भवतां सर्वेषां हार्दिकं स्वागतम्।

**छात्राः** – अनुगृहीताः वयम्। अस्य मनोहरप्रदेशस्य विषये ज्ञातुं समुत्सुकाः स्मः।

**प्रधानाचार्यः** – जानामि। एतदर्थमेव सभागारे प्रदेशस्य मान्यः पर्यटनाधिकारी युष्मान् प्रतीक्षते। आगम्यतां तत्र एव चलामः।

नवमः पाठः

# सुस्वागतं भो! अरुणाचलेऽस्मिन्

(विद्यालयस्य सभागारः। मञ्चे विद्यालयस्य प्रधानाचार्यः, प्रदेशस्य पर्यटनाधिकारी केचित् अध्यापकाः च उपविष्टाः सन्ति।)

**पर्यटनाधिकारी** – (ध्वनिविस्तारकयन्त्रस्य समीपम् आगत्य) प्रियच्छात्राः। अभिनन्दनं भवताम् अस्मिन् प्रदेशे। प्रसीदामि यत् भवन्तः अस्य रम्यस्य प्रदेशस्य विषये ज्ञातुम् अति उत्सुकाः। एतदर्थं स्थलानां दर्शनाय प्रबन्धः अपि वर्तते परन्तु सम्प्रति प्रश्नोत्तरमाध्यमेन भवतां जिज्ञासां शमयितुम् इच्छामि। प्रथमं तु अहम् एव एकं प्रश्नं पृच्छामि। अस्य प्रदेशस्य नाम 'अरुणाचलः' कथं जातम्? अनुमीयताम्।

**हिमांशुः** – अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः। अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति। अतः अरुणस्य प्रदेशः अरुणाचलः।

**पर्यटनाधिकारी** – शोभनम्। उचितम् उक्तम्। हिमाद्रितुङ्गशृङ्गैः सुशोभिता सूर्योदयभूमिः इयम्। अतः अरुणाचलः। अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्यः प्रवहन्ति। विपुला च अत्र वनसम्पदा। वनौषधीनां तु अयं स्रोतः एव। पुष्पाणां समृद्धिः सुगन्धिः च मनोहरः। सर्वत्र हरीतिमा। शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रत्युत संस्कृतिः अपि।

**सर्वे** – एवम् ----------

**सुधाकरः** – अस्य प्रदेशस्य राजधानी का?

**पर्यटनाधिकारी** – 'ईटानगरम्' अस्य प्रदेशस्य राजधानी।

**श्यामा** – महोदय! अत्रत्यजनजातीनां कानि प्रमुखानि आजीविका-साधनानि?

**पर्यटनाधिकारी** – कृषिः शिल्पकला वनसम्पद् चैव एतेषां प्रमुखानि आजीविकासाधनानि।

**रविः** – मान्यवर! अस्य प्रदेशस्य प्रमुखाः उत्सवाः के?

**पर्यटनाधिकारी** – साधु पृष्टम्। अत्र अनेके प्रमुखोत्सवाः। 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति। एतत् तु फरवरी इति मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते। 'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देवः 'मोपीन' इति कथ्यते। 'होली' सदृशम् एव पर्व इदम्। जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति। इदम् 'अप्रैल' इति मासे मान्यते। 'ओणम्' पर्वसमं 'साडकेन' एकम् अन्यत् पर्व अस्ति। लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व अपि 'फरवरी' इति मासे सम्पद्यते।

**हिमांशुः** – अस्माभिः 'मिथुन' इति विषये अपि किञ्चित् श्रुतम्। किं तत्?

**पर्यटनाधिकारी** – 'मिथुनः' गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति।

**शोभा** – वयम् अत्रत्यानाम् ऐतिहासिकस्थलानां विषये ज्ञातुम् इच्छामः।


चीन
चीन
चीन
नागालैंड
दिबांग वैली जिला
अनिनी
वेस्ट सियांग जिला
अपर सियांग जिला
इंकियांग
ईस्ट सियांग जिला
लोहित जिला
अपर सुबंसिरी जिला
दापोरिजो
अलोंग
लोअर सुबंसिरी जिला
तेजू
पासीघाट
तिब्बत
जीरो
ईस्ट कामेंग जिला
तवांग जिला
तवांग
वेस्ट कामेंग जिला
सेप्पा
चांगलांग जिला
दिरांग
बोमडीला
पापुमपारे जिला
चांगलांग
खोंसा
तिरप जिला
बर्मा
उ
नागालैंड
असम
अरुणाचल प्रदेश

**पर्यटनाधिकारी** – मया पूर्वम् एव उक्तं यत् अस्य प्रदेशस्य दर्शनीयस्थलानां दर्शनाय विशेषः प्रबन्धः अपि अस्ति। अधुना तु वयम् अनेन प्रक्षेपकयन्त्रेण केषाञ्चित् स्थलानां परिचयं प्राप्स्यामः। पश्यत एतत् चित्रम्।

**राजीवः** – किम् एतत् कस्यचित् दुर्गस्य चित्रम्?

**पर्यटनाधिकारी** – आम्! एतत् दिवाङ्ग-उपत्यका-मण्डले स्थितं भीष्मकनगरदुर्गम्! अस्य अवशेषाः तु आर्यकला-संस्कृति-सम्पदः परिचायकाः। अधुना इदं चित्रं पश्यत।



**शैलेशः** – अहं जानामि इदं स्थानम्! इदं तु 'तवाङ्ग गोम्पा' इति प्रसिद्धः बौद्धमठः।

**पर्यटनाधिकारी** – सम्यक् अभिज्ञातम्! मनोहरे सुरम्ये 'तवाङ्ग' इति स्थले राजते अयं बौद्धमठः। पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थली इयम्। लोहितजनपदे अपि अनेकबौद्धविहाराः सन्ति।

**नीलिमा** – मान्यवर! मया अस्य प्रदेशस्य 'परशुरामकुण्डम्' इति दर्शनीयस्थलविषये अपि पठितम्! किम् इदम्?

**पर्यटनाधिकारी** – आम्! एतत् कुण्डं तु लोहितनद्याः किञ्चिद् दूरे अस्ति। पूर्वम् इदं ब्रह्मकुण्डम् आसीत्। इदं लोहितनद्याः उद्गमस्थलम् इति मन्यते। अत्र अनेकानि अन्यानि दर्शनीयानि स्थलानि अपि सन्ति। अस्माकं पर्यटनविभागेन प्रकाशितां केषाञ्चित् प्रसिद्धस्थलानां सूचीं पठित्वा ज्ञायताम् इमानि पर्यटनस्थलानि--

| पर्यटनस्थलम् | स्थानम् |
|---|---|
| मालिनीथान-मन्दिरम् | पश्चिमी-सियाङ्ग-मण्डलम् |
| भालुकपोङ्ग-उपक्षेत्रम् | पूर्व-कामेङ्ग-मण्डलम् |
| ईटानगरदुर्गम् | ईटा-नगरम् |
| आकाशी-गङ्गा | अलोङ्गे-मार्गः |
| चोरतेनस्तूपः | जिमिथाङ्ग-गोलकम् |
| विजयनगरस्तूपः | मियाव-गोलकम् |
| ताम्रेश्वरी-मन्दिरम् | लोहित-मण्डलम् |
| शिवलिङ्गगुहा | सुम्बसिरी-मण्डलम् |

**अभयारण्यानि**

ईटानगर-वन्य-जीव-उद्यानम्
पखुई-वन्य-जीव-उद्यानम्
इरिङ्ग-स्मारक-वन्य-जीव-उद्यानम्
ईगलनेस्ट-वन्य-जीव-उद्यानम्
नामदफा-राष्ट्रिय-उद्यानम्

**सर्वे** – अधुना तु वयम् एतानि स्थलानि द्रष्टुम् उत्सुकाः स्मः।

**प्रधानाचार्यः** – शोभनम्। एतेषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते। कार्यक्रमस्तु सुनिश्चितः। जलपानाद् अनन्तरं गमिष्यामः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अनुगृहीताः** (वि०)(प्र०ब०व०) [अनु+ग्रह्+क्त] | कृतार्थाः | अनुगृहीत किए गये | favoured, obliged. |
| **अनुमीयताम्** (क्रि०) (प्र०पु०ए०व०) [अनु+मी+यक्+लोट्] | अनुमानं कुरुत | अनुमान कीजिए | guess. |
| **अभिज्ञातम्** (क्रि०) (नपुं०प्र०ए०व०) [अभि+ज्ञा+क्त] | विद्धम् | पहचाना गया | recognised. |
| **उपत्यका** (सं०) (स्त्री०प्र०ए०व०) | पर्वतस्य निम्नभूभागः | पर्वत की तलहटी | valley. |

| | | | |
|---|---|---|---|
| **जिज्ञासाम्** (सं०) (द्वि०ए०व०) [ज्ञा+सन्+अ+टाप्] | ज्ञानेप्सा, ज्ञानेच्छा | कुतूहल | anxiety to know. |
| **ध्वनिविस्तारयन्त्रम्** (सं०) (नपुं०प्र०ए०व०) [ध्वने: विस्तारस्य यन्त्रम्, ष०त०पु०] | ध्वनिप्रवर्धकम् | ध्वनि विस्तारकयन्त्र | The loud speaker. |
| **पर्यटनाधिकारी** (सं०) (पु०प्र०ए०व०) [पर्यटनस्य अधिकारी, ष०त०पु०] | पर्यटनप्रमुख: | पर्यटन अधिकारी | Tourist officer. |
| **पर्यावरणम्** (सं०) (नपुं०प्र०ए०व०) [परि+आ+वृ+ल्युट्] | प्रकृते: परिवेश: | प्राकृतिक परिवेश | environment. |
| **प्रक्षेपकयन्त्रेण** (सं०) (तृ०ए०व०) [प्रक्षेपकस्य यन्त्रेण, ष०त०पु०] | प्रकाशप्रक्षेपणयन्त्रेण | प्रक्षेपकयन्त्र से | by Projector. |
| **प्रतीक्षते** (क्रि०) (प्र०पु०ए०व०) [प्रति+ईक्ष्+लट्] | प्रतीक्षां करोति | प्रतीक्षा करता है | waits upon. |
| **प्रत्युत** (अव्य०) | किन्तु | बल्कि | but. |
| **मञ्चे** (सं०) (पु०स०ए०व०) [मञ्च+घञ्] | मञ्चस्य उपरि | मञ्च पर | on the stage. |
| **लिम्पन्ति** (क्रि०) (प्र०पु०ब०व०) [लिम्प्+लट्] | लेपनं कुर्वन्ति | लीपते हैं, पोतते हैं | anoint. |
| **विभासमान:** (वि०) (पु०प्र०ए०व०) [वि+भास्+शानच्] | शोभमान:, प्रकाशित: | सुशोभित | shining. |
| **शालिचूर्णम्** (सं०) (नपुं०प्र०ए०व०) [शाले: चूर्णम्, ष०त०पु०] | अक्षतचूर्णम् | चावल का आटा | Rice-flour. |
| **शिल्पम्** (सं०) (नपुं०प्र०ए०व०) | कलाकृति: | कला | art or craft. |
| **समुत्सुका:** (वि०) (पु०प्र०ए०व०) | उत्साहयुक्ता:, उत्कण्ठिता: | अत्यन्त इच्छुक | Anxiously desirous. |
| **सुरम्यम्** (वि०) (नपुं०प्र०ए०व०) [सु+रम्+यत्] | सुन्दरम् | आनन्ददायक, सुन्दर | pleasant. |
| **सेतुनिर्माणम्** (सं०) (द्वि०ए०व०) [सेतो: निर्माणम्, ष०त०पु०] | आलिनिर्माणम् | पुल अथवा बान्ध का निर्माण | Construction of the bridge or dam. |
| **हिमाद्रितुङ्गशृङ्गै:** (सं०) (तृ०ब०व०) [हिमस्य अद्रि:, ष०त०, तुङ्गानि शृङ्गाणि तुङ्गशृङ्गाणि, कर्मधा०, हिमाद्रे: तुङ्गशृङ्गाणि तै:, ष०त०] | हिमालयशिखरै: | हिमालय की उन्नत चोटियों से | by the elevated peaks of Himalayas. |

# इदमपि जानन्तु

## सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| अरुणाचलेऽस्मिन् | = | अरुणाचले+अस्मिन् | पर्यटनाधिकारी | = | पर्यटन+अधिकारी |
| प्रियच्छात्राः | = | प्रिय+छात्राः | एतदर्थम् | = | एतत्+अर्थम् |
| प्रश्नोत्तरमाध्यमेन | = | प्रश्न+उत्तरमाध्यमेन | अरुणाचलः | = | अरुण+अचलः |
| हिमाद्रितुङ्गशृङ्गैः | = | हिम+अद्रितुङ्गशृङ्गैः | सूर्योदयभूमिः | = | सूर्य+उदयभूमिः |
| पञ्चाशदधिकाः | = | पञ्चाशत्+अधिकाः | वनौषधीनाम् | = | वन+ओषधीनाम् |
| प्रत्युत | = | प्रति+उत | महोदय | = | महा+उदय |
| चैव | = | च+एव | प्रमुखोत्सवाः | = | प्रमुख+उत्सवाः |
| किञ्चित् | = | किम्+चित् | केषाञ्चित् | = | केषाम्+चित् |
| किञ्चिद्दूरे | = | किम्+चित्+दूरे | कार्यक्रमस्तु | = | कार्यक्रमः+तु |
| जलपानाद् अनन्तरम् | = | जलपानात् +अनन्तरम् | | | |

## सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| अध्यापकाः+च | = | अध्यापकाश्च | अति+उत्सुकाः | = | अत्युत्सुकाः |
| तु+अहम् | = | त्वहम् | एव+एकम् | = | एवैकम् |
| अतः+अरुणस्य | = | अतोऽरुणस्य | प्रदेशः+अरुणाचलः | = | प्रदेशोऽरुणाचलः |
| सूर्योदयभूमिः+इयम् | = | सूर्योदयभूमिरियम् | च+अत्र | = | चात्र |
| तु+अयम् | = | त्वयम् | स्रोतः+एव | = | स्रोत एव |
| सुगन्धिः+च | = | सुगन्धिश्च | युक्तस्य+अस्य | = | युक्तस्यास्य |
| प्रकृतिः+एव | = | प्रकृतिरेव | संस्कृतिः+अपि | = | संस्कृतिरपि |
| कृषिः+शिल्पकला | = | कृषिश्शिल्पकला | प्रमुखाः+उत्सवाः | = | प्रमुखा उत्सवाः |
| अत्र+अनेके | = | अत्रानेके | इति+अस्ति | = | इत्यस्ति |
| इति+अपि | = | इत्यपि | पर्व+इदम् | = | पर्वेदम् |
| प्रबन्धः+अपि | = | प्रबन्धोऽपि | अधुना+इदम् | = | अधुनेदम् |
| जानामि+इदम् | = | जानामीदम् | सम्यक् +अभिज्ञातम् | = | सम्यगभिज्ञातम् |
| स्थली+इयम् | = | स्थलीयम् | लोहितजनपदे+अपि | = | लोहितजनपदेऽपि |
| दर्शनीयस्थलविषये+अपि | = | दर्शनीयस्थलविषयेऽपि | दूरे+अपि | = | दूरेऽपि |
| अत्र+अनेकानि+अन्यानि | = | अत्रानेकान्यन्यानि | अन्यानि+अपि | = | अन्यान्यपि |

**संयोगः**

देवानामपि = देवानाम्+अपि

## अभ्यासः

**1. एकपदेन उत्तरत –**

(क) सूर्योदयभूमिः अरुणाचलः कैः सुशोभिता? ..........

(ख) अरुणाचले कति नद्यः वहन्ति? ..........

(ग) अरुणाचलस्य पर्यावरणं कीदृशम्? ..........

(घ) देवानामपि देवः कः कथ्यते? ..........

(ङ) अरुणाचलस्य राजधानी का? ..........

(च) लामासम्प्रदायस्य प्रमुखं पर्व किम्? ..........

(छ) अरुणाचलस्य विशिष्टः राजपशुः कः? ..........

(ज) 'तवाङ्ग गोम्पा' केषां मठः? ..........

**2. एतेषां प्रश्नानाम् उत्तराणि एकवाक्येन लिखत –**

(क) अरुणः कस्य पर्यायः?

..........

(ख) सूर्योदयभूमिः इति पदं कस्मै प्रयुक्तम्?

..........

(ग) अरुणाचलप्रदेशस्य जनजातीनां प्रमुखानि आजीविकासाधनानि कानि सन्ति?

..........

(घ) 'ओरिया' इति केषां प्रमुखं पर्व?

..........

(ङ) लामासम्प्रदायस्य 'लोसर' इति पर्व कदा मान्यते?

..........

(च) 'मोपीन' इति कीदृशं पर्व अस्ति?

..........

(छ) लोहितनद्याः उद्गमस्थलं किं मन्यते?

.......................................................................................................

**3. अधोलिखितवाक्येषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं कुरुत-**

(क) अरुणाचलप्रदेशे पञ्चाशदधिका नद्यः प्रवहन्ति।

.......................................................................................................

(ख) अरुणस्य प्रदेशः अरुणाचलः।

.......................................................................................................

(ग) अरुणाचले अनेके उत्सवाः मान्यन्ते।

.......................................................................................................

(घ) वनौषधीनां तु अयं स्रोतः एव अस्ति।

.......................................................................................................

(ङ) 'ओरिया' इति पर्वणि अरुणाचले कृषिभूमिपूजनं सामाजिककार्यं च भवति।

.......................................................................................................

(च) भीष्मक-नगर-दुर्गस्य अवशेषाः आर्य-कला-संस्कृति-सम्पद्-परिचायकाः।

.......................................................................................................

(छ) परशुरामकुण्डं लोहितनद्याः किञ्चिद् दूरम् अस्ति।

.......................................................................................................

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत -**

(क) 'स्थलानां दर्शनाय प्रबन्धः अपि वर्तते।' अत्र 'वर्तते' इति क्रियापदस्य कर्तृपदं किम्?

(ख) 'मिथुनः गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति।' वाक्येऽस्मिन् विशेष्यपदं किं प्रयुक्तम्?

(ग) 'साडकेन एकम् अन्यत् पर्व अस्ति।' अत्र 'अपरम्' इति पदस्य किं पर्यायपदं प्रयुक्तम्?

(घ) 'जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति।' वाक्येऽस्मिन् किं क्रियापदं प्रयुक्तम्?

(ङ) 'पर्यटनविभागेन प्रकाशितां प्रसिद्धस्थलानां सूचीं पठित्वा ज्ञायताम्।' अत्र 'सूचीम्' इति पदस्य किं विशेषणपदं प्रयुक्तम्?

**5. विशेष्यैः सह समुचितविशेषणानि योजयित्वा लिखत –**

| | | | |
|---|---|---|---|
| (क) विविधवर्णमनोहरा | पर्व | ...................... | ...................... |
| (ख) प्रमुखानि | राजपशुः | ...................... | ...................... |
| (ग) सामाजिकम् | आजीविकासाधनानि | ...................... | ...................... |
| (घ) अन्यत् | ऐतिहासिकस्थलानि | ...................... | ...................... |
| (ङ) सम्पूर्णा | कार्यम् | ...................... | ...................... |
| (च) दर्शनीयानि | प्रकृतिः | ...................... | ...................... |
| (छ) गोमहिषसदृशः | व्यवस्था | ...................... | ...................... |

**6. अधोलिखितपदैः सह समानार्थकपदं योजयित्वा लिखत –**

| | | | |
|---|---|---|---|
| (क) अभिनन्दनम् | अपितु | ...................... | ...................... |
| (ख) ज्ञातुम् | पश्चात् | ...................... | ...................... |
| (ग) अरुणः | अवगन्तुम् | ...................... | ...................... |
| (घ) समम् | इदानीम् | ...................... | ...................... |
| (ङ) अधुना | सदृशम् | ...................... | ...................... |
| (च) प्रत्युत | स्वागतम् | ...................... | ...................... |
| (छ) अनन्तरम् | सूर्यः | ...................... | ...................... |

**7. अधोलिखितवाक्येषु स्थूलपदानि केभ्यः प्रयुक्तानि?**

**यथा** अहं **भवतां** जिज्ञासां शमयितुम् इच्छामि। छात्राणां कृते/छात्रेभ्यः

(क) प्रथमं तु **अहम्** एव एकं प्रश्नं पृच्छामि। ..............................................................

(ख) सूर्यस्य प्रकाशः सर्वप्रथमम् **इमं** स्पृशति। ..............................................................

(ग) **अहं** चिन्तयामि यत् अरुणः तु सूर्यस्य पर्यायः। ..............................................................

(घ) कृषिः, शिल्पकला वनसम्पद् च **एतेषां** प्रमुखानि आजीविकासाधनानि। ..............................................................

(ङ) **इदम्** 'अप्रैल' इति मासे मान्यते। ..............................................................

(च) अधुना तु वयम् **एतानि** द्रष्टुम् उत्सुकाः स्मः। ..............................................................

(छ) **अत्र** अनेके प्रमुखोत्सवाः। ..............................................................

8. अधोलिखितपदानां समुचितं विग्रहं समस्तपदं वा लिखत-

(क) वनसम्पदा ..........................................

(ख) सेतोः निर्माणम् ..........................................

(ग) पर्यटनाधिकारी ..........................................

(घ) हिमाद्रेः तुङ्गशृङ्गानि, तैः ..........................................

(ङ) बौद्धमठः ..........................................

(च) उद्गमस्य स्थलम् ..........................................

(छ) अरुणाचलः ..........................................

9. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलं समुचितार्थं चित्वा लिखत -

(क) प्रश्नोत्तरमाध्यमेन भवतां **जिज्ञासां** शमयितुम् इच्छामि।

(i) गन्तुम् इच्छा (ii) ज्ञातुम् इच्छा (iii) गातुम् इच्छा

(ख) अस्य अवशेषाः तु आर्यकला-संस्कृति-सम्पदः **परिचायकाः**।

(i) सूचकाः (ii) सेवकाः (iii) पर्यटकाः

(ग) **साधु** पृष्टम्।

(i) संन्यासी (ii) शुद्धम् (iii) सम्यक्

(घ) **विपुला** च अत्र वनसम्पदा।

(i) पृथ्वी (ii) विशाला (iii) स्थूला

(ङ) वनौषधीनां तु अयं **स्रोतः** एव।

(i) उद्गमस्थलम् (ii) प्रवाहः (iii) निर्झरः

10. अत्र लिखिते गद्यांशे रिक्तस्थानानां पूर्तिम् 'इदम्' इति सर्वनामपदस्य उचितरूपैः कुरुत -

अरुणस्य प्रदेशः अरुणाचलः। .................... प्रदेशस्य अस्ति हिमाद्रितुङ्गशृङ्गैः सुशोभिता भूमिः। एवञ्च अस्ति विपुलवनसम्पदा .................... प्रदेशे। ....................प्रदेशात् एव वहति लोहिताख्या नदी। सूर्यस्य प्रकाशः सर्वप्रथमम् ....................प्रदेशम् एव स्पृशति। ....................प्रदेशेन एव जीवन्ति ....................प्रदेशस्य जनाः। अद्भुतः सौन्दर्यमयः एव .................... प्रदेशः।

# योग्यताविस्तारः

**( न परीक्षाकृते )**

**भावविस्तारः**

**नद्यः** अरुणाचले पञ्चाशदधिकनद्यः प्रवहन्ति। तत्र कमेंग-सुबंसिरी-सियोग-लोहित-दिवाङ्ग-तिरप-नाम्न्यः प्रमुखाः नद्यः। 'ब्रह्मपुत्र' नाम्न्याः नद्याः अपि अत्र उद्गमः। सदियास्थले दिहांग-दिवाङ्ग नद्योः 'लोहिता' इति नद्या सह सङ्गमः एव 'ब्रह्मपुत्र' इति नाम भवति।

**वनसम्पदा** अत्रत्या वनसम्पदा विपुला। अस्य प्रदेशस्य ६२ प्रतिशतं भागः वनाच्छादितः। अस्मिन् प्रदेशे विविधवृक्षाणां वनानि सन्ति। क्वचित् तु चीरपर्णः / सरलः देवदारु-अगर-रुद्राक्षवृक्षाणां सघनवनानि सन्ति, क्वचित् सेमल-वालनट-ओक-पाइन-मेकाई-वृक्षाणाम् अरण्यानि। नारङ्ग-आम्ल-कंटघर-अनन्नास-लीची फलपादपाः प्रचुराः। जाङ्गलाः कदली-फलतरवः तु पर्याप्ताः एव।

**वनौषधयः** अस्मिन् प्रदेशे वनौषधीनां प्राचुर्यं वर्तते, येषां चिकित्सायाम् उपयोगः भवति। यथा अकरकरा-ममीरे-अगर-पादपाः बहुलाः। एकमेव (कृमिनाशकः, सर्पदंशहरः), सप्तवर्णः (कृमिनाशकः, कुष्ठघ्नः कफघ्नः रक्तशोधकश्च)। अर्जुनः (हृदयरोगे लाभकरः), बहिर्रा (बहेड़ा) कब्जरोगे, हरड़ (कृमिनाशकः), ब्राह्मी (स्मरणशक्ति-वर्धिका), चित्रकं (चर्मरोगे), बिडंगः (रक्तशोधकः), वचा (वातहरः), अगरुः (वातकफनाशकः), नामकेशरः (कफपित्तशामकः), दारु-हरिद्रा (वेदनानाशकम्)।

**मिथुनः** मिथुनः गो-महिषयोः सङ्कररूपः विशिष्टः पशुः। तस्य अग्रभागः महिषस्य इव पृष्ठः भागः च गो इव भवति।

**धनेशः** 'धनेशः' च दीर्घचञ्चुचर्चितः विशिष्टः राजपक्षी अस्ति।

**जनजातयः** अरुणाचलः जनजातीनाम् एव प्रदेशः। तत्र माम्मा, मिजी, ऑका, निसी, गोलोंग, डिगारो वाङ्चो प्रमुखाः जनजातयः वसन्ति।

**कृषिः** अत्र कृषिः द्विधा भवति-झूमकृषिः जलकृषिः च। पर्वते जङ्गलान् स्वच्छीकृत्य या कृषिः भवति सा झूमकृषिः कथ्यते। उपत्यकासु जलकृषिः भवति।

**दर्शनीयस्थानानि** अधः 'क' स्तम्भे दर्शनीयस्थानानि 'ख' स्तम्भे च तेषां मण्डलानां नामानि। एतानि ध्यानेन पठत अवगच्छत च

| 'क' स्तम्भः | | 'ख' स्तम्भः | |
|---|---|---|---|
| (क) | मालिनी-स्थानम् | (i) | पश्चिमी-सियांगे स्थितम् |
| (ख) | भीष्मकनगर-दुर्गम् | (ii) | लोहितमण्डले स्थितम् |
| (ग) | शिवलिङ्गगुहा | (iii) | निम्नतर-सुबंसिरी मण्डले स्थितम् |
| (घ) | 'नागदफा' इति राष्ट्रिय-उद्यानम् | (iv) | चाङ्गलाङ्गमण्डले स्थितम् |
| (ङ) | तवाङ्गगोम्पा | (v) | तवाङ्गमण्डले स्थितम् |

## भाषाविस्तारः

1. अधः कानिचित् पदानि दत्तानि। तेषां प्रकृतयः गोलाकारेषु प्रत्ययाः च चतुर्भुजेषु लिखिताः। ध्यानेन पठत पदानां परिचयं च प्राप्नुत

- पृष्टम् = प्रच्छ् + क्त
- आगत्य = आ+गम् + ल्यप्
- ज्ञातुम् = ज्ञा + तुमुन्
- द्रष्टुम् = दृश् + तुमुन्
- दर्शनीयानि = दृश् + अनीयर्
- जातः = जन् + क्त
- अभिज्ञातम् = अभि+ज्ञा + क्त
- प्रसिद्धाः = प्र+सिध् + क्त
- पठित्वा = पठ् + क्त्वा

2. पर्वन् ( उत्सवः ) नपुंसकलिङ्गम्

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | पर्व | पर्वणी | पर्वाणि |
| द्वितीया | पर्व | पर्वणी | पर्वाणि |
| तृतीया | पर्वणा | पर्वभ्याम् | पर्वभिः |
| चतुर्थी | पर्वणे | पर्वभ्याम् | पर्वभ्यः |
| पञ्चमी | पर्वणः | पर्वभ्याम् | पर्वभ्यः |
| षष्ठी | पर्वणः | पर्वणोः | पर्वणाम् |
| सप्तमी | पर्वणि | पर्वणोः | पर्वसु |
| सम्बोधनम् | हे पर्व, हे पर्वन् | हे पर्वणी | हे पर्वाणि |

**अनुरूपशब्दाः-** कर्मन् (काम), शर्मन् (सुख), वर्मन् (कवच), जन्मन् (जन्म), वर्त्मन् (रास्ता), ब्रह्मन् (ब्रह्मा), चर्मन् (चमड़ा)

## प्रहेलिका

**एकचक्षुः न काकोऽयं बिलमिच्छन्नपन्नगः।**
**क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥**

एकं चक्षुः अस्ति परन्तु काकः नास्ति, बिलम् अन्विष्यति परन्तु पन्नगः नास्ति, क्षयः भवति वृद्धिरपि भवति परन्तु समुद्रः नास्ति, चन्द्रोऽपि नास्ति। तर्हि एतत् किम्?

## एहि हसाम

कश्चन नवयुवकः पत्नीम् उक्तवान्- "अयि प्रिये! अद्य आवाम् उपाहारमन्दिरे भोजनं कुर्वः।

**पत्नी** - किमर्थम्.... ? मम पाकस्य स्वादः सम्यक् न भवति वा?

**पतिः** - (मन्दध्वनिना) न..न,स्वादः तु सम्यक् एव भवति। किन्तु अद्य अतीव श्रान्तः अस्मि। अतः पात्रप्रक्षालने मम इच्छा नास्ति।

दशमः पाठः

# कालोऽहम्



(कोणार्कदेवालयस्य प्राङ्गणम्। केचन बालकाः बालिकाश्च मन्त्रमुग्धाः देवालयं दृष्ट्वा परस्परं वार्तालापं कुर्वन्ति।)

**सविता** – अहो भव्यः विशालः देवालयः!

**रविः** – अये! किमयं देवालयः रथो वा?

**सहस्रांशुः** – अयं तु कोणार्कः, सूर्यस्य रथः।

**प्रभा** – कोणार्कस्य कोऽर्थः?

**सविता** – अर्कस्य अर्थात् सूर्यस्य कोणः। अस्याम् एव दिशि सूर्यः उदेति।

**दिवाकरः** – (गणयित्वा) अस्मिन् रथे तु द्वादश चक्राणि।

**सूर्यः** – पश्य पश्य! कथम् उत्कीर्णं वर्तते प्रत्येकं चक्रम्।

**अंशुमान्** – चक्रस्य प्रत्येकम् अरमपि उत्कीर्णम्।

**दिनेशः** – मन्ये द्वादश चक्राणि एव द्वादश मासाः। अष्ट अराणि एव अष्ट प्रहराः।

**अंशुमाली** – अहो विज्ञानमयी एषा कल्पना। अस्माकं कालगणनायाः आधारस्य सूर्यस्य अद्भुता रचना।

(आकाशे ढक्काध्वनिः श्रूयते)

(सर्वे आश्चर्यचकिताः इतस्ततः पश्यन्ति। मन्दिरस्य प्राचीनेभ्यः पाषाणेभ्यः गभीरा ध्वनिः भवति।)

**सर्वे** – अहो! शृणुत शृणुत! एते पाषाणाः किमपि वक्तुकामा एव।

**कालः** – श्रूयतां श्रूयताम्! कालोऽहम्।

दशमः पाठः

# कालोऽहम्



कालोऽहम्। अहं खलु कालः। विश्वस्य आत्माहम्। कलयामि गणयामि जगतः आयुः प्रमाणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदं जगत् तु पुनः पुनः जायते विलीयते च परमहं विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि। अहो! किं जानीथ यूयम्, 'कियती प्राचीना इयं सृष्टिः!' नैव! तर्हि शृणुत ध्यानेन।

'कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगञ्चेति चत्वारि युगानि। चतुर्णां युगानां समूहः एव महायुगम्। एकसप्ततिमहायुगानाम् एकं मन्वन्तरम्। चतुर्दशमन्वन्तराणां समूहः कल्पः। एकः कल्प एव ब्रह्मणः एकं दिनं मन्यते। ब्रह्मणः आयुः शतं वर्षाणि।'

अहो! श्रूयते शंखध्वनिः! युगादिपर्वणि कस्मिंश्चिद् गृहे नूतनसंवत्सरस्य अभिनन्दनसमारोह आयोज्यते। अद्य कलियुगं तु द्विपञ्चाशत्तमं शतकं प्रविशति। तदैव समारोहारम्भे कश्चन विद्वान् सङ्कल्पवाचनं करोति---

**विष्णोराज्ञया प्रवर्तमानस्य ब्रह्मणः द्वितीयपरार्धे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तैकदेशे यमुनातीरे दिल्लीमण्डले नलनाम-संवत्सरे, सूर्योत्तरायणे, वसन्तर्तौ, चैत्रमासे, शुक्लपक्षे, प्रतिपदायां तिथौ, बुधवासरे, उत्तराभाद्रपदनक्षत्रे, शुक्लयोगे, किंस्तुघ्नकरणे----नामाहं मङ्गलकार्यं करिष्ये।**

अये! कथम् इमं सङ्कल्पं श्रुत्वा विस्मिताः यूयम्? अयं तु वर्तमानकालदेशपरिचायकः। प्राचीनतमा हि एषा गणना। अपि ज्ञायते मदीयायाः अस्याः गणनायाः आधारः?

मम कलनस्य तु आधारः सूर्य एव। सूर्यस्य द्वे गती उत्तरायणं दक्षिणायनञ्च। प्रत्येकम् अयनस्य अवधिः षण्मासाः। भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि। पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य मासस्य नाम भवति। यथा चैत्रे मासे पूर्णिमा चित्रानक्षत्रयुता भवति, अतः तस्य मासस्य नाम 'चैत्रः' भवति। संवत्सरस्य तु विषये इदमुच्यते–

**षण्णाभेर्द्वादशाक्षस्य चतुर्विंशतिपर्वणः।**
**यस्त्रिषष्टिशतारस्य वेदार्थं स परः कविः॥ १॥**

षड् ऋतव एव मे नाभयः। द्वादशमासा एव अक्षत्वेन गण्यन्ते। चतुर्विंशतिः पक्षा एव पर्वाणि। षष्ट्युत्तर-त्रिशतानि दिनानि एव अराणि। परमहम् अखण्डः शाश्वतः विभुः च। नूतनसंवत्सरोत्सवदिवसे इदानीम् इयमेव मे शुभाशंसा–

**सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु।**
**सर्वः कामानवाप्नोतु सर्वः सर्वत्र नन्दतु॥ २॥**

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अवाप्नोतु** (क्रि०) (प्र०पु०ए०व०) [अव+आप्+लोट्] | विन्दतु, लभताम् | प्राप्त करे | may attain. |
| **आर्यावर्तैकदेशे** (सं०) (पु०स०ए०व०) [आर्यावर्तः एकदेशः (एकभागः) यस्य, तस्मिन्, ब०व्री०] | आर्यावर्तः नामके स्थाने | भारत में आर्यावर्त नाम के एक भूभाग में | In a region in India known as Aryavarta, North India is known as Aryavarta. |
| **करिष्ये** (क्रि०) (उ०पु०ए०व०) [कृ+(उभ०) लृट्] | करिष्यामि | करूँगा | I will do. |
| **कलनस्य** (स०) (नपुं०ष०ए०व०) | गणनायाः | गिनने का | of counting. |
| **कलयामि** (क्रि०) (उ०पु०ए०व०) [कल्+लट्] | गणयामि | गिनता हूँ | I count. |
| **कल्पः** (सं०) (पु०प्र०ए०व०) | संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि इत्यमरः। | सृष्टि का अन्त, प्रलय, ब्रह्मा का एक दिन (चौबीस घंटे) | A day and night of Brahman. |
| **कालोऽहम्** [कालः+अहम्] | कालः, समयः अहम् समयः अस्मि। | समय | I am time. |
| **क्रियाकलापम्** (सं०) (पु०द्वि०ए०व०) [क्रियाणां कलापः तम्, ष०त०पु०] | समस्त-क्रियाव्यापारम् | कार्यसमूह (समस्त गतिविधियों) को | to group of activities. |
| **चतुर्णाम्** (वि०-चतुर्) (पु०ष०ब०व०) | चतुर्सङ्ख्यकाम् | चारों (युगों) का | of four (yugas). |

| | | | |
|---|---|---|---|
| **चतुर्विंशतिपर्वण:** (सं०) (नपुं०ष०ए०व०)[चतुर्विंशति: पर्वाणि यस्य तस्य, ब०व्री०] | चतुर्विंशतिभि: पर्वभि: युक्त: | चौबीस गाँठों (पौरियों) से युक्त | having twenty four joints |
| **त्रिषष्टिशतारस्य** (सं०) (पु०ष०ए०व०) [त्रिषष्टिशतानि अराणि यस्य स: तस्य, ब०व्री०] | त्रिषष्टिशतै: अरै: युक्त: | तीन सौ साठ अरों से युक्त | having three hundred and sixty spokes. |
| **दुर्गाणि** (सं०) (नपुं०प्र०ब०व०) | सङ्कटानि, समस्या: | कठिनाइयों को | difficulties. |
| **द्वादशाक्षस्य** (सं०) (पु०ष०ए०व०) [द्वादश अक्षा: यस्मिन् तस्य, ब०व्री०] | द्वादश धुरभि: युक्त: | बाहर धुरों (धुरियों) से युक्त | with twelve pegs of axle. |
| **नक्षत्रम्** (सं०) (नपुं०प्र०ए०व०) | तारकम् | आकाश में देदीप्यमान तारा (प्रमुख सत्ताईस नक्षत्र हैं) | star. |
| **नन्दतु** (क्रि०) (प्र०पु०ए०व०) [नन्द् (प्र०पु०)+लोट्] | प्रसीदतु, प्रसन्न: भवतु | प्रसन्न हो | may be happy, may be delighted. |
| **षण्णाभे:** (सं०) (स्त्री०/पु०ष०ए०व०) [षट् नाभय: यस्य स: तस्य, ब०व्री०] | षड्भि: नाभिभि: युक्त: | नाभि-पहिए की नाह (केन्द्र) छ: नाहों (केन्द्रों) से युक्त | having six navels. |
| **परार्धे** (ब्रह्मण:) [पर: च असौ अर्ध: कर्मधा, तस्मिन्] | आयुष: उत्तरार्ध: | (ब्रह्मा की) आयु का उत्तर अर्धभाग | the later half part (of Brahma's life). |
| **मन्वन्तरे** (सं०) (नपुं०स०ए०व०) [मनो: अन्तरे वर्तमान: काल:] म०पदलोपी त०पु० [मन्वतन्तरं तु दिव्यानां युगानामेकसप्तति: इत्यमर:] | मनुकाले | एक मनु के काल में | Duration of time between two Manus. |
| **युगादिपर्वणि** (सं०) (नपुं०स०ए०व०) [युगस्य आदि: युगादि: (ष०त०पु०) तस्य पर्वणि (ष०त०पु०)] | युगारम्भस्य उत्सवे, नववर्षस्य आरम्भे | युगारम्भ के उत्सव में, नये वर्ष के शुरू में | In the festival (of the beginning) of the new year. |
| **विभु:** (वि०) (पु०प्र०ए०व०) [वि+भू+डु] | व्यापक: | शक्तिशाली, व्यापक | Omnipresent, Omnipotent. |
| **विलीयते** (क्रि०) (प्र०पु०ए०व०) [वि+ली+लट्] | विलीनं भवति | समा जाती है | dissolves. |
| **विष्णोराज्ञया** (सं०) (स्त्री०तृ०ए०व०) [विष्णो:+आज्ञया] | विष्णो: अनुमत्या: | विष्णु (परमात्मा) की आज्ञा से | by the permission of Lord Vishnu. |

| | | | |
|---|---|---|---|
| **वीक्षमाणः** (वि०) (पु०प्र०ए०व०) [वि+ईक्ष्+शानच्] | सम्यक् पश्यन् | भली प्रकार से देखते हुए | while watching carefully. |
| **शुभाशंसा** (सं०) (स्त्री०प्र०ए०व०) [शुभा च असौ आशंसा, कर्मधा०] | आशंसा–इच्छा, आशा | शुभकामना | good wishes. |
| **संवत्सरः** (सं०) (पु०प्र०ए०व०) [संवसन्ति ऋतवोऽत्र इति संवत्सरः] | विक्रमाब्दः, संवत् | (विक्रमादित्य) वर्ष | an year. |
| **सङ्कल्पः** (सं०) (पु०प्र०ए०व०) | धार्मिकानुष्ठानस्य प्रतिज्ञा | धार्मिक कृत्य करने की प्रतिज्ञा | vow to perform some religious activity. |

## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| बालिकाश्च | = | बालिका:+च | कोऽर्थ: | = | क:+अर्थ: |
| इतस्तत: | = | इत:+तत: | वक्तुकामा एव | = | वक्तुकामा:+एव |
| कालोऽहम् | = | काल:+अहम् | विद्यमानोऽस्य | = | विद्यमान:+अस्य |
| कश्चन | = | क:+चन | तेनैव | = | तेन+एव |
| षड् ऋतव: | = | षट्+ऋतव: | षष्ट्युत्तर | = | षष्टि+उत्तर |
| संवत्सरोत्सव: | = | संवत्सर+उत्सव: | सर्वस्तरतु | = | सर्व:+तरतु |

### सन्धिकार्यम्

| | | | | | |
|---|---|---|---|---|---|
| आत्मा+अहम् | = | आत्माहम् | भविष्यत्+अपि | = | भविष्यदपि |
| कलियुगं+च+इति | = | कलियुगञ्चेति | प्राचीना+इयम् | = | प्राचीनेयम् |
| न+एव | = | नैव | तदा+एव | = | तदैव |
| समारोह:+आयोज्यते | = | समारोह आयोज्यते | आधार:+सूर्य: | = | आधारस्सूर्य: |
| प्रति+एकम् | = | प्रत्येकम् | षट्+मासा: | = | षण्मासा: |

### संयोग:

| | | | | | |
|---|---|---|---|---|---|
| किमयम् | = | किम्+अयम् | अरमपि | = | अरम्+अपि |
| परमहम् | = | परम्+अहम् | अहमेव | = | अहम्+एव |
| कथमिमम् | = | कथम्+इमम् | इयमेव | = | इयम्+एव |

# अभ्यासः

1. **एकपदेन उत्तरत –**

(क) अस्मिन् पाठे कः वक्ता? ....................................

(ख) कालः कस्य आयुः गणयति? ....................................

(ग) कालः कथं परिवर्तते? ....................................

(घ) कस्य आयुः शतं वर्षाणि? ....................................

(ङ) कस्य अभिनन्दनसमारोहस्य वर्णनम् अत्र कृतम्? ....................................

(च) दिल्ली कस्याः नद्याः तीरे स्थिता? ....................................

(छ) कालगणनायाः आधारः कः? ....................................

(ज) सर्वः किं तरतु? ....................................

(झ) सर्वः कुत्र नन्दतु? ....................................

2. **अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तराणि दीयन्ताम् –**

(क) कालः किं किं वीक्षते?

(ख) कालः केषां साक्षी अस्ति?

(ग) महायुगं केषां समूहः?

(घ) कल्पः केषां समूहः?

(ङ) युगादिपर्व कदा भवति?

(च) युगादिपर्वणि किम् आयोज्यते?

(छ) सङ्कल्पे देशवाचकाः (स्थानवाचकाः) के के शब्दा आगताः?

(ज) सूर्यस्य के गती? तयोः नाम अपि लिखत।

(झ) एकस्मिन् वर्षे कति पक्षाः?

(ञ) "परमहम् अखण्डः शाश्वतः विभुः च" इति अस्मिन् वाक्ये कालाय कानि विशेषणानि प्रयुक्तानि?

3. **उदाहरणमनुसृत्य अधोलिखितानां वाक्यानां प्रश्ननिर्माणं क्रियताम्–**

**उदाहरणम्** कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगञ्चेति <u>चत्वारि</u> युगानि।

प्रश्नः– कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगञ्चेति कति युगानि?

(क) भूतं वर्तमानं भविष्यद् इति त्रयः कालभेदाः।

(ख) चतुर्णां युगानां समूह एव महायुगम्।

(ग) संवत्सरे षड् ऋतवः भवन्ति।

(घ) संवत्सरे द्वादश मासाः भवन्ति।

(ङ) चतुर्दश मन्वन्तराणां समूहः कल्पः।

(च) ब्रह्मणः आयुः शतं वर्षाणि।

**4. अधोलिखितप्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'वीक्षमाणः अहमेव साक्षी जगतः उत्पतेः।' अत्र 'पश्यन्' अस्मिन् अर्थे किं पदं प्रयुक्तम्?

(ख) 'एकः कल्पः एव ब्रह्मणः एकं दिनं मन्यते।' अस्मिन् वाक्ये क्रियापदं किम्?

(ग) 'अद्य कलियुगं द्विपञ्चाशत्तमं शतकं प्रविशति।' अस्मिन् वाक्ये कर्तृपदं किम्?

(घ) 'कियती प्राचीना इयं सृष्टिः?' अत्र 'नूतना' इत्यस्य पदस्य किं विलोमपदं प्रयुक्तम्?

(ङ) 'चतुर्णां युगानां समूहः एव महायुगम्।' अत्र विशेष्यपदं किमस्ति?

(ङ) 'सङ्कल्पं श्रुत्वा विस्मिताः यूयम्।' अत्र विशेषणपदं किमस्ति?

**5. समुचितार्थं मेलयत–**

| | क | | ख |
|---|---|---|---|
| (क) | अर्कस्य | ...................... | समयः |
| (ख) | पाषाणेभ्यः | ...................... | वयः |
| (ग) | कालः | ...................... | सूर्यस्य |
| (घ) | आयुः | ...................... | पुरातनतमा |
| (ङ) | प्राचीनतमा | ...................... | प्रस्तरेभ्यः |
| (च) | कृतयुगम् | ...................... | सत्युगम् |

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलं समुचितार्थं चित्वा लिखत –**

(क) अहं खलु कालः विश्वस्य आत्मा।

(i) जगतः (ii) समयस्य (iii) देशस्य

(ख) अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च।

(i) प्रवर्धनस्य (ii) विनाशस्य (iii) प्रलापस्य

(ग) कथम् इमं सङ्कल्पं श्रुत्वा विस्मिताः यूयम्?

(i) ज्ञात्वा (ii) विज्ञाय (iii) आकर्ण्य

(घ) प्रत्येकम् अयनस्य <u>अवधिः</u> षण्मासाः।

(i) कालः (ii) अवधानम् (iii) अवधारणा

(ङ) समारोहारम्भे कश्चन <u>विद्वान्</u> सङ्कल्पवाचनं करोति।

(i) ज्ञानवान् (ii) किञ्चिज्ज्ञः (iii) अल्पज्ञः

(च) मम <u>कलनस्य</u> तु आधारः सूर्यः एव।

(i) समयस्य (ii) कलायाः (iii) गणनायाः

**7. अधोलिखितानाम् कथनानाम् आशयाः विकल्परूपेण तत्समक्षमेव लिखिताः सन्ति। तेषु समुचितम् आशयं (✔) इति चिह्नीकुरुत–**

| | | |
|---|---|---|
| उदाहरणम् – | सततं चक्रवत् परिवर्तमानः | 1. कालः यदा कदा चक्रवत् भ्रमति।<br>2. निरन्तरं भ्रमन् कालः चक्रम् एव।<br>3. कालः चक्रम् इव निरन्तरं गतिशीलः।(✔) |
| (क) | विश्वस्य आत्माऽहम् | 1. कालः यत्र तत्र व्याप्तः।<br>2. कालः संसारस्य आत्मा।<br>3. कालः विश्वस्य निर्माता। |
| (ख) | मम कलनस्य तु आधारः सूर्य एव | 1. सूर्य एव कालगणनां करोति।<br>2. सूर्यं विना कालस्य गणना न भवति।<br>3. सूर्यः अपि कालगणनायाः आधारः। |

**8. अधोलिखितसङ्ख्यावाचकपदैः रिक्तस्थानानि पूरयत –**

सूर्यः ...................... । सूर्यस्य ...................... गती। जगतः ...................... स्थितयः सृष्टिः विकासः प्रलयश्च। कालस्य ......................युगानि। एकस्मिन् वर्षे ...................... नाभयः। एकस्मिन् दिवसे ...................... प्रहराः। संवत्सरे ...................... मासाः। मन्वन्तरे ...................... महायुगानि। कल्पे ...................... मन्वन्तराणि। ...................... वर्षाणि ब्रह्मणः आयुः।

**10. अधोलिखितानां शुद्धकथनानां समक्षं (✔) अशुद्धानां च समक्षं (✘) इति चिह्नाङ्कनं क्रियताम्–**

यथा– मासे द्वौ पक्षौ भवतः शुक्लः कृष्णः च (✔)

(क) चन्द्रस्य द्वे अयने भवतः। ( )

(ख) एकस्मिन् वर्षे द्वादशपक्षाः भवन्ति। ( )

(ग) नूतनः संवत्सरः चैत्रमासस्य शुक्लपक्षस्य प्रतिपदायाः प्रारभ्यते। ( )

11. अधोलिखितानि अव्ययपदानि स्थूलपदानां स्थाने एवं प्रयुज्यन्तां येन अर्थभेदः न स्यात्–

भूयो भूयः, सदा, अधुना, निरन्तरम्

(क) **सततं** कालः चक्रवत् परिवर्तमानः अस्ति।

(ख) **इदानीं** कलियुगस्य प्रथमः चरणः अस्ति।

(ग) **सर्वदा** शुभकार्यं सङ्कल्पेन प्रारब्धव्यम्।

(घ) **पुनः पुनः** जगत् जायते विलीयते च।

12. अधः केषाञ्चित् समस्तपदानां विग्रहाः निर्दिष्टाः। पाठात् चित्वा विग्रहस्य समक्षं समस्तपदं लिखत–

| विग्रहः | समस्तपदम् |
|---|---|
| यथा– एकम् एकम् प्रति | प्रत्येकम् |
| (क) शङ्खस्य ध्वनिः | ........................................................... |
| (ख) अभिनन्दनस्य समारोहः | ........................................................... |
| (ग) यमुनायाः तीरे | ........................................................... |
| (घ) महत् च तत् युगम् | ........................................................... |
| (ङ) मङ्गलं च तत् कार्यम् | ........................................................... |
| (च) चित्रानक्षत्रेण युता | ........................................................... |
| (छ) सङ्कल्पस्य वाचनम् | ........................................................... |

13. अधोलिखितपदानां विपरीतार्थकपदानि पाठात् एव चित्वा लिखत–

| | |
|---|---|
| यथा– भूतम् | **वर्तमानम्** |
| (क) उत्पत्तेः | ..................... |
| (ख) जायते | ..................... |
| (ग) प्राचीनः | ..................... |
| (घ) कलियुगम् | ..................... |
| (ङ) उत्तरायणम् | ..................... |
| (च) तदानीम् | ..................... |

## गतिविधयः

1. 'युगादिपर्व चैत्रमासे शुक्लपक्षे प्रतिपदायां तिथौ भवति' इति भवन्तः पठितवन्त एव। अधोलिखितानि पर्वाणि कस्मिन् मासे कस्मिन् पक्षे कस्यां तिथौ च भवन्ति इति लिख्यन्ताम्–

| पर्वनाम | मासः | पक्षः | तिथिः |
|---|---|---|---|
| (क) विजयदशमी | ...................... | ...................... | ...................... |
| (ख) जन्माष्टमी | ...................... | ...................... | ...................... |
| (ग) वाल्मीकिजयन्ती | ...................... | ...................... | ...................... |
| (घ) दीपावलिः | ...................... | ...................... | ...................... |
| (ङ) रक्षाबन्धनम् | ...................... | ...................... | ...................... |
| (च) रविदासजयन्ती | ...................... | ...................... | ...................... |
| (छ) बुद्धपूर्णिमा | ...................... | ...................... | ...................... |
| (ज) होलिकोत्सवः | ...................... | ...................... | ...................... |
| (झ) रामनवमी | ...................... | ...................... | ...................... |
| (ञ) गुरुनानकजयन्ती (गुरुपर्व) | ...................... | ...................... | ...................... |

2. युगादिपर्व कदा भवति इति सङ्कल्पे ज्ञातमेव। दिल्लीनगरे 'अम्बालिका' नाम्न्याः बालिकायाः जन्मदिवसः 'रामनवमी' इति दिवसे आयोज्यते। अधोलिखितेषु देशकालवाचकेषु शब्देषु परिवर्तनं भविष्यति न वा इति लिखत–

| | |
|---|---|
| यथा– ब्रह्मणः द्वितीये परार्धे | न भविष्यति |
| (क) श्वेतवाराहकल्पे | .................................. |
| (ख) भारतवर्षे भरतखण्डे | .................................. |
| (ग) कलियुगे प्रथमे चरणे | .................................. |
| (घ) जम्बूद्वीपे | .................................. |
| (ङ) सूर्योत्तरायणे | .................................. |
| (च) चैत्रमासे | .................................. |
| (छ) प्रतिपदायां तिथौ | .................................. |
| (ज) गुरुवासरे | .................................. |
| (झ) आदित्यः नाम अहम् | .................................. |

3. नवसंवत्सरस्य आरम्भे भवान्/भवती एकं शुभकामनापत्रं स्वमित्राय इच्छति। तस्मिन् कामपि शुभाशंसां लिखत-

.............................................................................................................................

.............................................................................................................................

.............................................................................................................................

.............................................................................................................................

## योग्यताविस्तारः

**( न परीक्षाकृते )**

**पाठे दत्तः सङ्कल्पः गतिविधयश्च ज्ञानविस्तारार्थमेव न तु प्रश्नपत्रे परीक्षार्थम्।**

अस्माकं विज्ञानिभिः ऋषिभिः अतिप्राचीनकाले एव कालगणना आरब्धा आसीत्। एतत् तु पुराणेतिहासादीनां वेदानां च परिशीलनात् स्पष्टीभवति। कालः अनादिः, अनन्तः, अखण्डः च इति विचारः निर्विवादः तथापि व्यवहारार्थं कालगणना आवश्यकी। अतएव व्यवहारे कालभेदः दृश्यते अनुभूयते वा। एवं हि कल्पः, युगम्, संवत्सरः, अयनम्, मासः, पक्षः, तिथिः, घण्टा, निमेषः इति स्थूलविभागाः कालस्य। प्रतिपल-त्रुट्यादयः इतोऽपि सूक्ष्मभेदाः सन्ति।

**भावविस्तारः**

**युगादिः** ब्रह्मा चैत्रशुक्लप्रतिपदि एव सृष्टिम् आरब्धवान् इति मन्यते। ततः एव कालगणना प्रारब्धा। कालः अनादिः अखण्डश्च किन्तु अस्माकं व्यवहाराय एव कालभेदः प्रवर्तते। एवं हि कल्प-युग-संवत्सर-अयन-मास-पक्ष-तिथि-नक्षत्र-घण्टा-निमेषरूपाः कालविभागाः प्रसिद्धाः।

**द्वितीये परार्धे** अपरस्मिन् अर्धभागे। सम्प्रति सृष्टिकर्तुः ब्रह्मणः आयुः एकपञ्चाशत्तमवर्षस्य प्रथमः दिवसः अस्ति।

**कल्पः** ब्रह्मणः एकं दिनम्। चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते। सृष्टेः अवधिः। 432000000 मानवर्षाणि। सम्प्रति श्वेतवाराहकल्पः।

**कलियुगम्** 432000 वर्षाणि।

**द्वापरम्** कलियुगस्य द्विगुणम् 864000 वर्षाणि।

**त्रेता** कलियुगस्य त्रिगुणम् 1296000 वर्षाणि

**कृतयुगम्** कलियुगस्य चतुर्गुणम् 1728000 वर्षाणि

**मन्वन्तरम्** मनोः कालः मन्वन्तरम्। ब्रह्मणः एकस्मिन् दिने चतुर्दश मनवः भवन्ति। एकमनोः कालः 4320000 वर्षाणि (मनुः 1/79)। एकस्मिन् मनुकाले 71 महायुगानि भवन्ति। सम्प्रति वैवस्वतमन्वन्तरः प्रचलति।

**युगादिपर्व** चैत्रमासस्य शुक्लपक्षस्य प्रतिपदा सृष्टेः आदितिथिः। अत एव सा नूतनसंवत्सरस्य प्रथमः दिवसः मन्यते। दक्षिणे भारते गुडीपडवा इत्यपि कथ्यते।

**द्विपञ्चाशत्तमं शतकम्** कलियुगस्य 5124 वर्षाणि गतानि। सम्प्रति कलियुगं 5125 वर्षं प्रविशति।

**जम्बूद्वीपः** मेरुं परितः स्थितेषु सप्तद्वीपेषु एकः।

**भरतखण्डम्** भारतस्य एकस्य भागस्य नामान्तरम्।

**आर्यावर्तः** आसमुद्रात्तु वै पूर्वादासमुद्राच्च पश्चिमात्।
तयोरेवान्तरं गिर्योः (हिमविन्ध्योः) आर्यावर्तं विदुर्बुधाः। (मनुः 2/22)

**संवत्सरः** वर्षः। षष्टिः संवत्सराः भवन्ति। क्रमेण आवर्तन्ते।

**तिथिः** प्रतिपक्षे पञ्चदशतिथयः भवन्ति। कृष्णपक्षे पञ्चदशी तिथिः अमावस्या शुक्लपक्षे च पञ्चदशी तिथिः पूर्णमासी कथ्यते।

**नक्षत्रम्** ज्येतिर्विदैः ज्ञातं यद् आकाशमण्डलं सप्तविंशतिभागेषु विभक्तमिव दृश्यते। नभसि द्युतिमानानि नक्षत्राणि सप्तविंशतिः सन्ति। तेषाम् यथा आकृतिः तथैव तेषां नामानि जातानि। यथा अश्विनी भरणी----कृतिका----रोहिणी-----मृगशिरादीनि।

**शुभाशंसा** पाठस्यान्ते दत्ता शुभाशंसा 'विक्रमोर्वशीयम्' नामनाटकात् उद्धृता। अन्याः शुभाशंसाः-

यथा-

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।
कल्याणमस्तु सर्वेषां विलसन्तु समृद्धयः।
सुखाः समीरणा वान्तु भान्तु सर्वा दिशः शुभाः॥

## प्रहेलिका

श्वेतकायं हरितपुच्छं भक्ष्यं हि हस्तिदन्तकम्।
यदि जानासि वद क्षिप्रं नोचेदपरं पृच्छ त्वम्॥

## एहि हसाम

अध्यापिका व्याकरणं पाठयति। कर्ता कः, कर्म किम्, क्रिया का इति बोधयति। तत्परं सा कृष्णफलके इदं वाक्यं लिखति – 'मण्टुः लड्डुकं खादितुं न इच्छति।'

**अध्यापिका** – सुरेश, त्वं वद। अस्मिन् वाक्ये मण्टुः कः?

**सुरेशः** – मण्टुः मूर्खः।

**अध्यापिका** – कथम्?

**सुरेशः** – आर्ये, कः लड्डुकं खादितुं न इच्छेत्?

# एकादशः पाठः

# किं किम् उपादेयम्




**अरुणः** – उषे! पश्य इदं पुस्तकं भारतस्य मानचित्रं च।

**उषा** – कुतः प्राप्तम् इदम्?

**अरुणः** – मम मातुलः मह्यं जन्मदिवसस्य उपहाररूपेण प्रायच्छत्।

**उषा** – अहो! इयं तु प्रश्नोत्तररत्नमालिका।

**अरुणः** – जानासि कस्तावत् अस्य रचयिता?

**उषा** – न जाने।

**अरुणः** – पश्य एतत् भारतस्य मानचित्रे अङ्कितम् एकस्य महापुरुषस्य चित्रम्।

**उषा** – भ्रातः! कोऽयं संन्यासी?

**अरुणः** – उषे! अयं खलु प्रातः स्मरणीयः आदिगुरुः शङ्कराचार्यः। अस्य एव कृतिः इयम्।

**उषा** – मानचित्रे कानि एतानि स्थानानि दर्शितानि?

**अरुणः** – एतानि तु मठस्थानानि शङ्कराचार्येण स्थापितानि धर्मप्रचाराय। अयं महायोगी अष्टवर्षीयः एव संन्यासं स्वीकृत्य भारते वेदान्तस्य प्रचारम् अकरोत्।

**उषा** – किम् आचार्येण ग्रन्थाः अपि रचिताः?

**अरुणः** – आम्! तेन विविधाः ग्रन्था रचिताः। तेषु एव विद्यते इयं रचना प्रश्नोत्तररत्नमालिका, यत्र प्रश्नोत्तरमाध्यमेन इदं ज्ञापितं यदस्माभिः जीवने किं किं ग्राह्यं, किं किं च त्याज्यम्?

**उषा** – अहो! तत् तु अवश्यं पठनीयम्।

**अरुणः** – तस्याः रचनायाः एव पठामः इदानीं कानिचित् पद्यानि।

एकादशः पाठः

# किं किम् उपादेयम्

## प्रश्नोत्तररत्नमालिका

भगवन्किमुपादेयम् ? गुरुवचनम्, हेयमपि च किम् ? अकार्यम् ।
को गुरुः ? अधिगततत्त्वः शिष्यहितायोद्यतः सततम् ॥ 1 ॥

कः पथ्यतरः ? धर्मः, कः शुचिरिह ? यस्य मानसं शुद्धम् ।
कः पण्डितः ? विवेकी, किं विषम् ? अवधीरणा गुरुषु ॥ 2 ॥

किं जीवितम् ? अनवद्यम्, किं जाड्यम् ? पाठतोऽप्यनभ्यासः ।
को जागर्ति ? विवेकी, का निद्रा ? मूढता जन्तोः ॥ 3 ॥

नलिनीदलगतजलवत्तरलं किम् ? यौवनं धनं चायुः ।
कथय पुनः के शशिनः किरणसमाः ? सज्जना एव ॥ 4 ॥

कोऽनर्थफलः ? मानः ?, का सुखदा ? साधुजनमैत्री ।
सर्वव्यसनविनाशे को दक्षः ? सर्वथा त्यागी ॥ 5 ॥

किं मरणम् ? मूर्खत्वम्, किं चानर्घम् ? यदवसरे दत्तम् ।
आमरणात्किं शल्यम् ? प्रच्छन्नं यत्कृतं पापम् ॥ 6 ॥

कस्य वशे प्राणिगणः ? सत्यप्रियभाषिणो विनीतस्य ।
क्व स्थातव्यम् ? न्याय्ये पथि दृष्टादृष्टलाभाढ्ये ॥ 7 ॥

कोऽन्धः ? योऽकार्यरतः, को बधिरः ? यो हितानि न शृणोति ।
को मूकः ? यः काले प्रियाणि वक्तुं न जानाति ॥ 8 ॥

## शब्दार्थाः

| | | | |
|---|---|---|---|
| **अकार्यम्** (सं०) (नञ् त०पु०) | अकरणीयं कृत्यम् | न करने योग्य कर्म, सदोष कर्म | unapproved deeds. |
| **अधिगततत्त्वः** (वि०) (पु०प्र०ए०व०) [अधि+गम्+क्त=अधिगतं (प्राप्तम्) तत्त्वं येन सः, ब०व्री०] | येन ब्रह्मतत्त्वं ज्ञातम् | जिसने यथार्थ या मूल प्रकृति को जान लिया हो | one who has understood the Supreme Reality. |
| **अनर्थफलः** (वि०) (पु०प्र०ए०व०) [अनर्थं फलं यस्य सः, ब०व्री०] | अनर्थकारकफलप्रदः | अनर्थकारी फल देने वाला | one which leads to evil results (Ego). |
| **अनर्घम्** (वि०) (नपुं०प्र०ए०व०) [न अर्घम्, नञ् त०पु०] | अमूल्यम् | बहुमूल्य | Priceless, extremely valuable. |
| **अनवद्यम्** (वि०) (नपुं०प्र०ए०व०) [न अवद्यम्, नञ् त०पु०] | अनिन्द्यम्, निष्कलङ्कम् | कलंक रहित, अनिन्दनीय | irreproachable. |
| **अवधीरणा** (सं०) (स्त्री०प्र०ए०व०) [अव+धीर्+ल्युट्+टाप्] | अनादरः, तिरस्कारः | अवहेलना | disrespect. |
| **उपादेयम्** (वि०) (नपुं०प्र०ए०व०) [उप+आङ्+दा+यत्] | ग्रहणीयम्, लाभकरम् | स्वीकार्य, लाभकारी | beneficial, fit to be received. |
| **गुरुः** (सं०) (पु०प्र०ए०व०) | आचार्यः, ज्ञानवृद्धः, गरिष्ठः, आदरणीयः, सुतीर्थः | अध्यापक, पिता, भारी, श्रद्धेय | teacher, venerable, heavy, weighty. |
| **दृष्टादृष्टलाभाढ्ये** (सं०) (पु०स०ए०व०) [दृष्टं च अदृष्टं च इति दृष्टादृष्टे, द्वन्द्वः, दृष्टादृष्टयोः लाभः त०पु०, दृष्टादृष्टलाभेन आढ्ये, त०पु०] | – | दृष्ट अदृष्ट अर्थात् भाग्य के लाभों से भरपूर | rich in destined benefits. |
| **नलिनीदलगतजलवत्** (वि०) (नपुं०प्र०ए०व०) | नलिन्याः दले गतं जलं तद्वत् | कमलिनी के पत्ते पर पड़े जलबिन्दु के समान | like the drops of water resting on the leaves of a lotus plant. |
| **पण्डितः** (वि०) (पु०प्र०ए०व०) [पण्डा+इतच्] [पण्डा (बुद्धिः) अस्य अस्ति इति ब०व्री०] | ज्ञानी | बुद्धिमान् | learned scholar. |

| | | | |
|---|---|---|---|
| **पथ्यतरः** (वि०) (पु०प्र०ए०व०) [पथ्य+तरप्] | कल्याणमयः, उपयोगी | योग्य, कल्याणकारी | more suitable, more beneficial. |
| **पाठतः** (अव्य०) [पाठ+तसिल्] | केवलं पाठनं कुर्वतः ततः | केवल जो पढ़ता है (मनन नहीं करता) | form the one who blindly recites. |
| **प्रच्छन्नम्** (वि०) (नपुं०प्र०ए०व०) [प्र+छद्+क्त] | गुप्तम्, आच्छादितम् | गुप्तरूप से, छिपा हुआ | concealed, secret, hidden. |
| **मानः** (सं०) (पु०प्र०ए०व०) [मन्+घञ्] | अत्र अहङ्कारः ईर्ष्यायुक्तक्रोधः | घमण्ड | ego, anger mixed with jealousy |
| **शल्यम्** (सं०) (नपुं०प्र०ए०व०) | कण्टकम् | कांटा | a thorn, anything causing pain. |
| **सर्वव्यसनविनाशे** (सं०) (नपुं०स० ए०व०) [सर्वाणि च तानि व्यसनानि कर्मधा०, सर्वव्यसनानां विनाशे, ष०त०पु०] | – | सभी बुराईयों का नाश होने पर | when all the vices are destroyed. |
| **हेयम्** (वि०) (नपुं०प्र०ए०व०) [हा+यत्] | त्याज्यम् | त्याग के योग्य | to be abandoned, or to be avoided. |



## इदमपि जानन्तु

### सन्धियुक्तपदानि

| | | | | | |
|---|---|---|---|---|---|
| को गुरुः | = | कः+गुरुः | शिष्यहितायोद्यतः | = | शिष्यहिताय+उद्यतः |
| शुचिरिह | = | शुचिः+इह | मानसं शुद्धम् | = | मानसम्+शुद्धम् |
| पाठतोऽप्यनभ्यासः | = | पाठतः+अपि+अनभ्यासः | को जागर्ति | = | कः+जागर्ति |
| सज्जना एव | = | सज्जनाः+एव | को दक्षः | = | कः+दक्षः |
| चानर्घम् | = | च+अनर्घम् | यदवसरे | = | यत्+अवसरे |
| कोऽन्धः | = | कः+अन्धः | योऽकार्यरतः | = | यः+अकार्यरतः |
| को बधिरः | = | कः+बधिरः | यो हितानि | = | यः+हितानि |

### सन्धिकार्यम्

अधिगततत्त्वः+शिष्यहिताय: = अधिगततत्त्वश्शिष्यहिताय

कः+शुचिः = कश्शुचिः

### संयोगः

भगवन्किमुपादेयम् = भगवन्+किम्+उपादेयम्

हेयमपि = हेयम्+अपि

# अभ्यासः

**1. संस्कृतभाषया एकपदेन उत्तराणि लिखत –**

(क) किम् उपादेयम् ? ..........

(ख) किं हेयम् ? ..........

(ग) कः पथ्यतरः ? ..........

(घ) कः पण्डितः ? ..........

(ङ) कः अधिगततत्त्वः शिष्यहिताय सततम् उद्यतः ? ..........

(च) को जागर्ति ? ..........

(छ) का सुखदा ? ..........

**2. पूर्णवाक्येन संस्कृतभाषया उत्तराणि लिखत –**

(क) गुरुः कः भवति ?

..........

(ख) अस्मिन् संसारे कः शुचिः मन्यते ?

..........

(ग) कः सर्वेषां व्यसनानां विनाशे दक्षः भवति ?

..........

(घ) सर्वे प्राणिनः कस्य वशे भवन्ति ?

..........

(ङ) कः मूकः भवति ?

..........

(च) कुत्र स्थातव्यम् ?

..........

**3. निम्नलिखितानाम् उत्तराणां समक्षं पाठात् विचित्य प्रश्नाः लेखनीयाः–**

(क) ज्ञानं लब्ध्वा छात्रकल्याणाय सर्वदैव तत्परः गुरुः कथ्यते। .......... को गुरुः ?

(ख) यः मनसा पूतं समाचरति सः शुचिः। ..........

(ग) सत: असतश्च ज्ञाता नर: पण्डित:। ..........................................

(घ) गुरूणां तिरस्करणं संसारे विषम्। ..........................................

(ङ) अस्मिन् लोके य: सत्यवादी, प्रियवादी च तस्य वशे सर्वे जना:। ..........................................

(च) प्राणिनां मूढता निद्रा कथिता। ..........................................

(छ) लाभप्राचुर्यम् अगणयित्वा न्यायपूर्णमार्गे एव स्थातव्यम्। ..........................................

(ज) त्यागी एव सर्वासां विपदां विनाशं कर्तुं समर्थ:। ..........................................

**4. अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत –**

(क) 'यस्य मानसं शुद्धम्।' अत्र 'मन:' इति पदस्य किं पर्यायपदं प्रयुक्तम्?

(ख) 'को जागर्ति?' अत्र किं क्रियापदम्?

(ग) 'य: काले प्रियाणि वक्तुं न जानाति।' अस्मिन् वाक्ये कर्तृपदं किम्?

(घ) 'प्रच्छन्नं यत्कृतं पापम्।' अत्र किं विशेष्यपदम्?

(ङ) 'न्याय्ये पथि' अनयो: पदयो: किं विशेषणपदम्?

(च) 'यौवनं धनं चायु: नलिनीदलगतजलवत् तरलम्।' अत्र वार्द्धक्यम् इति पदस्य किं विलोमपदं प्रयुक्तम्?

**5. शुद्ध-विलोमपदानि मेलयत –**

| | (अ) | (ब) | | उत्तराणि | | |
|---|---|---|---|---|---|---|
| (क) | अकार्यम् | ग्राही | (क) | अकार्यम् | × | कार्यम् |
| (ख) | सततम् | शत्रुता | (ख) | .................... | × | .................... |
| (ग) | विवेकी | अवद्यम् | (ग) | .................... | × | .................... |
| (घ) | जीवनम् | अविवेकी | (घ) | .................... | × | .................... |
| (ङ) | अनवद्यम् | मरणम् | (ङ) | .................... | × | .................... |
| (च) | यौवनम् | कदाचित् | (च) | .................... | × | .................... |
| (छ) | मैत्री | कार्यम् | (छ) | .................... | × | .................... |
| (ज) | त्यागी | वार्द्धक्यम् | (ज) | .................... | × | .................... |

**6. अधोलिखितसूक्तीनां समक्षं पाठात् चित्वा समुचितपङ्क्तिं लिखत –**

**यथा**–(क) सज्जनानां स्वभावोऽयं येनेन्दु: शिशिरीकृत:। सज्जना: शशिकिरणसमा:

(ख) चलं चित्तं चलं वित्तं चले जीवितयौवने। ..........................................

(ग) न्याय्यात् पथः प्रविचलन्ति पदं न धीराः। ........................................

(घ) त्रैलोक्ये दीपको धर्मः। ........................................

(ङ) अनभ्यासे विषं विद्या। ........................................

(च) कः परः प्रियवादिनाम्। ........................................

(छ) न विवेकं विना ज्ञानम्। ........................................

(ज) मनः पूतं समाचरेत्। ........................................

**7. रेखाङ्कितपदानां समस्तपदं विग्रहं वा लिखत –**

(क) गुरोः वचनम् उपादेयम्। ........................................

(ख) अधिगततत्त्वः गुरुः भवति। ........................................

(ग) न अवद्यं जीवितं भवति। ........................................

(घ) साधुजनमैत्री सुखदा भवति। ........................................

(ङ) सत्यप्रियभाषिणो वशे प्राणिनां गणः भवति। ........................................

(च) सज्जनाः शशिनः किरणैः समाः भवन्ति। ........................................

**8. अत्र ग्राह्याः गुणाः, त्याज्याः दोषाः च कोष्ठकेषु लिखिताः। दोषयुक्तानि कोष्ठकानि ( × ) इति चिह्नेन चिह्नितानि कुरुत–**

| | | | |
|---|---|---|---|
| गुरुवचनम् | गुरुनिन्दा | तत्त्वज्ञता | मूढता |
| धर्मः | विवेकः | चञ्चलता | शिष्यहितम् |
| सज्जनता | शुद्धं मनः | कीर्तिः | सङ्ग्रहः |
| त्यागः | अनभ्यासः | अपयशः | मूर्खत्वम् |
| अभ्यासः | साधुजनमैत्री | गुप्तपापम् | अभिमानः |

**9. समुचितपदैः रिक्तस्थानानि पूरयत –**

(क) मूकः काले .................................. वक्तुं न जानाति।

(ख) .................................. अधिगततत्त्वः सततं शिष्यहितायोद्यतः भवति।

(ग) न्याय्ये .................................. दृष्टादृष्टलाभाढ्ये स्थातव्यम्।

(घ) सर्वथा .................................. सर्वव्यसनविनाशे दक्षः भवति।

(ङ) गुरुषु अवधीरणा ................................ भवति।

(च) सज्जनाः ................................ किरणसमाः भवन्ति।

**10. रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत –**

(क) हेयम् अपि च किम्?

(i) ग्राह्यम् (ii) त्याज्यम् (iii) कर्त्तव्यम्

(ख) कः शुचिः इह।

(i) पवित्रः (ii) सत्यवादी (iii) परोपकारी

(ग) के शशिनः किरणसमाः।

(i) सूर्यस्य (ii) शशकस्य (iii) चन्द्रस्य

(घ) आमरणात्किं शल्यम्।

(i) कण्टकम् (ii) यन्त्रम् (iii) युद्धम्

(ङ) यस्य मानसं शुद्धम्।

(i) मनः (ii) तपः (iii) सरः

(च) सर्वविनाशे को दक्षः?

(i) समर्थः (ii) प्रत्यक्षम् (iii) निपुणः

## अन्वयाः

1. भगवन्! उपादयेम् किम्? गुरुवचनम्। अपि च हेयम् किम्? अकार्यम्। गुरुः कः? सततम् शिष्यहिताय उद्यतः अधिगततत्त्वः।
2. पथ्यतरः कः? धर्मः। इह शुचिः कः? यस्य मानसम् शुद्धम्। पण्डितः कः? विवेकी। विषम् किम्? गुरुषु अवधीरणा।
3. जीवितम् किम्? अनवद्यम्। जाड्यम् किम्? पाठतः अपि अनभ्यासः। कः जागर्ति? विवेकी। निद्रा का? जन्तोः मूढता।
4. नलिनीदलगतजलवत् तरलम् किम्? यौवनम्, धनम् आयुः च। पुनः कथय, शशिनः किरणसमाः के? सज्जनाः एव।
5. अनर्थफलः कः? मानः। सुखदा का? साधुजनमैत्री। सर्वव्यसनविनाशे कः दक्षः? सर्वथा त्यागी।
6. मरणम् किम्? मूर्खत्वम्। अनर्घम् च किम्? यत् अवसरे दत्तम्। आमरणात् शल्यम् किम्? यत् पापम् प्रच्छन्नम् कृतम्।
7. कस्य वशे प्राणिगणः? सत्यप्रियभाषिणः विनीतस्य। क्व स्थातव्यम्? दृष्टादृष्टलाभाढ्ये न्याय्ये पथि।
8. अन्धः कः? यः अकार्यरतः। बधिरः कः? यः हितानि न शृणोति। मूकः कः? यः काले प्रियाणि वक्तुम् न जानाति।

# योग्यताविस्तारः

(न परीक्षाकृते)

## (क) कविपरिचयः

श्रीमदादिशङ्कराचार्यः प्रश्नोत्तररत्नमालिकायाः रचयिता। ६८६ तमे ईसवीये वर्षे वैशाखमासे अस्य जन्म अभवत्। भारतस्य चतसृषु दिक्षु मठचतुष्टयं स्थापयित्वा आचार्यः आध्यात्मिकपुनरुत्थानाय, सांस्कृतिकसामञ्जस्याय, ऐक्यसंस्थापनाय च महत्त्वपूर्णं कार्यं कृतवान्। तेन सम्पूर्णदेशे वेदान्तस्य प्रचाराय भ्रमणं कृतम्। वयसः द्वात्रिंशत्तमे वर्षे एव स समाधिना प्राणान् अत्यजत्।

## (ख) भावविस्तारः

विविधैः मूल्यैः युक्ताः अन्याः सूक्तयः पठ्यन्ताम्

**गुरुः**
(क) आचार्यः प्लावयिता, सम्यग्ज्ञानं प्लव इहोच्यते।
(ख) दुर्लभः सः गुरुः लोके शिष्यचिन्तापहारकः।
(ग) यः तारयेदविद्यां सः गुरुः।
(घ) आज्ञा गुरूणां हि अविचारणीया।

**धर्म :**
(क) आचारः परमो धर्मः।
(ख) एको धर्मः परं श्रेयः।
(ग) धर्मो रक्षति रक्षितः।
(घ) स्वधर्मे निधनं श्रेयः परमधर्मः भयावहः।

**साधुसङ्गः**
(क) साधुसङ्गः प्राणात् अपि प्रियः।
(ख) सत्सङ्गः कस्य न उन्नतिकारकः?
(ग) सत्सङ्गतिः कथय किं न करोति पुंसाम्?

**विनम्रः**
(क) विनम्रः सदा वर्धते।
(ख) स्वभावतः सर्वदा विनीतः विद्वद्भिः पूज्यः।
(ग) नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः।

**चत्वारः सन्ति**

| | | 1 | 2 | 3 | 4 |
|---|---|---|---|---|---|
| 1. | वेदाः | ऋग्वेदः | सामवेदः | यजुर्वेदः | अथर्ववेदः |
| 2. | आश्रमाः | ब्रह्मचर्याश्रमः | गृहस्थाश्रमः | वानप्रस्थाश्रमः | संन्यासाश्रमः |
| 3. | पुरुषार्थाः | धर्मः | अर्थः | कामः | मोक्षः |

| | | | | |
|---|---|---|---|---|
| 4. मठाः | जगन्नाथपुर्याम् | द्वारिकायाम् | रामेश्वरे | बदरीनाथपर्वते |
| | गोवर्धनमठः | शारदामठः | शृङ्गेरीमठः | ज्योतिर्मठः |
| 5. महावाक्यानि | प्रज्ञानं ब्रह्म | तत्त्वमसि | अहं ब्रह्मास्मि | अयमात्मा ब्रह्म |

## प्रहेलिका

**द्वन्द्वो द्विगुरपि चाहं मद्गृहे नित्यम् अव्ययीभावः।**
**तत्पुरुषः कर्मधारय येनाहं स्यां बहुव्रीहिः।।**

द्वन्द्व-द्विगु-अव्ययीभाव-तत्पुरुष-कर्मधारय- बहुव्रीहिसमासभेदान् आश्रित्य अत्र कूटश्लोके निर्धनस्य धनप्राप्त्यै पत्न्याः प्रार्थनायाः अद्भुतः सामाजिकभावः निबद्धः। अत्र पत्नी धनार्जनाय अकर्मण्यं भर्तारं प्रेरयति।

द्वन्द्वः - अहं भवता सह कलहं करोमि किल? किमर्थम्?
द्विगुः - अहं भवतः भार्या अस्मि। मम पालनपोषणं भवतः कर्त्तव्यम् अस्ति किन्तु (मद्गृहे नित्यम्)......
अव्ययीभावः - प्रतिदिनं गृहे भोजनार्थं किमपि नास्ति।
तत्पुरुषः - अतः हे पतिदेव! कमपि उद्योगं कुरु।
कर्म+धारय धनधान्यादिकं गृहमानय येन कारणेन (येनाहं स्याम्)
बहुव्रीहिः - अहमपि धनधान्यसम्पन्ना भवेयम्।

## एहि हसाम

स्वमित्रस्य गीतं श्रुत्वा जामिताम् (अरुचिम्) अनुभवन् रमेशः कदाचित् तम् उक्तवान्- "मित्र! भवान् यदि आकाशवाण्यां गायेत् तर्हि उत्तमं भवेत्...!" "एवं वा? मम गीतं तावत् अरोचत किं भवते... ?"
'नैव भोः। यदि आकाशवाण्यां गायति तदा तु यदा कदापि आकाशवाणीं शामयितुं शक्यते किल..!!"

*इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।*
*एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥*

**एक ही सत्यरूप परमेश्वर का विद्वज्जन विविध प्रकार से वर्णन करते हैं। उसी को (ऐश्वर्य सम्पन्न होने पर) इन्द्र, (हितकारी होने से) मित्र, (श्रेष्ठ होने से) वरुण तथा (प्रकाशक होने से) अग्नि कहा गया है। वास्तव में, वह (परमात्मा) सुपर्ण तथा गरुत्मान् (एक) है ॥**

**ऋग्वेद 1.164.46**

केन्द्रीय माध्यमिक शिक्षा बोर्ड
भारत
असतो मा सद्गमय

Central Board of Secondary Education
Shiksha Sadan, 17, Rouse Avenue, Institutional Area, Opposite Bal Bhawan, New Delhi-110002